ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# वेदः २

## मध्यमा २

## ( ધોરણ 12 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं विविधतापरिपूर्णं
तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 15.00**

**गुजरातराज्यशाळापाठ्यपुस्तकमंडळम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम्-382010**

© गुजरात राज्यशाला पाठ्यपुस्तक मण्डलम्, गांधीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा:गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तका: सन्ति । अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रूपेण गुजरातराज्यपाठ्य-पुस्तकमण्डल-नियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्येत ।

**विषयमार्गदर्शनम्**
डॉ. राजेन्द्रकुमार पण्डया

**लेखनम्**
डॉ. कुलदीप पुरोहित (कन्वीनर)
डॉ. राजेन्द्र चोटलिया
प्रि. श्री निसर्ग उपाध्याय

**समीक्षणम्**
डॉ. प्रवीण महेता
श्री विमल व्यास
श्री केवल जोषी
श्री राज शर्मा

**भाषाशुद्धि:**
श्री सुरेश व्यास

**संयोजनम्**
डॉ. क्रिष्णा दवे
(विषय-संयोजक : अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक: शैक्षणिक:)

**मुद्रणायोजनम्**
श्री हरेश ऐस. लीम्बाचीया
(उपनियामक: उत्पादनम् )

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो: अध्ययनाध्यापनयो: पद्धत्यो: समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमिति: (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिता: मानिता: च अभ्यासक्रमा: सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यताया: **मध्यमा २ (कक्षा १२) वेद: २** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञै: सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भि: सूचिता: सूचना: सादरं स्वीकरणीया: एव।

**पी. भारती (IAS)**
नियामक: — कार्यवाहकप्रमुख:
ता. 26-10-2020 — गान्धीनगरम्

**प्रथमावृत्ति: 2020**
**प्रकाशक:** - गुजरातराज्यशालापाठ्यपुस्तकमंडलम्, विद्यायनम्, सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन, पी. भारती, नियामक:
**मुद्रक:** -

# मूलभूतकर्तव्यानि

**प्रत्येकस्य भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः ।** *

(क) संविधानं प्रतिप्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रगीतस्य चादरः ।

(ख) स्वातन्त्र्याय अस्मदीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च ।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डितातायाश्च समर्थनं सद्रक्षणं च ।

(घ) देशस्य रक्षणं राष्ट्रीयसेवायै उद्घोषणायां जातायां तदनुसरणं च ।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्य- समानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरव-हानिकारकव्यवहारत्यागश्च ।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः ।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तत्सुधारणा तथा जीवमात्रं प्रति अनुकम्पाभावः ।

(झ) वैज्ञानिकमानसाय मानवतावादाय जिज्ञासायै सुधारणायै च भावनाभिगमाभिबोधः ।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च ।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः ।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (6 तः 14)वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देया : ।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | वेदाः अपौरुषेयाः | 1 |
| २. | शतपथब्राह्मणपरिचयः | 5 |
| ३. | पास्करगृह्यसूत्रपरिचयः | 11 |
| ४. | प्रातिशाख्यपरिचयः | 15 |
| ५. | कात्यायनश्रौतसूत्रपरिचयः | 19 |
| ६. | याज्ञवल्क्यशिक्षावर्णादिविचारः | 25 |
| ७. | याज्ञवल्क्यशिक्षास्वरभक्तिविचारः | 32 |
| ८. | ऋग्वेदीयरुद्राभिषेकमन्त्राः १ | 38 |
| ९. | ऋग्वेदीयरुद्राभिषेकमन्त्राः २ | 44 |
| १०. | शुक्लयजुर्वेदे अष्टमोऽध्यायः १ | 51 |
| ११. | शुक्लयजुर्वेदे अष्टमोऽध्यायः २ | 60 |
| १२. | शुक्लयजुर्वेदे नवमोऽध्यायः १ | 70 |
| १३. | शुक्लयजुर्वेदे नवमोऽध्यायः २ | 78 |
| १४. | सामवेदीयरुद्राभिषेकमन्त्राः १ | 86 |
| १५. | सामवेदीयरुद्राभिषेकमन्त्राः २ | 91 |
| १६. | अथर्ववेदीयरुद्राभिषेकमन्त्राः | 96 |
| १७. | अष्टविकृतयः | 106 |

# १ वेदाः अपौरुषेयाः

**प्रस्तावना**

वेदपुरुषस्य वागस्वरूपेण प्राप्ताः वेदाः । अस्माकं निधयः सन्ति एतादृशीनिधीनां विषये ज्ञानम् अस्माकं भारतीयानां कर्तव्यमस्ति । ते वेदाः पौरुषेयाः वा अपौरूषेयाः इति अस्मिन् पाठे निर्दिष्टमस्ति ।

---

**''अपौरुषेयं वाक्यं वेदोऽयम्''**

**सर्वे वेदाः अपौरुषेयाः सन्ति ।**

''ऋषयः मन्त्रद्रष्टारः न च कर्तारः'' । ऋषति पश्यति इति ऋषिः एकैकस्य मन्त्रस्य कश्चित् ऋषिः वर्तते स च तस्य द्रष्टा भवति । ऋषिशब्दस्य व्युत्पत्तिः ''ऋषि'' अर्थात् द्रक्ष्यति ।

वेदाः नित्याःअपौरुषेयाश्च सन्ति । सृष्ट्यादौ ऋषयः समाधौ दिव्यया प्रतिभया, मेधया, योगेन च मन्त्रान् पश्यन्ति चिन्वति गृहणन्ति च । तस्मात् प्रयोगकाले मन्त्रेण सह तस्य ऋषिनामग्रहणमावश्यकम् अन्यथा स मन्त्रः कर्मफलसहायको न भवति । कदाचित् एकस्यैव मन्त्रस्य अनेके ऋषयः दृश्यन्ते ।

सम्पूर्णोऽपि ऋग्वेदः परमात्मनः - सकाशात् समागतः । मनुरपि स्मरति -

**''अग्निवायुरविभ्यस्तु, त्रयं ब्रह्म सनातनम् ।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम् '' ॥**

श्वेताश्वतरोपनिषदि कथनं वर्तते, सृष्ट्यादौ ब्रह्मा समुत्पन्नोऽभवत् तस्मै ब्रह्मणे परमात्मा वेदज्ञानमददत् -

**''यो ब्रह्माणं विदधाति पूर्वं, यो वै वेदाँश्च प्रहिणोति तस्मै''** ।

(श्वेता. ६. १८)

''शतपथ ब्राह्मणे च -''

**एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरसः।**

(शत. ब्रा. १४.५.४.१२)

शतपथब्राह्मणे एकं विशिष्टं वचनम् उपलभ्यते, यथा संसारे समस्तानां जलानाम् आधारः समुद्रः भवति, तथैव समग्राणां ज्ञानानाम् आधारः वाग्ब्रह्म विद्यते । चतुर्णां वेदानां ज्ञानं तस्मात् वाग्ब्रह्मणः सकाशात् समुद्भूतम् । समस्तानां ज्ञानानामुत्सः ब्रह्म भवति ।

तद्यथा -

**''यथा सर्वासामपां समुद्रः एकायनम् एवं सर्वेषां वेदानां हृदयमेकायनम् - एवं सर्वासां विद्यानां वागेकायनमम्''-**

(बृ. उपनिषत्. ४.३.१२) ऋग्वेदे वेदस्य नित्यत्वविषयिका ऋक् पठ्यते, वेदस्य मन्त्रः विविध प्रकारकःनित्यश्च वर्तते।

**''वाचाविरूप नित्यया''** - (ऋग. ८.७५.६)

निरूक्तस्य कर्तुः यास्कस्य कथनम् अस्ति - ऋषयः वेदमन्त्राणां साक्षात्कार चक्रुः ।

मीमांसादर्शने अपौरुषेयपक्षस्य सम्यक्प्रतिपादनं दृश्यते । तत्र प्रश्नोत्तराभ्याम् अपोरुषेयपक्षः साधितः यथा-पूर्वपक्षे-

**''वेदाश्चैके सन्निकर्षपुरुषाठ्या''**

अर्थात् वेदः मनुष्याणां रचना वर्तते, कालिदासादिग्रन्थवत् ।

अनित्यदर्शनाच्च - वेदमन्त्रेषु अनित्यवस्तूनां पदार्थानां यतीनां च नामानि स्मर्यन्ते यथा तैत्तिरीयसंहितायाम् ''बबरः प्रावाहनिरकायमत'' ''कुसुरबिन्दुरोद्यालकिरकामयत'' अयं भावः प्रवहणस्य पुत्रः बबरः अकामयत। अग्रे च अपत्यार्थकतद्धितप्रत्यय-योगेन औद्दालकिः शब्दः समाम्नातः । अनेन ज्ञायते यथा सम्प्रति प्राप्यमाने इतिहासग्रन्थे राज्ञां वंशविस्तारः तेषां कार्यञ्च पठ्यते, स एव क्रमः वेदेषु भवति ।

तथा च पाणिनेः तद्धितप्रकरणे यत् सूत्रम्, ''तेन प्रोक्तम्'', अर्थात् तेन कविना लेखकेन विदुषा प्रोक्तम् इत्यर्थः - अत्र पुरुषानुप्रवेशः सम्भवति ।

अस्याक्षेपस्य (पूर्वपक्षस्य) समाधानं मीमांसकैः क्रियते -

वेदः नित्यः अपौरुषेयश्चास्ति । कठादिऋषीणां नामानि शाखानां प्रचारप्रसाराय कृतानि विद्यन्ते । ऋषीणां तच्छाखा प्रचाराय नामानि समाम्नातानि यथा - काठकसंहिता, कौथुमसंहिता, मैत्रायनीसंहिता, च अत एव जैमिनिना सूत्रितम्- **आख्याःप्रवचनात्** (११.३०) द्वितीयस्याक्षेपस्य समाधानाय सूत्रमस्ति ।

**''परंतु श्रुतिसामान्यमात्रम्''** (११.३१)

यस्यानित्यस्य नामग्रहणपूर्वकं पूर्वपक्षे उपस्थापनं कृतम्, तन्नाम व्यक्तिविशेषस्य न भवति, अपि तु प्रवहण स्वभावयुक्तः वायुरस्ति वायोः पुत्र अत्र प्रकल्पितः ।

नह्यत्र प्रवाहणस्थापत्यं प्रवाहणिः, किंतु यः प्रवाहणस्य कर्ता, यदाह प्रशब्दः प्रकर्षे सिद्धो वहतिश्च प्रापणे । नत्वस्य समुदायः क्वचिद्विवर्तते । इकारस्तु यथा अपत्येर्थे सिद्धस्तथा क्रियायामपि कर्तरि, तस्माद्यः प्रवाहयति स प्रवाहणिरिति। बबर इति शुद्धानुकरणं यथा - यजुर्वेदे - **''चार्षेण किकिदी विना''** इतिवत् ।

''अस्य पक्षस्य पुनः जैमिनीन्यायमालायां द्वाभ्यां कारिकाभ्यां समर्थनं विद्यते - तद्यथा -''

**''पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता ।**

**काठकादिसमाख्याना द्वौक्यत्वाञ्चान्य वाक्यवत्''** ॥

**''समाख्याध्यापकल्पेन वाक्यत्वं तु पराहतम् ।**

**तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता ''** ॥

(जैमि. माला. ५३.५४)

''वेदान्तदर्शने सांख्यदर्शनेच वेदापौरुषेयत्वस्य समर्थनं प्राप्यते । वेदान्तदर्शने परमात्मनः अस्य जगतः अखिलज्ञानस्याधारः विद्यते,'' अत एव सूत्रितम् -

**''शास्त्रयोनित्वात्''** (ब्रह्मसूत्रम् - १.१.२)

सांख्ये च सूत्रमुपन्यस्तम् -

''**निजशक्त्यभिव्यक्तः स्वतः प्रामाण्यम्**-'' (सां.सूत्र. ५५) प्रलयावस्थायां वेदः स्वस्मिन् निमग्नो भवति, ततः च पुनः सृष्ट्यारम्भे ऋषयः दिव्यया प्रतिभया वेदान् प्राप्नुवन्ति यथा च आह -

**''युगान्तेऽन्तर्हितान् वेदान्, सेतिहासान् महर्षयः ।**

**लेभिरे तपसा पूर्वमनुज्ञाता स्वयंभुवा''** ॥ **वनपर्व** ॥

न्यायदर्शनस्य विचारः इषद्-पृथग्भूतः प्रतिभाति तन्मते वेदस्य प्रणेता परमेश्वरः अर्थात् स रचनाकारः भवति। वेदे

यद् सम्पूर्ण-ज्ञानं प्रतिपादितमस्ति, तस्य कर्ता कश्चित् अप्रतिमशक्ति-युक्त: सर्वज्ञः भवेत् । ''सर्वज्ञ: संसारेऽस्मिन् परमेश्वर: एव स्यात् स एव वेदस्य कर्त्ता विद्यते । स एव युगादौ ऋषीणां हृदि वेदज्ञानं तनोति यथा च -

''तेने ब्रह्महृदाय आदिकवये मुह्यन्ति यत्सूरय: ।''

स च ऋषि: वैखरीं वाणीम् अनुसृत्य शिष्येभ्य: तद्ज्ञानं प्रयच्छति - यथा च सूत्रम् -

**''बुद्धिपूर्वा वाक्यकृतिर्वेदे'' (वैशे. सू.-६१)**

न्याये वैशेषिकदर्शने च वेद: अपौरुषेय: नास्ति प्रत्यूत पौरुषेय: । पुरुष: अत्र ईश्वरस्य वाचक: अस्ति । ईश्वर: आप्त: प्रमाणभूत: प्रमाणस्वरूपो वाऽस्ति । ईश्वर-प्रणीतत्वात् (वाक्यत्वात्) वेदस्य प्रमाणं स्वीक्रियते नैयायिकै: ।

**''मंत्रायुर्वेद-प्रमाण्यवच्च तत् प्रामाण्यम्'' ॥**

**''आप्तप्रामाण्यात्'' - (न्यायसूत्रम् - २.१.६८)**

**''तद्वचनाद् आम्नायस्य'' (वैशे. सूत्रम् १.१.३)**

अनादिकालात् गुरुपरम्परया गुरुमखोच्चारणपूर्वंक वेदस्याभ्यास: भवति । तत्र पाठक्रमे पाठभेद: परम्परायां न श्रूयते ।

यतोहि वेद: अनादिनिधन अपौरूषेयश्च वर्तते ।

## शब्दार्थ:

**प्रोक्तम्** - कथितम्, **स्वत:** - स्वयम्, **चिन्वति** - संग्रहंकुर्वन्ति, **प्रकल्पितम्** - विचारितम्, **प्रतिभाति** - अनुभवति, **पश्यन्ति** - दर्शयन्ते ।

## स्वाध्याय:

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) ........................ वाक्यं वेदोऽयम्? (अपौरुषेय, पौरुषेय, ऋषय:)

(२) ........................ वेदा: सन्ति? (एक:, द्वे, चत्वार:)

(३) निरुक्तस्य कर्त्ता ........................? (यास्क:, पारस्कर:, सायन:)

(४) समग्राणां ज्ञानानाम् आधार: ........................ ब्रह्म विद्यते? (वाक्, चक्षु:, श्रोत्रम्)

(५) ........................ दर्शने अपौरुषेयपक्षस्य सम्यक्प्रतिपादनं दृश्यते? (मीमांसा, वैशेषिक, सांख्य)

**२. निम्नाङ्कितनां प्रश्नानां एकैकवाक्येनोत्तराणि लिखत ।**

(१) ऋषय: केषां द्रष्टार:?

(२) एकैकस्य मन्त्रस्य किं वर्तते?

(३) वेद: पौरुषेय: वा अपौरुषेय:?

(४) क: त्रयं ब्रह्म सनातनम्?

(५) ''वाचा विरूप नित्यता'' इदं वाक्यं कस्मिन् वेदे?

**३. द्वयो: प्रश्नयो: विस्तृतम् उत्तरं ददातु?**

(१) वेदा: अपौरूषेया: इति विषयं सविस्तारं लिखत?

(२) वेदानां परिचयं ददातु?

**४. क्रियापदानां परिचयं लिखत ।**

(१) अकामयत
(२) क्रियते
(३) विद्यन्ते
(४) वर्तते
(५) गृह्णन्ति

**५. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) नामानि
(२) मन्त्रेषु
(३) तेन
(४) वेदान्
(५) ईश्वरस्य

**६. सन्धिविच्छेदं कुरुत ।**

(१) वेदोऽयम्
(२) सृष्ट्यादौ
(३) एकस्यैव
(४) समुत्पन्नोऽभवत्
(५) प्रश्नोत्तराभ्याम्

**७. सन्धिमेलनं कुरुत ।**

(१) समूर्णः + अपि
(२) यस्य + अनित्यस्य
(३) प्र + उक्तम्
(४) सूत्रम् + उपन्यस्तम्
(५) श्वेताश्वतर + उपनिषदि

**छात्र-प्रवृत्तिः**

- वेदेषु किं विद्यते तत् सर्वं निबन्धरूपेण लिखतु ।

**विशिष्टज्ञानम्**

- पुमान् पुमांसं परिपातुविश्वतः । (ऋक् – ६/७५/१३)
  विश्वस्य मानव एवं मानवसमाजस्य सर्वतः पालनं करोति ।

●

# २ शतपथब्राह्मण-परिचयः

**प्रस्तावना**

अस्माकं दैनन्दिनजीवने यथा मन्त्राणामावश्यकता वर्तते तथैव मन्त्राणां व्याख्यातग्रन्थानाम् अपि महती आवश्यकता वर्तते । अतः व्याख्यानस्वरूपशतपथब्राह्मणग्रन्थस्य परिचयः अस्मिन् प्रकरणे क्रियते ।

---

**''मन्त्रब्राह्मणयोर्वेदनामधेयम्''** ॥

मन्त्रब्राह्मणभागयोः संयुक्तः ग्रन्थः वेद इति कथ्यते ।

मन्त्रः एवं ब्राह्मणः भागयोः अन्तस्सम्बन्धः ब्रह्मचर्याश्रमः तथा च गार्हस्थाश्रमात् अस्ति ।

मन्त्रभागस्य सरलार्थः पूर्वाचार्यैः संहिताभागः वा भाष्यभागः इति कृतः । तेषु प्रतिपादितविषयः विधिः इति कथ्यते ।

मीमांसासूत्रकारआचार्यजैमिनिमतानुसारेण ''मन्त्रावशिष्टवेदांशः एव ब्राह्मणः'' सामान्यतया मन्त्रोक्तकर्माणां विनियोजकः एवं विधायकोग्रन्थः ब्राह्मणः इति उच्यते । ब्राह्मणग्रन्थस्य त्रय भागाः –

(१) ब्राह्मणम् ।

(२) उपनिषत् ।

(३) आरण्यकः ।

ऋषिभिः मन्त्रस्य व्याख्या कृता तस्यां व्याख्यांयां ''ब्राह्मणग्रन्थः'' इति संज्ञा महर्षिभिः प्रदत्ता । तथा अस्य निर्वचनं ''ब्रह्मण वेदस्येदं व्याख्यानम् इति ब्राह्मणम्'' श्रौतकर्मकाण्डस्य प्रतिपादको भागः ब्राह्मणम् ।

''ब्रह्मन् शब्दात् ''अण्'' प्रत्यये नपुंसकलिङ्गे वेदराश्याः अभिधायके अर्थे ''ब्राह्मणः'' इति शब्दः सिद्ध्यति।

ब्राह्मण भागस्याऽपि द्वौ भागौ स्तः ।

(१) विधिः ।

(२) अर्थवादश्च ।

विधिरपि द्विधारूपेण विभज्यते –

(१) अज्ञातार्थज्ञापको विधिः ।

(२) अप्रवृत्तप्रवर्तनो विधिः । इति ।

अर्थवादः – ''प्राशस्त्यनिन्दात्मकं वाक्यमर्थवादः''

अथात् अर्थवादः यज्ञेषु निषिद्धवस्तूनां निषेधं करोति । तथा च यज्ञे ग्राह्यवस्तूनां प्रशंसां कृत्वा मनुष्यान् यज्ञम् प्रति प्रेरयति ।

ब्राह्मणग्रन्थविषये वाचस्पतिमिश्रः अपि कथयति यत् –

**नैरूक्त्यं यस्य मन्त्रस्य, विनियोगः सप्रयोजनम् ।**
**प्रतिष्ठानं विधिश्चैव, ब्राह्मणं तदिहोच्यते ॥**

ब्राह्मण ग्रन्थाः वेदस्य चतुषु भागेषु ऋक्-यजु-साम, – अथर्वेषु प्रतिपादिताः । तेषु यजुर्वेदस्य माध्यन्दिनीय ब्राह्मणस्य अत्र व्याख्या कार्या । प्राचीनयुगे युजर्वेदस्य पञ्चदशशाखाः आसन् । शाखानुसारेण तस्य पञ्चदश ब्राह्मणग्रन्थाः

अपि आसन् । किन्तु वर्तमानकाले यजुर्वेदस्य सम्पूर्णसाहित्यं न प्राप्यते । अस्मिन् काले यजुर्वेदस्य द्वौ भागौ स्तः-

(१) शुक्लयजुर्वेदः ।

(२) कृष्णयजुर्वेदः ।

तस्मिन् शुक्लयजुर्वेदस्य द्वे शाखे -

(१) माध्यन्दिनी शाखा ।

(२) काण्वशाखा ।

शुक्लयजुर्वेदस्य एक एव ब्राह्मणग्रन्थः सः ब्राह्मणः ग्रन्थः ''शतपथब्राह्मणम्'' इति कथ्यते । आचार्यैः अस्य ग्रन्थस्य व्युत्पत्तिः विशिष्टरूपेण कृता । तद्यथा - ''शता पन्थानो मार्गनामाध्यायाः यस्य तच्छतपथम्'' ॥ शतपथब्राह्मणमिति नामकरणं शताध्यात्मकत्वात् जातम् ॥

**''माध्यन्दिनीशाखायाः शतपथे चतुर्दशकाण्डानि शताध्यायाः सन्ति ।'' (१००)**

''अष्टत्रिंशदुत्तर चतुश्शतम्'' (४३८) ब्राह्मणानि चतुर्विंशत्युत्तरं षट्शताधिकं सप्तसहस्रं (७६२४) कण्डिकाः विद्यन्ते।

चतुर्दशैः काण्डैः विभक्तोऽयं सम्पूर्णो ग्रन्थः । काण्डेषु अध्यायाः, अध्यायेषु च ब्राह्माणानि, ब्राह्मणेषु कण्डिकाः इति नामानि विभक्तानि विद्यन्ते ।

चतुर्दशकाण्डानां नामानि तथा वर्ण्यविषयाश्च अधोनिर्दिश्यन्ते -

| क्राण्डम् | कण्डानां नाम | अध्यायः | प्रणांठकः | कण्डिका | ब्राह्मणानि |
|---|---|---|---|---|---|
| (१) | हविर्यज्ञम् | ९ | ७ | ८३७ | ३७ |
| (२) | एकपादिकम् | ६ | ५ | ५४९ | २४ |
| (३) | अध्वरम् | ९ | ७ | ८५९ | ३७ |
| (४) | ग्रहनाम | ६ | ५ | ६४८ | ३९ |
| (५) | सवम् | ५ | ४ | ४७१ | २५ |
| (६) | उषासम्भरणम् | ८ | ५ | ५३० | २७ |
| (७) | हस्तिघटम् | ५ | ४ | ३९८ | १२ |
| (८) | चितिः | ७ | ४ | ४३७ | २७ |
| (९) | संचितः | ५ | ४ | ४०२ | १५ |
| (१०) | अग्निरहस्यम् | ६ | ४ | ३६९ | ३१ |
| (११) | अष्टाध्यायी | ८ | ४ | ४३७ | ४२ |
| (१२) | मध्यमम् | ९ | ४ | ४५९ | २९ |
| (१३) | अश्वमेघम् | ८ | ४ | ४३२ | ४३ |
| (१४) | बृहदारण्यकम् | ९ | ७ | ७९६ | ५० |
| | योगः | | | | |
| | **१४** | **१००** | **६८** | **७६२५** | **४३८** |

कण्डिकासंख्या - २५०००

अक्षरसंख्या - ७६८०००

**काण्डानां वर्ण्यविषयः -**

- प्रथमकाण्डम् - दर्शपूर्णमासौ ।
- द्वितीयकाण्डम् - आधानम्, पुनराधानम्, अग्निहोत्रम्, उपस्थानम्, प्रवत्स्यदुपस्थानम्, आगतोपस्थानम् पिण्डपितृयज्ञः, आग्रयणम्, दाक्षायणयज्ञः इति चातुर्मास्यानि ।
- तृतीयकाण्डम् - सोमयागः दीक्षाभिषवान्तः विषयः ।
- चतुर्थकाण्डम् - सवनत्रयकर्म, षोडश्यादिसंस्था द्वादशाहयागः त्रिरात्राहीनदक्षिणा, सत्रयागानां चित्रणम् ।
- पञ्चमकाण्डम् - वाजपेयराजसूययागौ ।
- षष्ठकाण्डम् - उषासम्भरणम्, विष्णुक्रम-वात्सप्रोपस्थानम्, वनीवाहनम् ।
- सप्तमकाण्डम् - चयनयागः, गार्हपत्यचयनम्, निर्ऋतिचयनम्, अग्निक्षेत्रसंस्कारः दर्भस्तम्बादिकं कर्म ।
- अष्टकाण्डम् - प्राणभृतकर्म, चयनयागस्य समाप्तिः ।
- नवमकाण्डम् - शतरुद्रियहोमः, श्विष्ण्यचयनम्, पुनश्चितिः, चित्युपस्थानम् ।
- दशमकाण्डम् - चितिसम्पत्तिः, चयनयागस्तुतिः चित्यपक्षपुच्छविचारः, चित्यग्निवदीपरिमाणम्, परिमाणसम्पत्तिः, चयनकालमीमांसा, चित्याग्ने, छन्दसां सम्पत्तिः, इष्टकानां संख्याः अग्नेःउपासना, मनसः सृष्टिः लोकानां प्रतिनिधिरग्निः, अग्नेः सर्वरूपकथनम् । ऋषीणां वंशविस्तारः ।
- एकादशकाण्डम् - अग्न्याधानकालः दर्शपूर्णमासयोः कालविधिः दाक्षायणयज्ञः, पथिकृत् इष्टिः अभ्युदयेष्टिः, दर्शपूर्णमासद्रव्यानामर्थवादः प्रयाजानुयाजो इडाकर्म, स्विष्टकृत्मीमांसा अग्निहोत्रार्थवादः, ब्रह्मचारिकर्त्तव्यम्, मित्रविन्देष्टिः, हविः समृद्धिः, चातुर्मास्यानामर्थवादः पञ्चमहायज्ञाः स्वाध्यायप्रशंसा, प्रायश्चित्तम्, अदाभ्यग्रहः, अध्यात्मविद्या, पशुबन्धः, हविर्यज्ञस्य शेषकर्मणां विचारः ।
- द्वादशकाण्डम् - दीक्षा-यागः, सत्रयागः, महाव्रतम्, गवामयन सत्रम्, अग्निहोत्रप्रायश्चित्तम्, मृतकाग्निहोत्रम्, अन्त्येष्टिः ।
- त्रयोदशकाण्डम् - अश्वमेधः प्रायश्चित्तम्, पुरुषमेधः, सर्वमेधः दशरात्रम्, पितृमेधः ।
- चतुर्दशकाण्डम् - प्रवर्ग्यधर्मः, महावीरसम्भरणम्, प्रवर्ग्योत्सादनम्, प्रवर्ग्यकर्तृनियमः, बृहदारण्यकम्, काम्यहोमः, गर्भाधानादिसंस्काराः, वंशब्राह्मणम् ।

एतेषां चतुर्दश-काण्डानां निरूपितविषयं दृष्ट्वा बोधो जायते यत् प्रथमकाण्डात्, नवमकाण्डपर्यन्तं यज्ञानां वर्णनं दशमकाण्डात् अर्धचतुर्दश काण्डपर्यन्तं विज्ञानस्य वर्णनं तथा शेषचतुर्दशकाण्डे ज्ञानकाण्डस्य दर्शनं दृश्यते ।

- काण्वशाखा - काण्यशतपथे सप्तदशकाण्डानि चतुरुत्तरशताध्यायाः (१०४) सन्ति ।

  काण्वशतपथः शताध्यायी नास्ति, किन्तु तत्र ''छत्रिणोयान्ति'' इति न्यायेन ''शतपथ'' इति संज्ञा भवति । पञ्चत्रिंशदुत्तरचतुश्शतानि ब्राह्मणानि (४३५) षडुत्तर-अष्टशताधिक षट्सहस्राः कण्डिकाः (६८०६) विद्यन्ते ।

अत्र प्रदर्श्यन्ते -

| काण्डम् | काण्डानां नाम | अध्यायाः | ब्राह्मणानि | कण्डिका |
|---|---|---|---|---|
| (१) | एकपातकाण्डम् | ६ | २२ | ३७६ |
| (२) | हविर्यज्ञः | ८ | ३२ | ५३२ |
| (३) | उद्धारिकाण्डम् | २ | २२ | १२४ |
| (४) | अध्वरम् | ९ | ३६ | ६४९ |
| (५) | ग्रहनाम | ८ | ३८ | ९७४ |
| (६) | वाजपेयः | २ | ७ | ७०० |
| (७) | राजसूयः | ५ | १९ | २८९ |
| (८) | उषासम्भरणम् | ८ | २७ | ५११ |
| (९) | हस्तिघटः | ५ | १६ | २५७ |
| (१०) | चितिः | ५ | २० | २४३ |
| (११) | साग्निचितिः | ७ | २० | २३७ |
| (१२) | अग्निरहस्यम् | ६ | २८ | २८६ |
| (१३) | अष्टाध्यायी | ८ | ३१ | २४१ |
| (१४) | मध्यमम् | ९ | २८ | ३९२ |
| (१५) | अश्वमेधः | ८ | ४४ | ३०८ |
| (१६) | प्रवर्ग्यः | २ | ८ | १९२ |
| (१७) | वृहदारण्यकम् | ६ | ४७ | २९५ |
| | योगः | | | |
| | **१७** | **१०४** | **४३५** | **६८०६** |

अस्मिन् शतपथेऽपि विज्ञानम् तथा ज्ञानकाण्डानां विषयाः प्रतिपादिताः इति ।

**शतपथ ब्राह्मणस्य ऋषि :-**

माध्यन्दिनशतपथब्राह्मणस्य द्रष्टा वाजसनिपुत्रः याज्ञवल्क्यः अस्ति । अपत्यार्थे सः याज्ञवल्क्यः वाजसनेयः अपि कथ्यते । याज्ञवल्क्यशब्दोऽपि विद्वद्भिः विचारतिः तदनुसारं यज्ञस्य वल्कलं वस्त्रं यः धारयति स याज्ञवल्क्यः ।

अस्य पिता पुराणानुसारेण उभाभ्यां नामभ्यां ख्यापितः अस्ति, ब्रह्मरात, देवरातश्च . स्कन्दपुराणे अस्य मातुः ''सुनन्दा'' इति नाम्ना आख्यापितम् ।

याज्ञवल्क्यस्य द्वे पत्न्यौ आस्ताम् । मैत्रेयी कात्यायनी च । याज्ञवल्क्यस्य निवासस्थानं मिथिला इति ज्ञायते तथा च तस्य कर्मस्थानं महाभारतानुसारेण सौराष्ट्र इति मन्यते ।

श्रूयते याज्ञवल्क्यः सर्वप्रथमं महर्षे शाकल्यात् ऋग्वेदमधीतवान् परन्तु अज्ञातकारणात् सः ऋग्वेदं तत्याज । पुनः मातुलात् (वैशम्पायनऋषेः) सकाशात्, यजुर्वेदं पठितवान्, तत्रापि मतभेदो जातः ततः सूर्यमाराध्य शुक्लयजुर्वेदं प्राप्तवान्। याज्ञवकल्यस्मृतेः रचनाकारः याज्ञवल्क्यः तथा याज्ञवल्क्यशिक्षायाः अपि रचनाकारः स एव अस्ति ।

शतपथब्राह्मणस्य रचनाविषये महाभारतेऽपि कथितं यत् -

**ततः शतपथं कृत्स्नं, सरहस्यं ससडग्रहम् ॥**

**चक्रे सपरिवेषं च हर्षेण परमेण ह ॥**

**कृत्वा चाध्ययनं, तेषां शिष्याणां शतमुत्तमम् ॥**

(महा. शान्ति पर्व. ३१८.१६-१७)

याज्ञवल्क्यस्य पुत्रः कात्यायनः वाजसनेयिशाखायाः गृह्यसूत्रस्य रचनाकारः अस्ति । अस्य गृह्यसूत्रस्य नाम ''पारस्करगृह्यसूत्रम्'' इति अस्ति ।

याज्ञवल्क्यः - विदेहराजजनकस्य गुरोः पदमपि अलङ्कृतवान् ॥

याज्ञवल्क्यपश्चात् तस्य पुत्रः ''कात्यायनः'' आदित्यसम्प्रदायस्य सरंक्षको बभूव ।

**शतपत ब्राह्मणस्य भाष्यकाराः -**

(१) हरिस्वामी (२) सायणाचार्यः (३) श्री कवीन्द्राचार्यसरस्वती (४) श्री गणेशशास्त्री पाठकः ।

**शतपथ ब्राह्मणस्य वैशिष्ट्यम् -**

शतपथ ब्राह्मणम् वर्तमानकाले प्राप्तब्राह्मणेऽस्मिन् विस्तृतम् ब्राह्मणम् वर्तते । कस्य वेदेषु ऋग्वेदः सर्वसंहितासु प्रतिष्ठितः तथैव ब्राह्मणेषु ''शतपथ ब्राह्मणम्'' अपि इमामेव शोभां धारयति । वर्तमाने काले यज्ञस्य रूपस्य अनुष्ठानस्य तथा च रहस्यानां ज्ञानविज्ञानयोः तथा तस्य प्रयोगानां ज्ञानाय, ब्रह्मज्ञानस्य प्राप्त्यर्थम्, शतपथब्राह्मणम् अत्यावश्यकमस्ति।

शतपथब्राह्मणकाले यज्ञीयविधि-विधानपूर्णविकासः बभूव । अयं ब्राह्मणग्रन्थः सर्वेषु ब्राह्मणग्रन्थेषु अतीव प्राचीनः वर्तते ।

अस्मिन् ब्राह्मणे द्वौ स्वरौ उदात्तः अनुदात्तः तेन कारणेन अस्य ब्राह्मणस्य अत्यधिक (महत्त्वम्) वैशिष्ट्यं वर्तते। तथा अन्यः कोऽपि ब्राह्मणग्रन्थः तैत्तिरीयं विहाय स्वराङ्कितरूपेण प्राप्तः न भवति ।

शतपथब्राह्मणे बहूनि उपाख्यानानि प्राप्यन्ते । तानि यज्ञीयविधिषु व्याख्यायनपरकाणि उपदेशात्मकानि, नैतिक-आदर्शात् अनुप्राणितानि भवन्ति ।

कुरुक्षेत्रस्य राजा जनमेजस्य उल्लेखोऽपि सर्वप्रथम अस्मिन् एव ग्रन्थे दृश्यते । ब्राह्मणग्रन्थानां रचनाकालः ६००-८०० ईसापूर्वः बभूव ।

**शब्दार्थः**

**प्रतिपादितः** - उल्लिखितः **प्रणीतः** - रचितः, **अस्ति** - वर्तते, **प्राप्यते** - प्राप्तं भवति,

**स्वाध्यायः**

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) मन्त्रब्राह्मणयोः ........................ नामधेयम् । (वेदः, निरुक्तम्, मन्त्रः)

(२) मन्त्राविशिष्ट वेदांशः ........................ । (मन्त्रः, वेदः, ब्राह्मणम्)

(३) ब्राह्मणशब्दः ........................ अर्थे सिद्ध्यति । (निर्वचन, व्याख्या, विधिः)

(४) प्राशस्त्यनिन्दात्मकं वाक्यं ........................ । (पौरुषेय, अर्थवाद, विधि)

(५) माध्यन्दिनशतपथब्राह्मणे ........................ काण्डाः । (एकादश, द्वादश, चतुर्दश)

**२.	निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) शतपथ ब्राह्मणस्य दृष्टारौ कौ?

(२) को नाम अर्थवादः?

(३) ब्राह्मणग्रन्थस्य कति भागाः?

(४) किं वदन्ति अनुसारेण सर्वप्रथमं याज्ञवल्क्यः कस्य पार्श्वे कं वेदम् अधीतवान्?

(५) पूर्वाचार्यमतेन शतपथस्य व्युत्पत्तिः का?

**३.	द्वयोः प्रश्नयोः विस्तृतम् उत्तरं लिखत?**

(१) शतपथब्राह्मणस्य काण्डनामानि लिखत ।

(२) शतपथब्राह्मणस्य वैशिष्ट्यं किम् ?

**४.	सन्धिमेलनं कुरुत ।**

(१) चिति + अग्ने

(२) नैः + उक्त्यम्

(३) विधिः + च + एव

(४) अष्टः + त्रिंशत् + उत्तरः

(५) तत् + शतपथम्

**५.	सन्धिविच्छेदं कुरुत ।**

(१) विभक्तोऽयम्

(२) मन्त्रब्राह्मणयोः

(३) प्रायश्चित्तम्

(४) चित्युपस्थानम्

**६.	शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) मन्त्रब्राह्मणयोः

(२) ग्रन्थस्य

(३) भागौ

(४) ऋषिभिः

(५) वाक्यम्

**७.	क्रियापदानां परिचयं लिखत ।**

(१) उच्यते

(२) स्तः

(३) कथयति

(४) करोति

(५) विभज्यते

**छात्र-प्रवृत्तिः**

- अन्य ब्राह्मणग्रन्थानाम् अध्ययनं कृत्वा अन्यवेदानां ब्राह्मणग्रन्थानां परिचयं लिखत ।

**विशिष्टज्ञानम्**

- मा गृधः कस्यस्विद्धनम् । (ईशावा. २)
  अन्यजनानां धनं न ग्रहणीयम् ।

# ३ पारस्करगृह्यसूत्रपरिचयः

## प्रस्तावना

गृहस्थाश्रमप्रवेशाय यथा विवाहाविसंस्काराणामाव- श्यक्ता वर्तते । तेषां संस्काराणाम् इति कर्तव्यता गृह्यसूत्रेषु प्राप्यते ।

---

गृह्य-शब्दः प्रथमं विचार्यते, ग्रह धातोः क्यप् प्रत्ययः गृह्यः । गृह्य-शब्दः गृहस्थस्य कृते प्रयुज्यते ।

गृहाय गृहाश्रममास्थाय हितं गृह्यं तच्च तत् सूत्रं गृह्यसूत्रम् ।

खादिरगृह्यसूत्रेऽपि विचारः कृतः -

''यस्मिन्नग्नौपाणिं गृहणीयात् स गृह्यः'' ॥

अनेन पर्यालोचनेन इदं सिद्धं यत् गृह्याग्नौ यावन्ति कर्माणि सम्पाद्यन्ते तानि गृह्यसूत्रस्य प्रतिपाद्यकर्माणि विषयाश्च। समस्ते भारतदेशे गृह्यसूत्रस्य प्रचारः श्रूयते . प्रामुख्येन द्विजानां कर्माणि स्वशाखाभेदेन क्रियन्ते अतः सर्वत्र गृहस्यसूत्रस्य प्रयोजनं भवति । स्मृतौ यानि कर्माणि निर्दिष्टानि तेषामपि मूलं गृह्यसूत्रेषु दृश्यते । गृह्यसूत्रे वैदिकदेवतानां स्मरणं कृतमेव. किन्तु अन्येऽपि देवाः अत्र स्तुतिभाजिनो दृश्यन्ते । सप्तगृह्ययज्ञाः प्रमुखाः -

पितृयज्ञः पार्वगम्, अष्टका, श्रावणी, आश्वयुजी, आग्रहायणी, चैत्री यज्ञश्च । पञ्चमहायज्ञानां च विवरणं गृह्यसूत्रे परिगीतम् । श्रौते पञ्चाग्नयः भवन्ति, तेषु त्रयः अतिप्रसिद्धाः आहवनीयाग्निः गार्हपत्याग्निः, दक्षिणाग्निश्च द्वौ सभ्याग्निः, आवसथ्याग्निश्च । श्रौतकर्मणि गृह्यकर्म अपि भवति, परन्तु गृह्यकर्म स्वातन्त्रेण निरूप्यते ।

गृह्यसूत्रेषु प्रायः भेदो दृश्यते । स भेदः सर्वथाऽनपेक्षितः नास्ति । स्वशाखानुसारं गृह्यसूत्रं निर्मितम् । अतः मन्त्रोऽपि स्वसाखीयः स्यात् । द्रव्यविषयेऽपि अनेके प्रभेदाः निरूपिताः । गृह्यसूत्रं मुहूर्तस्यापि चिन्तनं करोति । यथा उपनयनसंस्कारः कदा भवेत् तत्कृते माणवकस्य वयः ।

**पारस्करगृह्यसूत्रम्** - सम्प्रति समुपलब्धेषु प्रकाशितेषु गृह्यसूत्रेषु पारस्करगृह्यसूत्रस्य सर्वोत्तमस्थानं विद्यते । कात्यायनगृह्यसूत्रमपि यजुर्वेदस्य वर्तते, सम्पूर्णे उत्तरभारते अस्य प्रभावः अविकलेन दृश्यते । दक्षिणेऽपि क्षेत्र विशेषे प्रभावः श्रूयते । अनेन विधिना संस्कारादीनां सम्पादनम् । अस्य अन्यदपि नाम श्रूयते यथा कातीयसूत्रं वाजसनेय गृह्यसूत्रञ्चेति। कात्यायनस्यापरं नाम पारस्करः आसीत् । पाणिनीयसूत्रपाठे पारस्करः प्रभृतीनि संज्ञायां सूत्रमिदमुपन्यस्तं तेन पारस्करः देववाची प्रतीयते तथापि ऋषि वाचकोऽपि शब्दः मन्यते । ग्रन्थस्य विभागः काण्डेषु दृश्यते । त्रिषुकाण्डेषु विभक्तमिदं सूत्रम् । काण्डेषु कण्डिकयाः उपविभागाः विद्यन्ते । प्रथमकाण्डे एकोनविंशतिः कण्डिकाः, द्वितीये सप्तदशकण्डिकाः तृतीये च पञ्चदशकण्डिकाः सन्ति । सर्वमाहत्य (५१) एकपञ्चाशत् कण्डिकाः राजन्ते । कान्द्रानरोधेन विषयाः निम्नाङ्किताः सन्ति -

### प्रथमकाण्डस्यवर्ण्यविषयाः

- गृह्यस्थाली पाकानां कर्म, आवसथ्याधानम् । — प्रथमकण्डिकायाम्
- कण्डिकायां अग्न्याधानकालः, अग्निस्थापनं ब्राह्मणभोजनञ्च । — द्वितीयकण्डिकायाम्
- षडर्घ्याः आचार्यादयः, ऋत्विक्पूजनम्, मधुपर्कः । — तृतीयाकण्डिकायाम्
- पाकयज्ञः, वस्त्रपरिधानम्, कन्यादानविधिश्च । — चतुर्थीकण्डिकायाम्
- आश्वारनविधिः, जयाहोमः, अभ्यातानहोमश्च । — पञ्चमीकण्डिकायाम्
- लाजाहोमः, साङ्गुष्ठं पाणिग्रहणं च । — षष्ठीकण्डिकायाम्
- शिलारोहणम्, गाथागानम्, परिक्रमणञ्च । — सप्तमीकण्डिकायाम्
- सप्तपदी, सूर्यदर्शनम्, ध्रुवदर्शनं वा सिन्दूरदानम् । — अष्टमीकण्डिकायाम्
- नित्यहोमः । — नवमीकण्डिकायाम्

- रथभङ्गे, प्रायश्चित्तम् । — दशमीकण्डिकायाम्
- चतुर्थीकर्म, स्थालीपाक:, ऋतुकाले प्रवेशश्च । — एकादशीकण्डिकायाम्
- पक्षादिकर्म, (स्मार्त: दर्शपूर्णमास:) । — द्वादशीकण्डिकायाम्
- गर्भधारणाय औषधीनां प्रयोग: । — त्रयोदशीकण्डिकायाम्
- पुंसवनम्, पुत्रलाभार्थम्, औषधीनामुपयोग: । — चतुर्दशीकण्डिकायाम्
- सीमन्तोन्नयनम् । — पञ्चदशीकण्डिकायाम्
- जातकर्म, मेधजननम्, आयुष्यकरणम्, स्तनपानम्, अभिचारप्रयोगश्च । — षोडशीकण्डिकायाम्
- नामकरणम्, निष्क्रमणम् । — सप्तदशीकण्डिकायाम्
- प्रवासागमनम् । — अष्टदशीकण्डिकायाम्
- अन्नप्राशनम् । — एकोनविंशतिकण्डिकायाम्

**द्वितीयकाण्डेऽपि अनेके विषया: व्याख्याता :-**

**द्वितीयकाण्डस्यवर्ण्यविषया:**

- चूडाकरणम् । — प्रथमाकण्डिकायाम्
- उपनयनम्, वस्त्रधारणम्, मेखलानियम:, दण्डधारणम्, यज्ञापवीतम् अनुशासनम् इत्यादि। — द्वितीयाकण्डिकायाम्
- उपनयाङ्गनियमा:, गायत्रीदानम् । — तृतीयाकण्डिकायाम्
- समिदाधानम्, ब्रह्मचारिनियमा: । — चतुर्थीकण्डिकायाम्
- भिक्षाचरणम्, स्नातकयमा: । — पञ्चमीकण्डिकायाम्
- समावर्तनम्, केशान्त: । — षष्ठीकण्डिकायाम्
- स्नाकनियमा: । — सप्तमीकण्डिकायाम्
- स्नातकव्रतम् । — अष्टमीकण्डिकायाम्
- पञ्चमहायज्ञा: । — नवमीकण्डिकायाम्
- उपाकर्म । — दशमीकण्डिकायाम्
- अनध्याय: । — एकादशीकण्डिकायाम्
- उत्सर्ग: । — द्वादशीकण्डिकायाम्
- लाङ्गलप्रयोजनम् । — त्रयोदशीकण्डिकायाम्
- श्रवणीकर्म । — चतुर्दशीकण्डिकायाम्
- इन्द्रयज्ञ: । — पञ्चदशीकण्डिकायाम्
- आश्वयुजीकर्म । — षोडशीकण्डिकायाम्
- सीतायज्ञ: । — सप्तदशीकण्डिकायाम्

**तृतीयकाण्डे**

**तृतीयकाण्डस्यवर्ण्यविषया:**

- नवान्नप्राशनम् । — प्रथमाकण्डिकायाम्
- आग्रहानीकर्म । — द्वितीयाकण्डिकायाम्
- अष्टका: । — तृतीयाकण्डिकायाम्
- शालाकर्म । — चतुर्थीकण्डिकायाम्
- मणिकावधानम् । — पञ्चमीकण्डिकायाम्

- शीर्षरोगभेषजम् । षष्ठीकण्डिकायाम्
- दासवशीकरणम् । सप्तमीकण्डिकायाम्
- शूलगवः । अष्टमीकण्डिकायाम्
- वृषोत्सर्गः। नवमीकण्डिकायाम्
- अवकीर्णिप्रायश्चित्तम् । दशमीकण्डिकायाम्
- अवकीर्णिप्रायश्चित्तम् । एकादशीकण्डिकायाम्
- अवकीर्णिप्रायश्चित्तम् । द्वादशीकण्डिकायाम्
- सभाप्रवेशनम् । त्रयोदशीकण्डिकायाम्
- रथारोहणम् । चतुर्दशीकण्डिकायाम्
- हस्त्यारोहणम् । पञ्चदशीकण्डिकायाम्

अन्येऽपि एतदतिरिक्ताः विषयाः परिशिष्टभागे विचारिताः यथा –

वापीकूपतडागादीनां प्रतिष्ठाविधिः, शौचसूत्रम्, नित्यस्नानविधिः, ब्रह्मयज्ञविधिः, तर्पणविधिः, श्राद्धसूत्रम्, एकादिष्टविधिः, सपिण्डीकरणविधिः, आभ्युदयिकः, श्राद्धप्रयोगः, अक्षय्यतृप्त्युपायाः काम्यश्राद्धानि, भोजनसूत्रं च ।

पारस्करगृह्यसूत्रे त्रयोदश संस्काराः स्मृताः –

(१) विवाहः (२) गर्भाधानम् (३) पुंसवनम् (४) सीमन्तोन्नयनम् (५) जातकर्म
(६) नामकरणम् (७) निष्क्रमणम् (८) अन्नप्राशनम् (९) चूडाकरणम् (१०) उपनयनम्
(११) केशान्तः (१२) समावर्त्तनम् (१३) अन्त्येष्टिः ।

पारस्कर गृह्यसूत्रस्य अनेके भाष्यकाराः सन्ति तेषु कर्क-जयराम - हरिहर - गदाधर - विश्वनाथाश्च प्रसिद्धाः।

## शब्दार्थः

**सम्पाद्यन्ते** - सम्पादनम्, **प्रतिपाद्य** - प्रतिपादनम्, **भेदः** - भिन्नः, **निरूप्यते** - निरूपणम्, **राजन्ते** - विराजमानः, **स्मृताः** - उल्लेखनम् ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) गृह्य शब्दे ........................ धातुः । (गृह्, ग्रह्, गूह्)
(२) समस्त भारतदेशे ........................ ग्रन्थस्य प्रचारः श्रूयते । (शुल्वसूत्रम्, गृह्यसूत्रम्, कल्पसूत्रम्)
(३) गृह्यशब्दे ........................ प्रत्ययो भवति । (क्यप्, अञ्, अन्)
(४) पारस्करगृह्यसूत्र ........................ काण्डेषु विभक्तः । (चतुर्षु, षट्सु, त्रिषु)
(५) ग्रन्थस्य विभागः कुत्र दृश्यते? (कण्डिकासु, काण्डेषु, मन्त्रेषु)
(६) गृह्यसूत्रेषु प्रायः किं दृश्यते?(भेदः, मन्त्रः, काण्डः)
(७) स्वशाख्यानुसारं किं निर्मितम् ? (शुल्बसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) ''गृह्य'' शब्दः केषां कृते प्रयुज्यते?
(२) पारस्करगृह्यसूत्रम् कस्य वेदस्य वर्तते?
(३) कात्यायनस्यापरं नाम किम् अस्ति?
(४) प्रथमकाण्डे कति कण्डिकाः सन्ति?
(५) पारस्करगृह्यसूत्रस्य त्रयः भाष्यकाराणां नामानि लिखत ।

**३. द्वयोः प्रश्नयोः विस्तृतम् उत्तरं ददातु ।**

(१) पारस्करगृह्सूत्रस्य परिचयं ददातु ।

(२) पारस्करगृह्यसूत्रस्य सारांशं लिखत ।

**४. क्रियापदानां परिचयं लिखत ।**

(१) विचार्यते

(२) श्रूयते

(३) भवति

(४) विद्यन्ते

(५) मन्यते

**५. शब्दनां विभक्तिपरिचयं यच्छत ।**

(१) ग्रन्थस्य

(२) तेन

(३) काण्डेषु

(४) वर्णनम्

(५) अनेन

**६. सन्धिविच्छेदं कुरुत ।**

(१) वाचकोऽपि

(२) विभक्तिमिदम्

(३) तेषामपि

(४) सभ्याग्निः

(५) सर्वदाऽनपेक्षितः

**७. सन्धिमेलनं कुरुत ।**

(१) सूत्रम् + इदम् + उपन्यस्तम्

(२) सर्वम् + आहत्य

(३) काण्ड + अनुरोधेन

(४) अग्नि + आश्वानम्

(५) शाखा + अनुसारम्

**छात्र-प्रवृत्तिः**

- अन्यगृह्यसूत्राणाम् अध्ययनं कृत्वा आश्वलायनगृह्यसूत्रस्य परिचयो लेख्यः ।

**विशिष्टज्ञानम्**

- धर्मंचर । धर्मान्नप्रमदितव्यम् । (तैत्तिर. १/११)
  धर्मस्याचरणं जीवने कर्तव्यम् ।
  धर्माचरणविषये आलस्यं न करणीयम् ।

●

| ४ | प्रातिशाख्यपरिचयः |
|---|---|

# ४ प्रातिशाख्यपरिचयः

**प्रस्तावना**

वर्णोच्चारणनियमाः स्वर-सन्धिनियमाः, संयोगः, लोपः, आगमः, वर्णविकारादि परिज्ञानाय प्रातिसाख्यानां महत्वम् अस्मिन् पाठे निगदितं वर्तते ।

---

भारतीयपरम्परायां वेदस्य तथा वेदाङ्गानाम् अतीव महत्वं वर्तते । वेदानां षडङ्गानि सन्ति । (१) व्याकरणम्। (२) शिक्षा । (३) ज्योतिषम् । (४) कल्पसूत्रम् । (५) निरूक्तम् । (६) छन्दः ।

तानि षडङ्गानि वेदे निहितानि सन्ति । तत्र प्रथमं व्याकरणम् (मुखं व्याकरणं - स्मृतम्) ॥

→ मानवसंस्कृतेः प्राचीनरूपज्ञानाय तथा विकासाय वेदानां परिशीलनम् आवश्यकम् । षड्षु व्याकरणस्य अत्यधिकावश्यकता भवति । तेन शास्त्रेण वेदे सन्धि-विच्छेदः संयोगः, लोपः, आगमः, वर्णविकारः इत्यादि परिवर्तने प्रातिशाख्यग्रन्थस्यापि श्री शुक्लयजुर्वेदाअन्तर्गतमाध्यन्दिनीयसंहिताया महत्वम् अधिकं वर्तते ।

→ वैदिकशब्दानाम् उच्चारणविधौ कदा-केन प्रकारेण शुद्धोच्चारणपूर्वक सस्वरेण च स्फोटो भवेत्, तदर्थं प्रातिशाख्यग्रन्थेऽस्मिन् नियमाः निर्दिष्टाः । समग्रसंसारे भारतस्य या प्राथमिकीप्रतिष्ठा लब्धा । सा प्रतिष्ठा वेदानां स्वीकारत्वेनैव परिगण्यते नात्र संशयः।

→ ब्राह्मणकाले गुरोर्मुखात् छात्राः श्रुतिपरम्परया मन्त्राणामुच्चारणं स्मरणं पठनपाठनादिकं च कुर्वन्ति स्म । किन्तु कालानन्तरं अल्पबुद्धित्वेन वर्णागममात्रासन्धिविपर्ययादिविशिष्टनियमानामभावेन मन्त्राणां शुद्धोच्चारणं कर्तुं छात्राः असमर्थाः । अतः परिस्थितिमनुश्रुत्य तन्निवारणार्थं प्रातिशाख्यग्रन्थमाध्यमेन संसारस्य प्राचीनतमग्रन्थत्वेन निष्पन्नो अभवत् ।

→ प्रातिशाख्यग्रन्थेऽपि पञ्चग्रन्थाः महत्वपूर्णाः सन्ति । यथा -

(१) ऋग्वेदप्रातिशाख्यम् ।

(२) तैत्तिरीयप्रातिशाख्यम् ।

(३) वाजसनेयिप्रातिशाख्यम् ।

(४) अथर्ववेदप्रातिशाख्यम् ।

(५) ऋक्तन्त्रप्रातिशाख्यम् इति ।

→ वैदिकमन्त्राणां शुद्धोच्चारणार्थं वेदस्य प्रत्येकशाखायाः ध्वनिविषयकाध्ययनं सम्पन्नम् । शाखायां शाखायां प्रतिशाखं, प्रतिशाखं भव प्रातिशाख्यम् इति ।

→ उदात्तानुदात्तस्वरितस्वरवर्णानां सन्धयः गुणाः, दोषाः, वर्णोत्पत्तिः, पदपाठेन संहितापाठकरणार्थं ये नियमाः तेषां महत्वपूर्णविषयाणां सविस्तरेण प्रातिशाख्येऽस्मिन् वर्णनं वर्णितम् ।

→ वैदिकमन्त्राणामर्थज्ञानाय यथा निरुक्तम् उपयुज्यते तथैव मन्त्राणां बाह्यस्वरूपज्ञानाय प्रतिशाख्यवैशिष्ट्यं गण्यते ।

→ अत्र स्वाभाविकप्रश्नःउद्भवति, यत् बाह्यस्वरूपज्ञानाय शिक्षा, व्याकरणम्, छन्दः शास्त्रस्य अध्ययनं भवत्येव । तर्हि किमर्थं प्रातिशाख्यग्रन्थस्यावश्यकता भवेद् इति ।

→ उत्तरयति - एतेषु ग्रन्थेषु मुख्यार्थो न प्रदीयते, तेषाम् अध्ययनेन सामान्यार्थःउपलभ्यते । किन्तु प्रातिशाख्यग्रन्थस्य वेदेन सह साक्षात् सम्बन्धोऽस्ति । प्रत्येक प्रातिशाख्यग्रन्थे विविधशाखानुश्रुत्य विशिष्टनियमानां वर्णनं वर्णितम् अस्ति। ततो क्रमपाठः तस्य हेतुः वाध्ययनेत्यादि नैकानां विषयानां प्रतिपादनं सविस्तरपूर्वक ग्रन्थेऽस्मिन् वर्णनं दर्शितम् अस्ति ।

→ ऋग्वेदप्रातिशाख्यम् – ऋग्वेद प्रातिशाख्यस्य प्राचीनता प्रामाणिकता एवं वैज्ञानिकाध्ययनदृष्ट्या स्थानं गण्यते । अतः ऋग्वेदीयमन्त्राणां सर्वैः विना-शङ्कया ग्रहणं स्वीकृतम् । तेन प्रतिभाति यत् ऋग्वेदप्रातिशाख्यस्य प्रभावः सविशेषः। ऋग्वेदप्रातिशाख्ये ऋग्वेदीयशाकलशाखोपशाख्या तैत्तिरीयशाखायाः विस्तारपूर्वकं वर्णनं निगदितम् । प्रातिशाख्येऽस्मिन् पूर्वमेव षड्वारम् अस्य महत्वं प्रतिपादितम् ।

→ सर्वप्रथमं ग्रन्थस्थितानां सूत्राणां संस्करणं १८५९ ई. काले एम. ए. रेग्नियर महोदयेन प्रस्थापितम् । तेन सूत्राणामनुवादः फ्रेञ्चभाषायां कृतः । ततः उव्वटभाषाधारेण संक्षिप्त-विवेचनं प्रकाशितम् । १८६९ ई. काले मैक्समूलर महोदयेन सूत्राणां विवेचनं प्रकाशितम् । प्रातिशाख्येऽस्मिन् ऋग्वेदस्य बाह्यसम्बन्धे अत्यन्तसूक्ष्मम् एवं वैज्ञानिकनियमानां प्रतिपादनं वर्तते । यस्याध्ययनेन प्रतिभाति यत् प्राचीनकालेऽपि ऋक्संहितायाः बाह्यस्वरूपं शब्दः अक्षरशः साम्प्रतकालेऽपि तद्वदेव ।

→ शौनकः – ऋक्प्रातिशाख्यस्य कर्तास्ति शौनकः । षड्गुरुशिष्यानुसारं शौनकेन ऋग्वेदरक्षणार्थं दशग्रन्थानां निर्माणं कृतम् । ते च यथा – (१) आर्षानुक्रमणी । (२) छान्दोनुक्रमणी । (३) देवतानुक्रमणी । (४) अनुवाकानुक्रमणी। (५) सूक्तानुक्रमणी । (६) ऋग्विधानम् । (७) पादविधानम् । (८) बृहद्देवता । (९) शौनकस्मृतिः । (१०) ऋक्प्रातिशाख्यम् ।

→ विष्णुमित्रस्य कथनेन ज्ञायते, यत् वेदज्ञाता आचार्यः शौनक द्वारा मनुष्याणां कल्याणहेतवे ऋक्प्रातिशाख्यस्य निर्माणं जातम् । (अत आचार्यो भगवाञ्छौनको वेदार्थवित्सुहृद्भूत्वा पुरुषहितार्थमृग्वेदस्य शिक्षाशास्त्रम् कृतवान्) । षड्गुरुशिष्यानुसारं शौनकाचार्यस्य कात्यायनाश्वालायनौ द्वौ शिष्यौ स्तः । शौनकेन स्वयं तथा उभाभ्यां शिष्याभ्यां नैकानां ग्रन्थानां निर्माणं कृत्वा वेदानां उद्धारः कृतः । अतः शौनकं प्रति समग्रसंसारोऽयम् ऋणयुक्तोऽस्ति । महर्षि शौनकस्य समयः ८०० ई. पू. तः ६०० ई.पू. अनन्तरम् मन्यते ।

**तैत्तिरीयप्रातिशाख्यम्** – कृष्णयजुर्वेदस्य तैत्तिरीयशाखा सम्बन्धितोऽयं ग्रन्थः खण्डद्वये विभाजितः ।

प्रथमेखण्डे द्वादशाध्यायाः तथैव द्वितीयेऽपि । आहत्य चतुर्विंशतिः अध्यायाः सन्ति । विस्तारदृष्ट्या ग्रन्थोऽयम् ऋक्प्रातिशाख्यात् तथा वाजसनेयिप्रातिशाख्यात् लघुतां याति, किन्तु विषयविवेचनदृष्ट्या विस्तृतः प्रामाणिंकः च मन्यते। प्रातिशाख्येऽस्मिन् प्रथमेऽध्याये वर्णसमाम्नाय ह्रस्वदीर्घप्लुत, उदात्तादिस्वराः अपृक्त, इङ्ग्य आदि विषयाणां विवेचनम् अस्ति।

द्वितीयेऽध्याये शब्दोत्पत्तिः स्वरव्यञ्जनस्पर्शानुनासिकान्तः स्थोष्मादि वर्णानाम् उच्चारणम् तथा प्रकाराणां विवेचनं विस्तारितम् अस्ति ।

तृतीयेऽध्याये संहितापाठस्य, दीर्घस्वरस्य पदपाठे, ह्रस्वविधानं विहितम् ।

चतुर्थाध्याये प्रग्रहस्य विस्तृतं वर्णनं वर्णितम् ।

तथैव अवशिष्टाध्यायेषु संहितास्वरूपे, लोपे, वर्णागमे, जत्वे, षत्वे, सन्धिविषये, वाकारानुस्वार-अनुनासिकऽननुनासिक, स्वरितभेदे, उदात्तादौ, स्वरविवेचने, प्रथमस्वरेः तथा प्रयत्नादिविषयेषु विचारः विस्तृतः ।

तैत्तिरीयप्रातिशाख्ये तिस्रः शाखाः उपलब्धाः- यथा –

(१) माहिषेय कृता → पदक्रमसदनाख्या शाखा ।

(२) सोमाचार्य कृता → त्रिभाष्यरत्नम् शाखा ।

(३) गोपालयज्वाकृता → वैदिकाभरणम् शाखा ।

तेषु वैदिकाभरणशाखा अर्वाचीना गण्यते ।

**वाजसनेयिप्रातिशाख्यम् →** शुक्लयजुर्वेदस्य वाजसनेयि संहितायाः सम्बन्धे वाजसनेयिप्रातिशाख्यग्रन्थस्य रचना कात्यायनेन पुरा कृता । कात्यायनोऽयं नास्ति वररुचिः . अस्याध्ययनेन विज्ञायते यत् वाजसनेयि संहितायाः बाह्यस्वरूपं ऋग्वेदादेव विस्तारदृष्ट्या लध्वयं ग्रन्थः । ग्रन्थेऽस्मिन् अष्टाध्यायाः सन्ति । तत्र प्रथमेऽध्याये सूत्रेषु वर्णोत्पत्तिः उच्चारणविधिः, करणपारिभाषिकशब्दानां सविस्तरलक्षणं प्रतिपादितम् ।

द्वितीयेऽध्याये स्वरलक्षणं तथा नियमानां वर्णनं वर्णितम् । तथैव क्रमशः सन्धिनियमाः अवग्रहः, स्वरनियमाः, परिग्रहनियमाः, वर्णसमाम्नायवर्णानां देवता, अध्ययन-विधिः, पदचतुष्ट्यादिविविधविषयाणां वर्णनं वर्णितम् । प्रातिशाख्योपरि शाकटायनः, शाकल्यः, शौनकः, काश्यपः जातुकर्ण्यः, गार्ग्यः आदि पूर्वाचार्याणां मतमपि दरिदृश्यते।

**सामप्रातिशाख्यम्** → सामवेदसम्बन्धिता त्रिप्रातिशाख्योपलब्धिः भवति ।

(१) सामतन्त्रप्रातिशाख्यम् ।

(२) पुष्पसूत्रप्रातिशाख्यम् ।

(३) ऋक्तन्त्रप्रातिशाख्यम् ।

सामतन्त्रप्रातिशाख्यस्य रचयिता औद्व्रजिन एवं पुष्पसूत्रप्रार्तिशाख्यस्य रचयिता पुष्पऋषिः । सामवेदीय सर्वानुक्रमण्याः अनुसारं पुष्पसूत्रप्रातिशाख्यसूत्ररचयिता वररुचिः इति । तत्र आहत्य दशप्रपाठकाः सन्ति । अस्य सम्बन्ध गानसंहिताविषयः। तथा ग्रन्थेऽस्मिन् स्तोभविषयस्य विवेचनं कृतम् । तत्र मुख्यरूपेण वेदगानं तथा अरण्यगेयमानं साममन्त्रस्य ''ऊहन'' मन्त्रे प्रयोगः कयारीत्या भवेत्, तद् वर्णितम् अस्ति । तत्र प्रारम्भे चतुःप्रपाठके अजातशत्रोः व्याख्या नास्ति । पञ्चमपाठकादारभ्य व्याख्या विहिता ।

ऋक्तन्त्रप्रातिशाख्यस्य सम्बन्धः कौथुमशाखा अस्ति । अस्य कर्ता शाकटायनः । तत्र पञ्चप्रापाठकाः शतद्वयं सूत्राणि सन्ति । तत्र वर्णसमाम्नायेन सह वर्णोच्चारस्य नियमाः वर्मः, घोषः, अन्तः स्थः, अनुनासिकः, अभिनिश्वानम् संयोगः, अङ्गत्वविचारः कालनिरूपणं, वृत्तिनिरूपणम्, दीर्घः, गुरुः, प्लुतः तता उदात्तादिस्वराणां निधानं वर्णितम् अस्ति।

तत्र ग्रन्थेऽस्मिन् त्रयः प्रपाठकाः सन्ति । तस्मिन् स्वरसन्धिनियमाः, पदपाठस्य नियमाः प्रतिपादिताः सन्ति । ध्वनि नियमस्य तता पारिभाषिकशब्दानां विवेचनं तत्र नास्ति । डॉ. सूर्यकान्तस्य कथनम् अस्ति, यत् उभे द्वे प्रातिशाख्ये अथर्ववेदस्य शाखाद्वयस्य सम्बन्धिते ।

अनेन प्रत्येकवेदस्य विभिन्नप्रातिशाख्यस्य परिचयात्मकम् अध्ययान्तर्गतविषयाणां वर्णनं कृतम् अस्ति ।

तृतीयचतुर्थपञ्चमप्रपाठकेषु क्रमशः उदात्तश्रुतिविभक्तिलोपः, संहितासन्धिः, विसर्गः, सकारविधानम्, य, व, द, आदि वर्णलोपविधानम् आगमः, दीर्धाभावः, द्वित्वं, मूर्धन्यभावः, आदि विषयाणां वर्णनं वर्णितम् अस्ति । ग्रन्थोऽयं पाणिनेः पूर्वं विस्तृतः । अतः अष्टाध्याय्याम् अस्यप्रभावो दृग्गोचरः भवति ।

अथर्ववेदप्रातिशाख्यम् - अथर्ववेदसम्बधित द्वे प्रातिशाख्ये प्रकाशिते स्तः । विश्वबन्धुशास्त्रिणा पञ्जाबविश्वविद्यालय ग्रन्थमाला द्वारा १९२३ ई. वर्षे प्रकाशितम् । यस्य द्वितीयावृत्तिः १९४० ई. वर्षे डॉ. सूर्यकान्त द्वारा लाहोर तः प्रकाशिता । द्वितीयप्रकाशनग्रन्थः डॉ. ह्विटनी द्वारा १८६२ ई. वर्षे (शौनकीयाचतुरध्यायिका) नाम्ना सुप्रसिद्धः। तत्र चतुरध्यायाः सन्ति । तत्र प्रथमेऽध्याये ध्वनिः, एवं तस्य वर्गीकरणं, विसर्जनीयस्य अभिनिधानम् अक्षरः एवं तस्य मात्रा, वर्णविकार आगमादीनां विवेचनम् अस्ति ।

द्वितीयतृतीयचतुर्थाध्यायेषु क्रमशः, सन्धिविवेचनं, दीर्घविधानं, वर्णपरिवर्तनं स्वरसन्धिः, अवग्रहः, प्रगृह्यस्य, क्रमपाठः तस्यावश्यकता इत्यादि वर्णितम् ।

## शब्दार्थः

**संशयः** - शङ्का, **उद्भवति** - उत्पन्नम् भवति, **उपयुज्यते** - उपयोगः, **उपलभ्यते** - प्राप्तं भरति, **अन्तरम्** - मध्ये, **नैकाः** - अनेकाः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वेदानां ........................ अङ्गानि सन्ति । (षड्, चत्वारिः, पञ्च)

(२) मुखं ........................ स्मृतम् । (व्याकरणम्, शिक्षा, ज्योतिषम्)

(३) प्रातिशाख्यग्रन्थेऽपि ........................ ग्रन्थाः महत्वपूर्णाः सन्ति । (त्रय, चत्वारः, पञ्च)

(४) वेदेषु ........................ स्वराः सन्ति । (द्वौ, एकम्, त्रयः)

(५) वैदिकमन्त्राणामर्थज्ञानाय ........................ उपयुज्येत । (छन्दः, शिक्षा, निरुक्तम्)

२. **निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) भारतीयपरम्परायां कस्य अतीव महत्वं वर्तते?

(२) कति वेदाङ्गानि सन्ति?

(३) सर्वप्रथमम् ऋग्वेदप्रातिशाख्यसूत्राणां संस्करणं केन प्रस्थापितम्?

(४) तैत्तिरीयप्रातिशाख्यस्य प्रथमखण्डे कति अध्यायाः सन्ति?

(५) शुक्लयजुर्वेदवाजसनेयप्रातिशाख्यस्य रचयिता कः वर्तते?

(६) वाजसनोयप्रातिशाख्ये कति अध्यायाः सन्ति?

(७) अथर्ववेदप्रातिशाख्ये कति अध्यायाः सन्ति?

३. **निम्नाङ्कितानां प्रश्नानां विस्तृतम् उत्तरं ददातु?**

(१) प्रातिशाख्यस्य परिचयं वर्णयत ।

(२) ऋग्वेदप्रातिशाख्यस्य विस्तारपूर्वक परिचयं लिखत ।

(३) वाजसनेयिप्रातिशाख्यस्य परिचयं ददातु ।

(४) सामप्रातिशाख्यस्य परिचयं वर्णयत ।

४. **शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) षडङ्गानि
(२) शब्दानाम्
(३) छात्राः
(४) भावेन
(५) वेदस्य

५. **क्रियापदानां परिचयं लिखत ।**

(१) भजते
(२) भवति
(३) कुर्वन्ति
(४) वर्तते
(५) मन्यते

६. **सन्धिविच्छेदं कुरुत ।**

(१) वेदाङ्गानाम्
(२) अत्यधिकावश्यकता
(३) शुद्धोच्चारणपूर्वकम्
(४) गुरोर्मुखात्
(५) कालानन्तरम्

७. **सन्धिमेलनं कुरुत ।**

(१) षड् + अङ्गेषु
(२) ग्रन्थे + अस्मिन्
(३) उदात + अनुदात्त + स्वरिताः
(४) शुद्ध + उच्चारण + अर्थम्
(५) ग्रन्थः + अयम्

**छात्र-प्रवृत्तिः**

- छात्राः प्रातिशाख्यस्य वर्ण्यविषयाणां परस्परचर्चां कृत्वा उदात्तादिस्वराणामुपरि निबन्धलेखनं कुर्वन्तु ।

**विशिष्टज्ञानम्**

- मित्रस्य चक्षुषा समीक्षामहे । (यजु. ३६/१८)
  भगवतः सूर्यस्य किरगाः मित्रभूताः, तथा वयं मानवाः
  परस्परसम्यक् मित्रवत् पश्यामः ।

●

| ५ | # कात्यायनश्रौतसूत्रपरिचयः |
|---|---|

**प्रस्तावना**

वेदपुरुषस्य अङ्गस्थानीय शास्त्राणां श्रोतसूत्राणां स्थानं महत्वपूर्णं वर्तते । प्राप्तश्रौतसूत्रेषु कात्यायनश्रौतसूत्र महत्वपूर्णं वर्तते ।



**( श्रौतसूत्रकर्तुः महर्षि कात्यायन ऋषिः )**

वेदाङ्गेषु कल्पसाहित्यस्य महत्वम् अत्यधिकं वर्तते । यागीयप्रक्रियाणां विस्तृतम् एवं प्रौढस्वरूपं ब्राह्मणसाहित्ये सर्वोच्चस्थाने आसीत् । तत् साहित्यं क्रमबद्धं तथा शैलीयुक्तं भवेद् इति अत्यन्तम् आवश्यकम् आसीत् । तदा ग्रन्थनिर्माणस्य प्रवृत्तिसूत्रशैल्या अस्य साहित्यस्य रचना अभवत् । ततः कालान्तरे कल्पसाहित्यरूपे ख्यातम् अभवत् । ऋग्वेदप्रातिशाख्यस्य वर्गद्वयं श्रीविष्णुमित्रेण कल्पसाहित्यस्य अर्थः अनेन प्रकारेण प्रदर्शितः अस्ति -

''कल्पो वेदविहितानां कर्मणानुपूर्व्येण कल्पनाशास्त्रम्''

अर्थात् - वेद-विहित कर्मणां क्रमानुसारं व्यवस्थितं शास्त्रं कल्पशास्त्रं कथ्यते।

कल्पसूत्राणां ब्राह्मणैः एवम् आरण्यकग्रन्थैः सह सम्बन्धः वर्तते । अतः प्राचीनतायाः विषयः निर्विवादितः । ऐतरेय आरण्यकग्रन्थे सूत्ररूपेण सुव्यवस्थितवचनैः वचांसि प्राप्यन्ते । परम्परानुसारेण शौनक - आश्वलायनाभ्याम् एव विरचितः इति मन्यते । ऐतिहासिकं तथ्यमिदं यत् प्राचीनकाले यज्ञ एव भारतीयानां धार्मिककर्मम् आसीत् । एवं यज्ञसम्बन्धी विधानं विस्तारपूर्वकं ब्राह्मण-ग्रन्थेषु प्रतिपादितम् अस्ति । तस्य संक्षिप्तम् एवं व्यवहारोपयोगी स्वरूपं इत्यनयोः कृते ग्रन्थानाम् आवश्यकता अभवत् । आवश्यकतायाः पूर्तये वेदवेदानां प्रत्येकशाखायाः कल्पसूत्राणां निर्माणं पूर्णं कृतम् । विषयविवेचनदृष्ट्या कल्पसूत्राणां चतुर्षु भागेषु विभाजनं कृतम् । यथा -

(१) श्रौतसूत्रम् ।

(२) गृह्यसूत्रम् ।

(३) धर्मसूत्रम् ।

(४) शुल्बसूत्रम् ।

**श्रौतसूत्रम् -**

श्रौतसूत्रे श्रौताग्नौ जायमानानां यज्ञानुष्ठानानां क्रमानुसारम् एवं तात्विकवर्णनम् अस्ति । श्रौतसूत्राणां विषयः अतीव गम्भीरः अस्ति । दर्शपूर्णमास-आग्रायवेष्टिः निरुढपशुसत्रं गवामयनं वाजपेयः सौत्रामणिः इत्यादि श्रुतिप्रतिपादितमहत्वपूर्णयज्ञानां क्रमबद्धंवर्णनं दुष्करमस्ति । पूर्वेकथितं यज्ञेषु केचनयज्ञाः द्विदिनं यावत् केचन यज्ञाः वर्षपर्यन्तं तथा केचन यज्ञाः निरन्तरं भवन्ति । यथा सत्रयज्ञद्वादशदिनं यावत् भवति । श्रुत्युक्तः यज्ञविशेषः गवामयनम् एकवर्षं यावत् भवति ''अहीनयागः'' एकादशदिनं यावत् भवति, यागीय प्रक्रियानां व्याख्यानुसारेण श्रौतसूत्रविशिष्टः ग्रन्थः वर्तते। साम्प्रतकाले श्रौतसूत्रप्रचारः जातः, किन्तु एषां सूत्रग्रन्थानां परिशीलनेन प्राच्यकालीन धार्मिकग्रन्थानाम् एवं मर्यादानां सुस्पष्ट परिज्ञानं कर्तुं शक्यते।

**वेदानुसारं श्रौतसूत्राणि**

| | वेदाः | | श्रौतसूत्राणि |
|---|---|---|---|
| (१) | ऋग्वेदः | - | शांखायन, आश्वलायन |
| (२) | शुक्लयजुर्वेदः | - | कात्यायन |
| (३) | कृष्णयजुर्वेदः | - | बौधायन, वाधूल, मानक भारद्वाज, आपस्तम्ब, काठक, वैखानस, सत्याषाढ, वाराह |
| (४) | सामवेदः | - | आर्षेय, लाट्यायन, द्राह्यायण, जैमिनीय |
| (५) | अथर्ववेदः | - | वैतान |

**आचार्यकात्यायनः -**

श्रौतसूत्रकर्तुः महर्षि कात्यायनस्य परिचयः पुराणादौ प्राप्यते । पुराणानामवगाहनेन ज्ञायते याज्ञवल्क्यस्य पुत्रः कात्यायनो बभूव । याज्ञवल्क्यस्य द्वौ पत्न्यौ स्तः, मैत्रेयी कात्यायनी च । मैत्रेयी ब्रह्मवादिनी आसीत् इति बृहदारण्यकोपनिषदि परिगीतं तत्रैव कात्यायनी संसारधर्मपालयित्री आसीत्, परन्तु याज्ञवल्क्यस्य अतिप्रियतमा मैत्रेयी भवति स्म, तस्मात् कात्यायनी विह्वलाचिन्तान्विता च भूत्वा जैमिनेः पत्नीं शाण्डिलीं निवेदितवती । शाण्डिली सकलं वृत्तान्तं ज्ञात्वा अनुष्ठानमेकं दत्तवती। सा कात्यायनी वर्षपर्यन्तं गौरीव्रतं चकार । तद् व्रतस्य प्रभावेण एकः पुत्रः उत्पन्नो बभूव । स एव महर्षिः कात्यायनः लोके प्रसिद्धः ।

महर्षिकात्यायनः शुक्लयजुर्वेदस्य पारंगतो विद्वान् बभूव । श्रौतविद्यायाश्चाद्वितीयो ज्ञाता । आचार्यस्य अनेकानि ग्रन्थरत्नानि श्रूयन्ते । पारस्करगृह्यसूत्रस्य रचनाकारः कात्यायनो मन्यते । समालोचकानां मते कात्यायनस्यापरं नाम पारस्करः आसीत् । कात्यायनस्य पुत्रः वररुचिः शास्त्रेषु प्रसिद्धः आसीत्। ऋग्वेदादौ च आचार्यस्य ग्रन्थाः सन्ति । कात्यायनेनैकतीर्थमपि स्थापितं तच्चवास्तुपदं नाम ।

**उक्तं च स्कन्दपुराणे -**

**कृत्वोपनिषदं चारु वेदार्थैः सफलैर्युतम् ।**
**जनकाय नरेन्द्राय, व्याख्याय च ततः परम् ।**
**कात्यायनं सुतं प्राप्य, वेदसूत्रस्य कारकम् ॥**

संस्कृतवाङ्मये द्वौ कात्यायननामधेयौ प्रसिद्धौ आचार्यौ वेदशाखाप्रवर्तकौ परं कात्यायनः श्रौतसूत्रकारात् भिन्नः प्रतीयते। पाणिनीयव्याकरणस्य वार्तिककारः कात्यायनः उभाभ्यां कात्यायनाभ्यां भिन्न एव आसीत् ।

**कात्यायनश्रौतसूत्रम्** -

शुक्लयजुर्वेदस्यैकमेव कात्यायनश्रौतसूत्रं विद्यते । औदीच्यानां परम्परा कात्यायनीयास्ति । अत्र श्रौतसूत्रस्य प्रमुखं कर्म आध्वर्यवकार्यं वर्तते । श्रौतमध्ये यदि कुत्रचित् संदेहो जायते, तत्र विषयस्य यथार्थज्ञानं कात्यायनेन क्रियते । अन्येषामपि ऋत्विजां कर्म ग्रन्थेऽस्मिन् प्रतिपादितम् तथापि अध्वर्योः कर्मणः प्रामुख्यं दृश्यते । प्राचीनकालादेव श्रौतस्यानुष्ठानकर्त्तारः विरलाः केचन सन्ति । अनेकत्र लुप्तेयं परम्परा विभाति अतः सन्देहकर्त्तारः तर्ककर्तारः मन्ये विलुप्ताः एव ।

कात्यायनश्रौतसूत्रे षड्विंशतिः अध्यायाः सन्ति । अध्यायेषु कण्डिकाः तन्मध्ये च सूत्राणि विलसन्ति । ग्रन्थेऽस्मिन् (५८९७) सप्तनवत्युत्तराष्टशताधिकपञ्चसहस्राणि सूत्राणि सन्ति ।

→ **प्रथमाध्यायः** परिभाषा प्रकरणं वर्तते । अधिकारमीमांसयागस्वरूपनिरूपणं मन्त्रलक्षणं काम्येष्टीनां मध्ये प्रतिनिधिः द्रव्यविचारः, श्रुत्यादिषट् प्रमाणानि, पुरोडाशानां निर्माणम्, आज्यग्रहणम् अवतंशनाशे कर्ममीमांसा, सोमक्रयणद्रव्याणां समुच्चयो विकल्पो वा, स्विष्टकृत्कर्म अन्ये च विभाषाः गुम्फिताः ।

→ **द्वितीयेऽध्याये** दर्शपूर्णमासेष्टिः वर्णिता । यजमानकर्मनिरूपणपूर्वकं ब्रह्मकर्म च विस्तरेण निगदितम् । पूर्णमासयागस्य समग्रो विधिः सूत्रकारेण निर्दिष्टः ।

→ **तृतीयेऽध्याये** सामिधेन्यनुवाचनं प्रोक्तम् । प्रयाजानां परिचयः, जुह्वादीनां स्थापनम्, अनुयाजत्रयकथनं, इडाविभागः, प्राशित्रावदानं, अन्वाहार्यवाचनं, परिधानां स्थापनम्, आशीर्वचनं, बर्हिहोमः, व्रतविसर्गः, ब्राह्मणानां प्रीणनञ्च प्रतिपादितम्।

→ **चतुर्थेऽध्याये** अमावस्यां पिण्डपितृयज्ञः, दक्षिणाग्नौ चरूश्रयणं पिण्डदानं तथा पितृयागस्य सम्पूर्णकृत्यं, वत्सापाकरणं, तिसृणां गवां दोहनं, सान्नाय्ययागः आधानकालः, आग्रायणेष्टिः दाक्षायणयज्ञः, अग्न्यागारनिर्माणं आधानम्, पुनराधानम्, अग्निहोत्रम् च वर्णितम् ।

→ **पञ्चमेऽध्याये** चातुर्मास्ययागः, वेदिनिर्माणम्, अवभृथेष्टिः, दर्विहोमः, मित्रविन्देष्टिः च वर्णिताः ।

→ **षष्ठेऽध्याये** निरुढपशुबन्धः, यूपस्य निर्माणं, यूपपरिमाणभेदाः, पशुविशंसनम्, पशोः संस्कारः, वपाश्रमणं, वपायागः, पृषदाज्यग्रहणम्, दर्विहोमप्रभृतिविषयाः विस्तरेण वर्णिताः ।

→ **सप्तमे** सोमयागः, ऋत्विग्वरणम्, शालानिर्माणम्, यूपच्छेदनम्, दीक्षाप्रकारः, सञ्चरनियमः, पत्न्याः शालाप्रवेशः, कृष्णाजिनदीक्षा, मेखलानियमः, सोमक्रयः, क्रयणद्रव्याणि, राजासन्दी, सुब्रमव्याह्वानं, च प्रतिपादितम् ।

→ **अष्टमे** सोमयागस्य विशिष्टो नियमः, पशुसंज्ञपनम्, यूपमीमांसा, वसतीवरीनां ग्रहणं, सोमसंरक्षणं च विहितम् ।

→ **नवमे** सोमोपस्थानम्, ग्रहपात्राणि, चमसस्थापनम्, सोमाभिषवः, उपांशुग्रहाः, सवनत्रयकथनम्, सोमयागसम्बन्धिनः अन्ये विषयाश्चात्र संकलिताः ।

→ **दशमे** च सोमयागस्य सर्वे विषयाः सूत्रमाध्यमेन प्रतिपादिताः ।

→ **एकादशे** ज्योतिष्टोमयागस्योपक्रमस्य प्रारम्भः ।

→ **द्वादशे** ज्योतिष्टोमभेदाः सत्रलक्षणम्, सत्रे ये यजमानाः ते एव ऋत्विजः, सत्रे शालानिर्माणम्, सत्रस्य काम्यत्वकथनं च प्रतिपादितम् ।

→ **त्रयोदशे** गवामयनं प्रोक्तम् ।

→ **चतुर्दशे** वाजपेययागः प्रतिपादितः ।

→ **पञ्चदशे** राजसूययागः, चरकसौत्रामणी प्रयोगः च ।

→ **षोडशे** चयनयागः, उखासम्भरणम्, उखाभेदः, चयनस्य, नित्यता च वर्णिता ।

→ **सप्तदशे** - चयनयागस्य विस्तरेण वर्णनं प्राप्यते ।

→ **अष्टादशे** शतरुद्रीयहोमः वर्तते ।

→ **एकोनविंशे** सौत्रामणीयागः, अधिकारनिरूपणम्, सौत्रामण्याः विधिश्च ।

→ **विंशे** अश्वमेधयागस्य साङ्गं निरूपणं वर्तते ।

→ **एकविंशे** पुरुषमेधयागस्य सम्पूर्णं चित्रणं कृतम् ।

→ **द्वाविंशे** एकाहनिरूपणम्, एकाहभेदाः, विश्वजिद् यागः, आभिजिद् यागः, सर्वजिद् यागः, श्येनयागः, व्रात्यस्तोमयागः, मरणकामस्य सर्वस्वारयागः, अग्न्याधानम्, दर्शपूर्णमास, चातुर्मास्य, आग्रयण, पशुबन्धप्रकृतियागानां वर्णनं कृतम् ।

→ **त्रयोविंशे** अहीनयागानां भेदप्रदर्शनपूर्वकप्रतिपादनम् ।

→ **चतुर्विंशे** सत्रयागानां विस्तरेणोल्लेखः कृतः ।

→ **पञ्चविंशे** प्रायश्चित्तप्रकरणं प्राप्यते । अस्मिन् श्रौतयागे प्रयोगकाले यत्र कुत्रापि स्खलनं भवति, समेषां प्रायश्चित्तं ग्रन्थकारेण कथितम् ।

अन्तिमे षड्विंशे महावीरसम्भरणम्, प्रवर्ग्यानुष्ठानं च सम्यक् निरूपितम् ।

श्रौतसूत्रे यद्यपि श्रौतयागानां प्रामुख्येन वर्णनं वर्तते । किन्तु ग्रन्थस्याध्ययनेन श्रौतस्य सम्पूर्णसामाजिकं विवरणं पाठकानां समक्षमायाति । श्रौतविज्ञानं विस्तृतम् उन्नतं च प्रतीयते । दरिद्रो जनः श्रौतयागस्य सम्पादनं कदाचिदपि कर्तुं न शक्नोति। यतोहि श्रौते गोहिरण्यादिद्रव्याणाञ्च पदे पदे प्रयोजनं भवति । अतः शास्त्रज्ञानेन साकं श्रौतकर्मणि धनस्य विशेषेण महत्वं दरीदृश्यते ।

काण्वमाध्यन्दिनशाखयोः एकमेव श्रौतसूत्रं कात्यायनश्रौतसूत्रमस्ति । ग्रन्थस्य रचनाकारः कात्यायनः वर्तते । यो हि वाजसनेयिप्रातिशाख्यस्य अपि कर्ताऽस्ति ।

कात्यायनश्रौतसूत्रे षड्विंशतिः अध्यायाः सन्ति । अध्यायेषु कण्डिकाः सन्ति । सम्पूर्णे ग्रन्थे (५८९७) सप्तनवत्युत्तराष्टशताधिकपञ्चसहस्राणि सूत्राणि विद्यन्ते ।

प्रथमाध्यायः परिभाषाप्रकरणं वर्तते । प्रकरणेऽस्मिन् अधिकारनिरूपणम्, अग्निस्थापनम्, अग्नेः प्रविभागः, आज्यधर्माः, पात्राणां परिचयः प्रतिनिधिद्रव्यविचारः, सत्र-मीमांसा आदि विषयाः अत्र विवेचिताः । प्रकरणमिदं सम्पूर्णस्य ग्रन्थस्याधारभूतं वर्तते । पूर्वमीमांसायाः सूत्राण्यपि परिभाषाप्रकरणे पठ्यन्ते, अनेन इदं सिद्ध्यति । श्रौतग्रन्थस्य अध्ययनात् प्राक् पूर्वमीमांसायाः सम्यक् अध्ययनं पाठकैरवश्यं करणीयमन्यथा श्रौते पदे पदे सन्देहः उत्पद्यते । अस्यां भूमिकायाम् अधिकारविषये अग्रे विस्तरेण प्रतिपादनं करिष्ये । तत्र प्रमाणानां बाहुल्यं भवेत् ।

श्रौतयागे प्रामुख्येन त्रयोऽग्नयः भवन्ति, ते च गार्हपत्याग्निः, आहवनीयाग्निः दक्षिणाग्निश्च । पञ्चाग्निपक्षे सभ्याग्निः आवसथ्याग्निश्च द्वौ वर्धेते ।

श्रौतसूत्रमध्ये ये यागाः प्रपञ्चिताः प्रायेण सर्वे नित्ययागाः काम्याश्च विद्यन्ते । नित्यकर्म सर्वतोभावेनावश्यमनुष्ठेयं भवति । तत्रैव काम्यकर्म अनुष्ठातुः कामनानुसारं प्रवर्तते ।

इतिहासकारः पूर्वमीमांसायाः सूत्रं कात्यायनश्रौतसूत्रे पठित्वा कात्यायनम् अर्वाचीनं जैमिनीञ्च प्राचीनं स्वीकरोति। तत्र कश्चिदाक्षेपः वर्तते । प्रातिशाख्ये पाणिनीयव्याकरणस्य सूत्रं कदाचित् प्राप्यते । परन्तु तत् सूत्रं प्रातिशाख्यकर्तारं पाणिनेः अनन्तरम् उत वा नवीनं न साधयति । अपितु प्रतिशाख्यं पाणिनीयव्याकरणात् प्राचीनतरं मन्यते । तद्वत् अत्रापि ज्ञेयं कात्यायनश्रौतसूत्रे यस्मिन् प्रकरणे पूर्वमीमांसायाः सूत्रं पठ्यते, तत् प्रकरणं श्रौतसूत्रे सम्पूर्णं व्यवस्थितं न प्रतिभाति दिग्दर्शनमात्रमेव । तत्रैव जैमिनीतन्त्रे तत् प्रकरणं सम्यग्व्यवस्थितं विस्तरेण च विवेचनमस्ति । तस्मादपि जैमिनीयतन्त्रात् कात्यायनश्रौतसूत्रं नवीनं वर्तते ।

पुनश्च जैमिनीयतन्त्रं साक्षात् वेदाङ्गे न प्रतिष्ठितमस्ति, वेदोपकारमस्ति तत्र न सन्देहः । तत्रैव कात्यायनश्रौतसूत्रं वेदस्य साक्षात् अङ्गत्वेन प्रसिद्धम् । कल्पत्वात् वेदाङ्गमस्य सिद्ध्यति । अतः वेदाङ्गानामध्ययनं वेदेन सहैवकर्त्तव्यम् उक्तं च महाभाष्ये -

''ब्राह्मणेन निष्कारणो धर्मः षडङ्गोवेदोऽध्येयो ज्ञेयश्च ।''

अतः वयं कात्यायनश्रौतसूत्रं जैमिनीयतन्त्रात् प्राचीनं मन्यामहे । यत्किमपि भवेत्, ग्रन्थैः स्वकीयः विचारः प्रस्तुतः। वेदस्य प्रस्थानत्रय्यां श्रौतसूत्रम् अन्तिम् सोपानं वर्तते । अत्र मन्त्रः प्रथमं सोपानं वर्तते, ब्राह्मणम् द्वितीयसोपानम् अस्ति । सर्वप्रथमम् ऋषिभिः परमतत्त्वस्य दर्शनं कृतम् । तस्मिन् काले ऋषीणां समक्षे एका मुख्या समस्या आसीत्, अलौकिकविषयाणां लौकिकबुद्धिसम्पन्नेभ्यः शिष्येभ्यः कयारीत्या उपदेशं दातुं शक्नुमः इति, यदा दिव्यभाषायाम् उपदेशं ददाति, तदा शिष्यगणानां बोधो न जायते फलतः उपदेशः व्यर्थरूपो भविष्यति । तस्मात् कारणात् ऋषयः स्वस्योपदेशं तत्कालीनप्रचलितभाषामाध्यमेन सरलतया शिष्यान् बोधयन्ति । तथा प्रत्येक द्रव्यः देवतारूपः इति कर्तव्यतादिनां बोधकाः ग्रन्थाः सूत्रग्रन्थाः वर्तन्ते । विद्वांसः अस्य ग्रन्थस्य लोकप्रियतां दृष्ट्वा विलक्षणलक्षणानामपि रचनां स्वीचक्रुः ।

**अल्पाक्षरमसन्दिग्धं, सारवद्विश्वतो मुखम् ।**

**अस्तोभमनवद्यं च, सूत्रं सूत्रविदो विदुः ॥**

येन प्रकारेण सूत्रं वैदिकाध्ययनस्य क्षेत्रम् अनेन प्रकारेण सम्मृद्धम् भवति । तेन अध्येता अनेन प्रकारेण उपकृतः भवति । शास्त्रकाराः सूत्रस्य षड् भेदाः मन्यन्ते । यथा -

**संज्ञा च परिभाषा च विधिर्नियम एव च ।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥**

कात्यायनश्रौतसूत्राणि इमानि षड्विधानि सर्वाणि सूत्राणि उपलब्धानि भवन्ति ।

## शब्दार्थः

**ख्यातः** - उल्लेखः, **स्थापितम्** - प्रतिष्ठापनम्, **प्रमुखम्** - मुख्यम् ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) यागीयप्रक्रियानां विस्तृतम् एवं प्रौढस्वरूपं ........................ शास्त्रे वर्तते । (वेद, ब्राह्मण, व्याकरण)

(२) कल्पसूत्राणां ........................ भागेषु विभाजनं कृतम् । (एकम्, पञ्च, चतुर्षु)

(३) कात्यायनश्रौतसूत्रस्य रचयिता ........................ । (याज्ञवल्क्यः, कात्यायनः, व्यासः)

(४) याज्ञवल्क्यस्य पुत्रः ........................ । (पाराशरः, कात्यायनः, सायणाचार्यः)

(५) याज्ञवल्क्यस्य ........................ पत्न्यौ स्तः । (एका, तिस्रः, द्वे)

(६) शुक्लयजुर्वेदस्य ........................ श्रौतसूत्रं वर्तते । (कात्यायन, याज्ञवल्क्य, पारस्कार)

(७) कात्यायनश्रौतसूत्रे ........................ अध्यायाः सन्ति । (विंशतिः, द्वादश, षड्विंशतिः)

(८) कात्यायनश्रौतसूत्रे ........................ सूत्राणि सन्ति । (५६८७, ५३२१, ५८९७)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) कः शुक्लयजुर्वेदस्य पारङ्गतो विद्वान् बभूव?

(२) पारस्करगृह्यसूत्रस्य रचनाकारः कः वर्तते?

(३) कात्यायनश्रौतसूत्रे कति अध्यायाः सन्ति ?

(४) कात्यायनश्रौतसूत्रस्य प्रथमाध्याये किं प्रकरणं वर्तते ?

(५) वेदाङ्गानि कति सन्ति ? कानि च तानि ?

**३. निम्नाङ्कितानां प्रश्नानां विस्तृतम् उत्तरं ददातु ।**

(१) आचार्यकात्यायनस्य परिचयं वर्णयतु ।

(२) वेदाङ्गेषु कल्पसूत्रस्य महत्वं लिखत ।

**४. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) वेदाङ्गेषु

(२) ग्रन्थानाम्

(३) याज्ञवल्क्यस्य

(४) सूत्राणि

(५) अहम्

**५. क्रियापदानां परिचयं लिखत ।**

(१) बभूव

(२) चकार

(३) प्राप्यते

(४) विलसन्ति

(५) क्रियते

**६. सन्धिविच्छेदं कुरुत ।**

(१) अतोऽहम्

(२) यद्यपि

(३) यतोहि

**७. सन्धिमेलनं कुरुत ।**

(१) अल्प + अक्षरम्

(२) वेद + अङ्गेषु

(३) सर्व + उच्चः

(४) व्याख्या + अनुसारेण

(५) पुराणानाम् + अवगाहनेन

**छात्र-प्रवृत्तिः**

- श्रौतयागसूत्राणां सूचिनिर्माणं कुर्वन्तु ?

**विशिष्टज्ञानम्**

- उच्छ्रायस्व महते सौभगाय । (ऋग्. ३/८/२)
  बृहते ऐश्वर्याय अस्मान् उद्धारय ।

# ६ याज्ञवल्क्यशिक्षावर्णादिविचारः

**प्रस्तावना**

भारतीयपरम्परायां वेदस्य सृष्टिस्तित्वकालात् एव परमं महत्त्वं जातम्, यच्च अद्यावधि वर्तते, अनन्तरञ्च स्थास्यति। अस्य एकैकम् अक्षरं प्राचीनकालात् एव परमपावनम्, परमप्रामाणिकं फलं च परमश्रद्धेयं वर्तते । 'वेदाः स्थानानि विद्याया' इति सकलविद्यास्थानतया स्मृतो ज्ञानार्थकाद् विद् धातोर्निष्पन्नोऽयं वेद शब्दो ज्ञानराशेर्वाचकः । वेदभाष्यकारसायणाचार्येण सम्यक् निगदितम् -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**
**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥**

समस्तस्य संस्कृतवाङ्मयस्य प्रत्यक्षतः अप्रत्यक्षतः वा उपजीव्यं वेदवाङ्मयं वर्तते ।

वेदानां सम्यगर्थावबोधनाय वेदाङ्गानि प्रवृत्तानि तानि षट् वेदाङ्गानि ख्यातानि । तेषां गणना पाणिनीय-शिक्षायाम् एवं लभ्यते -

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां च यः ।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥**
**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥**

अनेन प्रमाणेनायमर्थः सिद्ध्यति यत् शिक्षाशास्त्रं वेदाङ्गेषु षट्सु प्रथमं स्थानं बिभर्तीति । यथा वैदिकविधीनां सम्पादनार्थं ब्राह्मणग्रन्था उपयुज्यन्ते तथैवोच्चारणप्रयोजनेन शिक्षाया उपयोगो वाञ्छ्यते । शिक्षा स्वरवर्णाद्युच्चारणानि केन प्रकारेण कर्तव्यानीत्येतस्मिन् विषये उपदिशति । सायणाचार्येणोक्तम् ऋग्वेदभाष्यभूमिकायाम् - स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षेति । वेदपाठविधौ शुद्धमुच्चारणं स्वरक्रिया च योग्यरीत्या काम्येते । अशुद्धोच्चारणयुक्तो भ्रष्टस्वरश्च वेदपाठो महद्दुष्फलं जनयति । स च परमहानिकृद् भवति । यज्ञयागोपासनादिकं यत् कार्यमिष्टलाभाय क्रियते तस्मादिष्टलाभो न कदापि अशुद्धेन उच्चारणेन सञ्जायते । श्रूयते यत् पुरा इन्द्रशत्रुवर्धस्व इत्येतन्मन्त्रस्य अशुद्धोच्चारणं कृतमभूत् तेन यजमानं प्रति तदनिष्टकारकमसिद्ध्यत । अस्मिन्विषये पाणिनीयशिक्षायाम् प्रख्यातः श्लोकः वर्तते यत्

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**

विभिन्नानां वेदानां विभिन्नाः शिक्षाग्रन्थाः प्राप्यन्ते । ऋग्वेदस्य पाणिनीयशिक्षा, स्वरव्यञ्जनशिक्षा समानशिक्षा च। शुक्लयजुर्वेदस्य तिस्रः मुख्याशिक्षाः यथा - याज्ञवल्क्यशिक्षा, वासिष्ठीशिक्षा कात्यायनीशिक्षा च । आसु सर्वासु शिक्षासु याज्ञवल्यप्रणीता याज्ञवल्क्यशिक्षा श्रेष्ठेति मन्यते ।

प्रस्तुते पाठे याज्ञवल्क्यशिक्षायां स्वरादीनां वर्णविचारःनिरूपितः । पाठेऽस्मिन् वर्णानां जातिवर्णनम् देवतावर्णनम् लिङ्गवर्णनम्, सन्धिभेदवर्णनम्, पदानां च गोत्रवर्णनम्, रूपवर्णनं च प्राधान्येन विवेचितं वर्तते । अस्याः शिक्षायाः सम्बन्धः शुक्लयजुर्वेदीयवाजसनेयी-शाखया सह वर्तते ।

---

## वर्णाः किं वर्णदैवतलिङ्गाः ? इत्युपस्थापनम्

**स्वराः । स्पर्शान्तस्थोष्माणः । कण्ठ्य-जिह्वामूलीय-तालव्य-मूर्द्धन्य-दन्त्योष्ठ्य-यमानुस्वार-विसर्जनीयोपध्मानीय-नासिक्यानुनासिक्यरङ्गाः । नामाऽऽख्यातोपसर्ग-निपाताश्च किंवर्णदैवतलिङ्गाः ॥१॥**

**सरलार्थः** स्वराः (अकारादयो ह्रस्व-दीर्घ-प्लुताः), स्पर्शाः (कादयो मावसानाः), अन्तःस्थाः (य-व-र-लाः), ऊष्माणः

(श-ष-स-हा:), कण्ठ्य: (अ-कु-ह-विसर्जनीया: कण्ठस्थानीया:), जिह्वामूलीय: ᳵक ᳵख इति (कखाभ्यां प्रागर्ध-विसर्गसदृश:), तालव्या: (इ-चु-य-शास्तालुस्थानीया:), मूर्धन्या: (ऋ-टु-र-षा मूर्धस्थानीया:), दन्त्या: (लृ-तु-ल-सा दन्तस्थानीया:), ओष्ठ्या: (उ-पूपध्मानीया ओष्ठस्थानीया:), यमा: (कुँ-खुँ-गुँ-घुँ-इत्यादयोऽपञ्चमैरादौ वक्ष्यमाणा: प्रतिवर्गं चत्वार:), अनुस्वार: ( • ), विसर्जनीय: (:), उपध्मानीय (ᳶप ᳶफ इति पफाभ्यां प्रागर्ध-विसर्ग-सदृश:), नासिक्या: (ञ-म-ङ-ण-ना: नासिकास्थानीया:), अनुनासिक्या: (मुख-सहित-नासिकयोच्चार्यमाणा अँकारादय:), रंग: (ꣳ, ꣴ - इति ह्रस्व-दीर्घ-विशिष्टानुस्वार:) इत्येते वर्णा:, नामानि (गवादय: संज्ञावाचका:) इत्येते च ये शब्दास्ते किंवर्णका:, किंदैवता:, किंलिङ्गकाश्च सन्तीति प्रश्ना: ॥१॥

## वर्णानां वर्णवर्णनम्

**तत्र स्वरा: शुक्ला: नानादैवत्या: । स्पर्शा: कृष्णा: । अन्त:स्था: कपिला: । ऊष्माणोऽरुणा:। यमा नीला:। अनुस्वार: पीत: । विसर्जनीय: श्वेत: । जिह्वामूलीयो रक्त: । उपध्मानीय: पीत: । नासिक्यो हरित: । अतिनीला अनुनासिक्या: । शबलो रंग: ॥२॥**

**सरलार्थ:** वर्ण-विचार-क्रमेऽकारादय: स्वरा: श्वेतवर्णा विविधदैवतस्वरूपाश्च सन्ति । कादयो मावसाना: स्पर्शा: कृष्णवर्णा: सन्ति । यवरला: अन्त:स्था: कपिलवर्णा: सन्ति । श-ष-स-हा ऊष्माणोऽरुणवर्णा: (ईषद्रक्ता:) । कुँ-खुँ-गुँ-घुँ-इत्यादयोऽपञ्चमैरादो वक्ष्यमाणा: प्रतिवर्गं चत्वारो यमा नीलवर्णा: । अनुस्वार: (अं-इत्यच: पर:) पीतवर्ण: । विसर्जनीय: (अ:-इत्यच: पर:) श्वेतवर्ण: । जिह्वामूलीय: (ᳵक ᳵख इति कखाभ्यां प्रागर्धविसर्गसदृश:) रक्तवर्ण: । उपध्मानीय: (ᳶप ᳶफ इति पफाभ्यां प्रागर्धविसर्गसदृश:) पीतवर्ण: । नासिक्य: (नासिकास्थानीयो ञ-म-ङ-ण-न-समूह:) हरितवर्ण: । अनुनासिक्या: (मुख-सहित-नासिकयोच्चार्यमाणा अँकारादाय:) अतिशयेन नीलवर्णा: । रंग: (ꣳ, ꣴ - इति ह्रस्व-दीर्घात्मकानुस्वार:) च चित्र-विचित्रवर्ण: वर्तत इति विज्ञेयम् ॥२॥

## वर्णानां दैवतवर्णनम्

**कण्ठ्या आग्नेया अकारादय: । जिह्वामूलीया: नैर्ऋत्या: ककारादय: । तालव्या: सोम्याश्चकारादय:। मूर्द्धन्या: वायव्याष्टकारादय: । दन्त्या: रौद्रास्तकारादय: । ओष्ठ्या आश्विना: पकारादय: । शेषा: वैश्वदेवा: यमादय: ॥३॥**

**सरलार्थ:** कण्ठस्थानीया अकारादयो वर्णा अग्निदैवतका भवन्ति । जिह्वामूलीया: ककारादयो निर्ऋतिदैवतका: । तालुस्थानीयाश्चकारादय: सोमदैवतका: । मूर्द्धास्थानीयाष्टकारादयो वायुदेवतासम्बन्धिन: । दन्तस्थानीयास्तकारादयो रुद्रदेवतासम्बन्धिन: । ओष्ठस्थानीया: पकारादयोऽश्विनि-कुमारदैवतका: । शेषा: (यमानुस्वार-नासिक्यानुनासिक्य-रङ्गा:) विश्वदेवदैवतका: सन्तीति वेदितव्यम् ॥३॥

**स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ।**
**द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपा: ॥४॥**

**सरलार्थ:** (अ, आ, आ३, ई, ई, ई३, उ, ऊ, ऊ३, ऋ, ॠ, ॠ३, लृ, लृ३, ए, ए३, ऐ, ऐ३, औ, औ३-इत्येते) वर्गाणाञ्च ये प्रथमा: (क, च, ट, त, प - इत्येते) वर्णा: सन्ति, ते ब्राह्मणा अवगन्तव्या: । वर्गाणां ये द्वितीया: (ख, छ, ठ, थ, फ - इत्येते), तृतीया: (ग, ज, ड, द, ब - इत्येते), चतुर्था: (घ, झ, ढ, ध, भ - इत्येते) च वर्णा: सन्ति, ते क्षत्रिया विज्ञेया: ॥४॥

**वर्गाणां पञ्चमा वैश्या अन्तस्थाश्च तथैव च ।**
**ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्तिता: ॥५॥**

**सरलार्थ:** वर्गाणां ये पञ्चमा: (ङ, ञ, ण, न, म - इत्येते) अन्त:स्था: (य, व, र, ल - इत्येते) च वर्णा: सन्ति, ते वैश्या: वेदितव्या: । य ऊष्माण: (श, ष, स - इत्येते), हकार: (ह-इत्ययम्) च वर्णा: सन्ति, ते शूद्रा एव निगदिता: ॥५॥

**शुक्लवर्णानि नामानि आख्याता रोहिता मताः ।**

**कपिलास्तूपसर्गाश्च कृष्णश्चैव निपातकाः ॥६॥**

**सरलार्थः** गवादीनि नामानि (प्रातिपदिकानि) श्वेत-वर्णानि कथ्यन्ते । भवत्यादय आख्याताः (धातवः) रोहित-वर्णा मन्यन्ते । प्रादयः उपसर्गाः कपिलवर्णा निगद्यन्ते । चादयो निपाताश्च कृष्णवर्णा उच्यन्ते ॥६॥

**भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते ।**

**वासिष्ठा उपसर्गश्च निपाताः काश्यपाः स्मृताः ॥७॥**

**सरलार्थः** गवादि प्रातिपदिकं (नाम) भार्गवं (भृगु-गोत्रीयम्) भाष्यते । भ्वादिक्रियापदं (आख्यातम्) भारद्वाजं भारद्वाजगोत्रं (भरद्वाजगोत्रीयम्) कथ्यते । प्रादयः उपसर्गा वासिष्ठाः (वसिष्ठगोत्रीयाः) अभिधीयन्ते । चादयो निपाताश्च काश्यपाः (कश्यपगोत्रीयाः) निगद्यन्ते ॥७॥

**सर्वन्तु सौम्यमाख्यातं नाम वायवमिष्यते ।**

**आग्नेयस्तूपसर्गः स्याद् निपातो वारुणः स्मृतः ॥८॥**

**सरलार्थः** गवादि समस्तं प्रातिपदिकं (नाम) वायव्यं (वा-देवता-सम्बन्धि) भाष्यते । भ्वादि क्रियापदं (आख्यातम्) सौम्यं (सोम-देवता-सम्बन्धि) कथ्यते । प्रादय उपसर्गा आग्नेयाः (अग्निदेवतासम्बन्धिनः) सन्ति । चादयो निपाताश्च वारुणाः (वरुण-देवता-सम्बन्धिनः) निगद्यन्ते ॥८॥

**आदित्यो मुनिभिः प्रोक्तः सर्वाक्षरगणस्य च ।**

**स्वरा विसर्जनीयाश्च यमाः पुँल्लिङ्गकाः स्मृताः ॥९॥**

**सरलार्थः** सर्वेषामक्षराणां तथा पादानां श्लोकस्थानां मन्त्रस्थानां वा देवता सूर्यो वर्तत इत्येतद् ऋषिभिः प्रोक्तमस्ति। स्वराः (अ, आ, आ१, इ, ई, ई३, उ, ऊ, ऊ३, ऋ, ॠ, ॠ३, लृ, लृ३, ए, ए३, ओ, ओ३, ऐ, ऐ३, औ, औ३-इत्येते) विसर्जनीयः (ः-इत्ययम्), यमाः (कुँ, खुँ, गुँ, घुँ - इत्येते) च पुँल्लिङ्गका अवगन्तव्याः ॥९॥

**प्रथमाश्च तथान्तःस्थाः स्त्रीलिङ्गाः परिकीर्तिताः ।**

**शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः ॥१०॥**

**सरलार्थः** वर्गाणां प्रथमाः (क, च, ट, त, प - इत्येते) अन्तःस्थेयाः (य, व, र, ल - इत्येते) च स्त्रीलिङ्गा विज्ञेयाः । अवशिष्टाक्षराणि च लिङ्गविवेचकैर्विद्वद्भिर्नपुसंकलिङ्गकानि स्वीक्रियन्ते ।

शेषाक्षरत्वेनात्र वर्गाणां द्वितीयतृतीयपञ्चमाक्षराणि, ऊ ष्माणः (श-ष-स-हाः), अनुस्वार- जिह्वामूलीयोपध्मानीय-नासिक्यानुनासिक्यरंगाश्च गृह्यन्ते । एतानि सर्वाणि नपुंसक-लिङ्गानि सन्ति ॥१०॥

## वर्णानां सन्धिभेदवर्णनम्

**सन्धिश्चतुर्विधो भवति । लोपागमविकाराः प्रकृतिभावश्चेति । तत्र लोपो यथा - अ॑यक्ष्माः मा, अय॒क्ष्मा मा (यजुः-१.१) । शततें॑जाः व्वायुः, श॒ततेजा व्वा॒युः (यजुः १.२४) । तिग्मतेजाः द्विषतः, ति॒ग्मतें॑जा द्वि॒ष॒तः (यजुः-१.२४) इति ॥११॥**

**आगमो यथा** - प्रत्यङ् सोमः, **प्रत्यङ्कसोम॒ः** (यजुः-१०.३१) । प्राङ् सोमः, **प्राङ्सोम॒ः** (यजुः-१९.३) । अस्मान् सीते, **अ॒स्मान्त्सीते** (यजुः-१२.७०) त्रीन् समुद्रान्, **त्रीन्त्स॑मु॒द्रा॒न्** (यजुः-१३.३१) इति ॥

**विकारो यथा** - आ इदम्, एदम् (यजुः-४.१) । आ इमे, एमें (यजुः - ३३.६०) । आ इष्ट्यः, एष्ट्यं॑ः (यजुः-१८.४३) प्र इषितः, प्रेषि॑तः (यजुः-२१.५१) इति ॥

**प्रकृतिभावो यथा** - आ॒शुः शिशानः, **आ॒शुः शिशा॑नः** (यजुः १७.३३) । युञ्जानः प्रतमम्, **युञ्जा॒नः प्र॑थ॒मम्** (यजुः - ११.१) अदितिः षोऽशाक्षरेण, **अदि॑तिः षोड॑शाक्षरेण** (यजुः - ९-३४) । इन्द्राग्नी आगतम्, **इन्द्रा॑ग्नी॒ आग॑तम्** (यजुः-७.११) । नमो अस्तु, **नमो॑अस्तु॒** (यजुः-१६.६४) इति ॥११॥

**सरलार्थः** द्वयोर्वर्णयोर्मेलनं सन्धिः कथ्यते । सोऽयं सन्धिश्चतुष्प्रकारको जायते । १. लोपः, २. आगमः, ३. विकारः, ४. प्रकृतिभावश्चेति ।

**१. लोपः**

वर्णस्यादर्शनं लोपः कथ्यते । पाणिनिनाप्युक्तम् - **अदर्शनं लोपः** (अष्टा. १.१.५९) यथा -

(क) अयक्ष्माः + मा = ''**अ॑य॒क्ष्मा मा**''

(ख) शततेजाः + व्वायुः = ''**श॒तते॑या व्वायुः**''

(ग) तिग्मतेजाः + द्विषत = ''**ति॒ग्मते॑या द्विष॒तः**''

इत्यत्र सर्वत्र ''हलि सर्वेषाम्'' (अष्टा. ८.३.२२) इत्यनेन विसर्जनीयस्य लोपो जातः ।

**२. आगमः**

नूतन-वर्णानामागमनमागमः कथ्यते । आगमो मित्रवद् भवति । यथा -

(क) प्रत्यङ् + सोमः = ''**प्र॒त्यङ्क्सोम॒ः**''

(ख) प्राङ् + सोमः = ''**प्राङ्क्सोमः**''

इत्यत्रोभयत्र ''ङ्णोः कुँक्-टुँक् शरि'' (अष्टा. ८.३.२८) इत्यनेन कवर्णागमो (कुँक्) जातः ।

**३. विकारः**

अस्मान् + सीते = **अस्मान्त्सीते** । त्रीन् + समुद्रान् = **त्रीन्त्समुद्रान्** इत्यत्रोभयत्र ''नश्च'' (अष्टा. ८-३-३०) इत्यनेन लवर्णागमो (धुँट्) जातः । वर्णानां विकृतिः (परिवर्तनम्) विकारः कथ्यते । यथा -

(क) अ + इ = ए + दम् = ''**एदम्**''

(क) आ + इ = ए + मे = ''**एमे**''

(क) आ + इ = ए + ष्ट्यः = ''**एष्टं॑यः**''

(क) प्र + इषितः, प्र + अ + इ = ए + षितः = ''**प्रेषि॑तः**''

**४. प्रकृतिभावः**

वर्णानां यथावत् स्थितिः (प्रकृत्या स्थितिः) प्रकृतिभावः कथ्यते । यथा -

(क) आशुः + शिशानः = **आ॒शुः शिशा॑नः**

(ख) अदितिः + षोडशाक्षरेण = **अदि॑ति॒ः षोड॑शाक्षरेण**

इत्यत्रोभयत्र ''वा शरि'' (अष्टा. ८.३.३६) इत्यनेन विसर्गस्य स्थाने विकल्पेन विसर्गादेशः, तस्मात् प्रकृतिभावः।

(ग) युञ्जानः + प्प्रथमम् = **युञ्जा॒नः प्प्र॑थ॒मम्**

इत्यत्र ''कुप्वोः ⨯ क ⨯ पौ च'' (अष्टा. ८.३.३७) इत्यनेन विसर्गस्य स्थाने विकल्पेन विसर्गादेशः, तस्मात् प्रकृतिभावः ।

(घ) इन्द्राग्नी + आगतम् = इन्द्रा॑ग्नी॒ आग॑तम्

इत्यत्र प्रगृह्यसंज्ञत्वात् ''प्लुतप्रगृह्या अचि नित्यम्'' (अष्टा. ६.१.१२१) इत्यनेन प्रकृतिभावः ।

(ङ) नम् + ओ (अ + स् - रुँ - र् - उ) + अस्तु = नमो अस्तु

इत्यत्र ''प्रकृत्यान्तः पादमव्यपरे'' (अष्टा.६.१.११५) इत्यनेन प्रकृतिभावः ।

**आकाशस्ता यथा विद्युत् स्फुटिता मणिसूत्रवत् ।**

**एषच्छेदो विवृत्तीनां यथा बालेषु कर्त्तरि ॥१२॥**

**सरलार्थः** आकाशस्था विद्युद् मणिसूत्रवद् यावत्कालपर्यन्तं स्फुटति; केशच्छेदने च यावत्कालपर्यन्तं कर्तनी ध्वनति; तावत्कालपरिमितं विवृत्तीनामुच्चारणं (छेदः, सन्धिविश्लेषः, सन्धिभंगो वा) मन्यते ॥१२॥

**द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते ।**

**विवृत्तिस्तत्र विज्ञेया यऽईशे तु निदर्शनम् ॥१३॥**

**सरलार्थः** यत्र द्वयोः स्वरयोर्मध्ये सन्धिर्न दृश्यते, तत्र विवृत्तिर्वेदितव्या । सा च विवृत्तिः ''यऽईशे'' (यजुः-२३.३) इत्यादिषु स्थानेषु दरीदृश्यते ।

इत्यत्र सन्धिभंगत्वाद् अर्धमात्रात्मक-चिह्नेन ''ऽ'' इत्यनेन सैषा विवृत्तिर्विज्ञापिता भवतीति विज्ञेयम् ॥१३॥

**पिपीलिका पाकवती तथा वत्सानुसारिणी ।**

**वत्सानुसृजिता चैव चतस्रस्ता विवृत्तयः ॥१४॥**

**सरलार्थः** चतस्र विवृत्तय उररीक्रियन्ते । तासु पिपीलिकेति प्रथमा, पाकवतीति द्वितीया, वत्सानुसारिणीति तृतीया, वत्सानुसृजितेति च चतुर्थी विवृत्तिर्वेदितव्या ॥१४॥

**पिपीलिकाऽऽद्यन्त-दीर्घा नाभ्याऽआसीन्निदर्शनम् ।**

**पाकवत्युभयोर्ह्रस्वा विनऽइन्द्रेति दर्शनम् ॥१५॥**

**सरलार्थः** आद्यन्त-दीर्घा पिपीलिका नाम्नी विवृत्तिरुच्यते । तस्याश्च निदर्शनं ''**नाभ्याऽआसीत्**'' (यजुः- ३१.१३) इत्यादिषु स्थानेषूपलभ्यते । उभयोर्ह्रस्वा पाकवती नाम्नी विवृत्तिर्निगद्यते । तस्याश्च निदर्शनं ''**वि नऽइन्द्र**'' (यजुः-८.४४) इत्यादिषु स्थानेषूपलभ्यते ॥१५॥

**वत्सानुसारिणी चादौ दीर्घा ताऽअस्य दर्शनम् ।**

**अन्ते वत्सानुसृजिता तानऽआवोढमश्विना ॥१६॥**

**सरलार्थः** आदौ दीर्घा वत्सानुसारिणी नाम्नी विवृत्तिः कथ्यते । तस्याश्च निदर्शनोपलब्धिः ''**ताऽअस्य**'' (यजुः- १२.५५) इत्यादिषु स्थानेषु भवति । अन्ते दीर्घा वत्सानुसृजिता नाम्नी विवृत्तिरभिधीयते। तस्याश्च निदर्शनोपलब्धिः ''**ता नऽआवोढमश्विना**'' (यजुः- २०.७३) इत्यादिषु स्थानेषु भवति ॥१६॥

**शब्दार्थः**

**स्वराः** - स्वरवर्णाः, **स्पर्शाः** - स्पर्शवर्णाः, **षण्ठः** - नुपंसकः, **शबलः** - चित्र-विचित्रः, **भूमियाः** - क्षत्रियाः

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) स्पर्शा स्वराः ........................ सन्ति । (परलव, स ष श ह, कादयोमावसानाः)

(२) अनुस्वारस्य वर्णः ........................ । (रक्तः, पीतः, हरितः)

(३) वर्णानां सन्धिः ........................ सन्ति । (त्रिविधाः, द्विविधाः, चतुर्विधाः)

(४) प्रकृतिभावसन्धेः उदाहरणम् ........................ । (आशु:शिशानः, विभ्राट्बृहत्, सहस्रशीर्षा)

(५) ''अदर्शनं लोपः'' इति सूत्रेण ........................ भवति । (अदर्शनसंज्ञा, लोपसंज्ञा, गुणसंज्ञा)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) शिक्षाशब्दसंज्ञायाः लक्षणम् दीयताम् ।

(२) याज्ञवल्क्यशिक्षा केन ग्रन्थेन सह सम्बद्धा वर्तते?

(३) जिह्वामूलीय कः वर्णकः भवति?

(४) के वर्णा अश्विनीकुमारदैवतकाः?

(५) यमाः कति संख्यकाः सन्ति?

**३. पञ्चवाक्यैरुत्तरं दीयताम् ।**

(१) वर्णानां भेदाः संख्या च ।

(२) वर्णानां दैवतवर्णनं निरूपयत ।

(३) सन्धिश्चतुर्विधो भवति ।

(४) चतस्रः विवृत्तयः ।

(५) शिक्षाग्रन्थेषु याज्ञवल्क्यशिक्षायाः वैशिष्ट्यम् ।

**४. मन्त्रद्वयस्य सरलार्थं लिखत ।**

(१) भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते ।
वासिष्ठाः उपसर्गाश्च निपाताः काश्यपाः स्मृताः ॥

(२) आकाशस्था यथा विद्युत् स्फुटिता मणिसूत्रवत् ।
एषश्छेदो विवृत्तीनां यथा बालेषु कर्तरि ॥

**५. मन्त्रद्वयस्य पूर्तिं कुरुत ।**

(१) स्वरास्तु .................. भूमिपाः ॥

(२) द्वयोस्तु .................. निदर्शनम् ॥

६. **शब्दानां परिचयो देयः ।**

(१) नासिक्यः

(२) नैर्ऋत्याः

(३) यमादयः

(४) उष्माणः

७. **क्रियापदानां परिचयो देयः ।**

(१) ईष्यते

(२) प्राहुः

(३) स्याद्

(४) दृश्यते

८. **सन्धिविच्छेदं कुरुत ।**

(१) पाकवत्युभयोर्ह्रस्वा ।

(२) कपिलास्तूपसर्गाश्च ।

(३) विवृत्तिस्तत्र ।

९. **सन्धिमेलनं कुरुत ।**

(१) ऊष्माणः + अरुणाः

(२) सर्वम् + तु

(३) एषः + छेदः

**छात्र-प्रवृत्तिः**

- वर्णानाम् वर्ण-जाति-देवता-लिङ्गानुसारं बृहद् कोष्टकं विधीयत ।

**विशिष्टज्ञानम्**

- आदित्यो मुनिभिः प्रोक्तः सर्वाक्षरगणस्य च ।
- सर्ववर्णस्य गणस्य भगवान् सूर्यः मुख्य इति ऋषिभिः कथितम् ।

●

| ७ | याज्ञवल्क्यशिक्षास्वरभक्तिविचारः |
|---|---|

**प्रस्तावना**

वेदाः खलु सृष्टेरादिग्रन्थाः आर्याणां संस्कृतेर्मूळस्रोतः, सर्वविद्यानां च निधानम् । मन्त्रब्राह्मणयोर्वेदनामधेयम् इति परिभाषामनुसृत्य पूर्वमीमांसोक्तमार्गेण च वेदाः कर्मकाण्डाङ्गभूताः । मुण्डकोपनिषदि वेदाः वेदाङ्गानि च अपरा विद्या इति स्पष्टीकृता वर्तते, यथा 'तत्रापरा ऋग्वेदो यजुर्वेदो समावेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषामिति'। वेदानां यथार्थज्ञानहेतवे तेषामङ्गभूतानामङ्गानाम् ज्ञानमनिवार्यम् अस्ति अतः 'अङ्ग' शब्दस्य व्युत्पत्तिजनकोऽर्थः उपकारक इति । अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि । वेदाङ्गानां प्रयोजनम् वेदरक्षा अस्ति सा त्रिधा वर्तते यथा स्वरूपरक्षा अर्थरक्षा अनुष्ठानरक्षा च । वेदस्वरूपरक्षार्थं यथा शिक्षाग्रन्थानां ज्ञानं छन्दश्शास्त्रस्य च ज्ञानम् उपकारकमिति अवगन्तव्यम्।

शिक्षाग्रन्थेषु याज्ञवल्क्यशिक्षा महत्त्वपूर्णा अस्ति । अयं शिक्षाग्रन्थ अन्यशिक्षाग्रन्थापेक्षया बृहद् वर्तते । ग्रन्थेऽस्मिन् स्वरव्यञ्जनवर्णानाम् विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वरानुनासिकानां सन्धिभेद-विवृत्तिस्वरभक्तीनां च वर्णनम् प्रदत्तम्। प्रस्तुतेऽस्मिन्पाठे स्वरभक्तीनां च भेदवर्णनम् स्थानवर्णनम् उदाहरणैः सह प्रशिक्षितम् वर्तते । एवञ्च स्वरव्यञ्जन-विसर्जनीय-जिह्वामूलीयादीनां ध्वनीनां शास्त्रीयोच्चारणविधिभिः सह निरूपणम् प्रदत्तम् । स्वरवर्णानामुच्चारभङ्गाः स्वरभक्तिरेव । वर्णाः स्वर-व्यञ्जनविभागेन द्विधा विभज्यन्ते । स्वयं प्रकाशिता स्वराः व्यञ्जनानि तु स्वराणां साहाय्येन प्रकाशितानि भवन्ति। एतेषां सर्वेषामुच्चारणं सावधानेन चित्तेन विशुद्धतया स्पष्टतया, सरलतया च क्रियते तदस्याः शिक्षायाः शिक्षात्वम् । तैत्तिरीयोपनिषदि शिक्षाध्याये प्रभूतं चिन्तनं कृत्तं वर्तते-यथा वर्णः स्वरः मात्रा बलं-साम-सन्तान इति । एतेन ज्ञायते यत् प्राचीनाः महर्षयः स्वरवर्णादीनां विषये जागरुका आसन् ।

परम्परया कालक्रमेण च षष्ठ्यधिकाः शिक्षाग्रन्थाः विद्वद्भिः प्रणीताः । तेषु केचन अत्रोल्लिख्यन्ते - वासिष्ठी शिक्षा, पाणिनीय शिक्षा, कात्यायनी शिक्षा माण्डव्य शिक्षा, पाराशरी शिक्षा, नारदीय शिक्षा, गौतमी शिक्षा, लोमेशीशिक्षा, माण्डूकी शिक्षा, प्रातिशाख्यप्रदीपशिक्षा, स्वरभक्तिलक्षणशिक्षा, अवसाननिर्णयशिक्षा, स्वराङ्कशिक्षा च । शास्त्रीयरीत्या मन्त्रोच्चारणविषये वैशारद्यार्थमाधिकारितार्थञ्च इमे ग्रन्था अवश्यमेव साद्यन्तमध्येतव्याः ।

यज्ञानुष्ठानसमये मन्त्रपाठका उत्तमाः कीदृशा अधमपाठकाश्च कीदृशाः भवेयुः तेषां सुचारुरूपेण वर्णनं कृतं वर्तते पाणिनीय-शिक्षायाम् -




उत्तमपाठकानां गुणाः यथा -

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।**
**धैर्यं लय-समर्थञ्च षडेंते पाठका गुणाः ॥**

पाठकानां दोषाः यथा

**गीति शीघ्री शिरःकम्पी तथा लिखितपाठकाः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥**

प्रस्तुतेऽस्मिन्पाठे याज्ञवल्क्यस्य व्याकरणवैशारद्यं दरीदृश्यते ।

---

**करिणी कुर्विणी चैव हरिणी हरिता तथा ।**
**तद्वद् हंसपदा नाम पंचैते स्वरभक्तयः ॥१॥**

**सरलार्थः** पञ्च स्वरभक्तय उररीक्रियन्ते । तासु करिणीति प्रथमा, कुर्विणीति द्वितीया, हरिणीति तृतीया, हरितेति चतुर्थी, हंसपदेति च पञ्चमी स्वरभक्तिर्विज्ञेया ॥१॥

**करिणी रहयोर्योगे कुर्विणी लहकारयोः ।**
**हरिणी रशयोर्योगे हरिता लशकारयोः ॥**
**या तु हंसपदा नाम सा तु रेफषकारयोः ॥२॥**

**सरलार्थः** रेफ-हकारयोर्योगे करिणी नाम्नी स्वरभक्तिर्निष्पद्यते । लकार-हकारयोर्योगे कुर्विणी नाम्नी, रेफ-शकारयोर्योगे हरिणीनाम्नी, लकार-शकारयोर्योगे हरितानाम्नी, रेफ-षकारयोर्योगे तु या स्वरभक्तिः संजायते सा हंसपदानाम्नी (स्वरभक्तिः) कथ्यते ॥२॥

**देवम्बर्हिश्च करिणी उपवल्हेति कुर्विणी ।**
**हरिणी दर्शतमिति शतवल्शेति हरिता ।**
**वर्षो वर्षीयसीत्याहुस्तथा हंसपदेति च ॥३॥**

**सरलार्थः** ''**देवम्बर्हिः**'' (यजुः - २१.४८) इत्यत्र रेफ-हकारयोः संयोगात् करिणीनाम्नी स्वरभक्तिर्वर्तते । ''उपवल्हमसि'' (यजुः - २३.५१) इत्यत्र लकार-हकारयोः संयोगत्वात् कुर्विणी नाम्नी, ''**दर्शतम्**'' (यजुः - ११.३७) इत्यत्र रेफ-शकारयोः संयोगत्वाद् हरिणीनाम्नी, ''**शतवल्शा**'' (यजुः - २१.१०) इत्यत्र लकार-शकारयोः संयोगत्वाद् हरितानाम्नी, ''**वर्षो वर्षीयसि**'' (यजुः - ६.११) इत्यत्र च रेफ-षकारयोः संयोगत्वाद् हंसपदानाम्नी स्वरभक्तिरस्तीति विज्ञेयम् ॥३॥

**रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः ।**
**स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते ॥४॥**

**सरलार्थः** यत्र स्वरितोदयाः स्युः, तथा रेफ-लकाराभ्यां परत ऊष्माणः (श, ष, स, ह - इत्येते) स्वरपरकाश्चेत् तत्रापि स्वरभक्तिर्विज्ञेया । तत्रोष्माणो व्यंजनपरकाः सन्तोऽपि ते स्वरपरका एव मन्तव्याः । स्वरभक्तिश्चासौ पूर्वोक्तनियममतिक्रम्य पठितेति वेदितव्यम् । यथा - ''**वर्ष्याय**'' (यजुः - १६.३८) इत्यत्र रेफाद् उत्तरत ऊष्मवर्णः षकारो व्यंजनपरकोऽपि सन् स्वरपरक एव । स्वरितोदयश्चात्र ॥४॥

**स्वरभक्तिं प्रयुंजानस्त्रीन् दोषान् परिवर्जयेत् ।**
**इकारं चाप्युकारंच ग्रस्तदोषं तथैव च ॥५॥**

**सरलार्थः** स्वरभक्तिमुच्चारयन् वेदपाठी विद्वान् इकारोच्चारणम्, उकारोच्चारणं तथैव ग्रस्त-दूषणं (स्थान-करण-पीडनं) चेत्येतान् खलु त्रीन् दोषान् परित्यजेत् ॥५॥

**एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता ।**
**सम्यक्पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥६॥**

**सरलार्थः** बुद्धिमान् आचार्यो याज्ञवल्क्यः समुचित-पाठ-सिद्धये वेदाध्येतृणां मंगलकामनया तदेतत् पूर्वोक्तं स्वरभक्तिविषयकं लक्षणं कृतवान् अस्ति ॥६॥

**अर्धमात्रास्वरं किञ्चित् पृथङ्न्यूनमिवोच्चरन् ।**
**ऋकारे च लृकारे च हृत्-कण्ठ-मनसापि च ॥७॥**

**सरलार्थः** ऋकारवर्णे लृकारवर्णेऽपि च हृदयेन, कण्ठेन, मनसा च रकार-लकाराभ्यां किञ्चित् पार्थक्यरपेणार्धमात्रास्वरं (स्वरभक्तिस्वरम् एकारसदृशम्) एकारोच्चारणतोऽल्पमिवोच्चारयन् प्रयुञ्ज्यात् । द्विमात्रिकैकारोच्चारणरूपा स्वरभक्तिर्नैवात्र प्रयोक्तव्येत्यर्थः । यथा - कृष्णोस्य (यजुः - २.१) इत्यत्र ऋकारोच्चारणे, ''**क्लृप्तञ्च मे**'' (यजुः - ) इत्यत्र च लृकारोच्चारणे ॥७॥

**आद्या मात्रा तु कण्ठस्य एकारौकारयोर्भवेत् ।**
**तालव्यस्य तथौष्ठ्यस्य द्वितीया च यथाक्रमात् ॥८॥**

**सरलार्थः** एकारोच्चारण ओकारोच्चारणे चाद्या मात्रा (प्रथमार्धमात्रा) कण्ठस्य (कण्ठ्या) भवेत् । द्वितीया (द्वितीयार्धमात्रा च) क्रमशः तालव्यस्यौष्ठ्यस्य चेति विज्ञेयम् । एकारे (अ + इ = ए) पूर्वार्धमात्रा कण्ठ्या, उत्तरार्थमात्रा

च तालव्या । ओकारे च (अ + उ = ओ) पूर्वार्धमात्रा कण्ठ्या, उत्तरार्धमात्रा चोष्ठ्या वर्तत इत्यर्थः ॥८॥

**ओङ्कारस्तु प्लुतो ज्ञेयः प्लुतमग्ना-द्वितीयकम् ।**

**लाजीनिति तृतीयंच शाचीनिति चतुर्थकम् ॥९॥**

**पंचमं तु विवेशाधः स्विदासीदिति षष्ठकम् ।**

**सप्तमं तूपरिस्विदासीद् ह्यष्टमं नैव विद्यते ॥१०॥**

**सरलार्थः** ''**ओ३म् (अ + उ + म्)**'' इत्येतत् प्रथमं प्लुतं (त्रिमात्रात्मकं पदं विज्ञेयम् । यथा – ''**ओ३प्रतिष्ठ**'' (यजुः – २.१३) ''**ओ३म् क्रतो स्मर**'' (यजुः – ४०.१५) ''**ओ३म् खम्ब्रम्ह**'' (यजुः – ४०.१७) इत्येवमादिकम् । ''**अग्ना३इ**'' (यजुः – ८.१०) इत्येतद् द्वितीयम्, ''**लाजी३ञ्छाची**'' (यजुः – २३.८) इत्येतत् तृतीयम्, ''**शाची३न्**'' इत्येतच्च चतुर्थं प्लुतं वेदितव्यम् ॥९॥

''**विवेशा३**'' इत्यत्र यदेतत् प्लुतमुपलभ्यते तत् पञ्चमं वेद्यम् । ''**अधःस्विदासी३त्**'' (यजुः – ३३.७४) इत्यत्र षष्ठम्, ''**उपरि स्विदासीत्**'' (यजुः – ३३.७४) इत्यत्र च सप्तमम् । एतान्येव सप्त प्लुतानि शुक्लयजुर्वेदे विद्यन्ते । तत्र नैवाष्टमं प्लुतमुपलभ्यते ॥१०॥

**लृकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः ।**

**नैतत् स्वरित-पूर्वाङ्गे नापरांगे कथंचन ।**

**न स्वरे न च मात्रायां कथं स्वारो विधीयते ॥११॥**

**सरलार्थः** वाजसनेयि-संहिताध्यायिनो (याज्ञवल्क्यानुयायिनः शुक्लयजुर्वेदाध्यायिनः) मतानुसारम् लृकारस्य दीर्घत्वं नैव विद्यते ।

अनेकव्यंञ्जनसंयुक्तावसरे (व्यंञ्जनसन्धौ) उदात्तादि-स्वरविशिष्टस्य वर्णस्य पूर्वाङ्गव्यंञ्जननवर्णे केनापि प्रकारेणोदात्तादिप्रयुक्तं हस्तसञ्चालनादिकं न सम्भवति, नैव च परांगव्यंञ्जनवर्णे । तच्च नैव स्वरवर्णे न चापि मात्रायां (देवम्बर्हिरित्यादौ विहिते स्वरभक्तिरूपव्यंञ्जनवर्णे) सम्भवति । कथं तर्हि तत्रोदात्तादि प्रयुक्तं हस्तसञ्चालनादिकं विधातव्यमित्येषा शङ्का ॥११॥

**परांगस्य तु यत् पूर्वं पूर्वाङ्गस्य तु यत् परम् ।**

**उभयोरर्द्धसंयोगे स्वारङ्कुर्याद्विचक्षणः ॥१२॥**

**सरलार्थः** परांगस्य यः पूर्ववर्णः, पूर्वाङ्गस्य च यः परवर्णो वर्तते; तयोरुभयोरर्धसंयोगे हि स्वरविद् वेदाध्यायी विद्वान् हस्तसञ्चालनादिकं (उदात्तादिस्वरगतोच्चारणादिकम्) विदध्यात् । यथा – ''**रुक्कमः**'' (यजुः – १२.१) इत्यत्र ''रुक्'' इत्यस्य ककारः पूर्वाङ्गो वर्तते; मकारश्च पराङ्गः । तयोरुभयोः (ककार-मकारयोः) अर्धसंयोगश्चात्र द्वितीयः ककारः ।

**संयोगे तु परं स्वार्यं परं संयोगनायकम् ।**

**संयुक्तस्य तु वर्णस्य न स्वार्यं पूर्वमक्षरम् ॥१३॥**

**सरलार्थः** व्यञ्जनवर्णानां संयोगे परांगभूतं व्यञ्जनं हस्तसञ्चालनयोग्यं (स्वरविधानयोग्यं) सम्भवति । यतो हि पराङ्गभूतं व्यंञ्जनं संयोगस्य नामकं वर्तते । संयुक्तस्य वर्णस्य तु पूर्वमक्षरं नैव हस्तसञ्चालनयोग्यमवतिष्ठतेतस्य पूर्वाङ्गव्यंजनञ्च पूर्वस्वरेण सह ॥१३॥

**अवग्रहे पदच्छेद उदात्तो दृश्यते यदि ।**

**स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम् ॥१४॥**

**सरलार्थः** अवग्रहे (समासादीनां प्रकृतिरूपप्रदर्शे) पदच्छेदे (संहिताश्रित-पदानां पृथक्-करणे, पदपाठे) च स्वरितपरक

उदात्तस्वरः (उदात्तादिस्वरः) अवलोक्यते चेत् तस्य (उदात्तादिस्वरस्य) अन्तिमव्यञ्जनवर्णः परवर्तिना स्वरितेन साकं मिलित्वा स्वरितत्वं प्राप्नोति . स्वरव्यञ्जनयोः सन्धिविधाने तु परवर्ती वर्ण एव स्वरितादिरूपेणावतिष्ठते न तु पूर्ववर्ती व्यञ्जनवर्णः ।

अवग्रहे पदच्छेदे चान्तिमव्यञ्जनस्य पूर्वाङ्गत्वेन पूर्ववस्त्युदात्तादिस्वरप्राप्तौ सन्धौ जाते पुनः परस्याङ्गताऽनेन निर्धार्यत इत्यर्थः । यथा - सम् + इ॑द्धः = "**समिद्धः**" (यजुः - ) उत् + ए॑नम् = "**उदैनम्**" इत्येवमादिकम् ॥१४॥

**स्वरसन्धिविधानेन नीचोच्चत्वं विधीयते ।**

**व्यञ्जनाद् वा स्वराद् वापि तत् सन्धौ स्वर उच्यते ॥१५॥**

**सरलार्थः** स्वरसन्धेर्विदानेन व्यञ्जनवर्णात् स्वरर्णाद्वापि परेषाम् अक्षराणामनुदात्तत्वमुदात्तत्वञ्च क्रियते । तस्मात् कारणात् व्यञ्जनानां स्वैरः संहितायाम् (सन्धौ) अपि स्वरः कथ्यते । उदात्तादि-स्वर-विधाने व्यजनवर्णो व्यवहितोऽपि सन्नैव कस्यापि बाधको भवति । व्यञ्जनवर्णसहितोऽपि स्वरवर्णमुदात्तादि स्वरत्वं प्राप्नोतीत्यर्थः । यथा - "**स्वाहा॑**" (यजुः - ४.६) "**मोषूणः॑**" (यजुः - ३.४६) इत्येवमादिकम् । स्वाहा शब्द आद्युदात्तोऽस्ति हकारश्चानुदात्तः । (इति दशायाम् उदात्ताच्चानुदात्तं स्वरितत् (यजुः प्रा.-४.१३०) इत्यनेन "**उदात्तादनुदात्तस्य स्वरितः**" (अष्टा. ८.४.६५) इत्यनेन वा सूत्रेण कहारसहित आकारोऽत्र स्वरितः संजातः । नैवात्र व्यञ्जनवर्णो हकारः स्वरनिष्पादने बाधकोऽभूत् ॥१५॥

**दुर्बलस्य यथा राष्ट्रं हरते बलवान् नृपः ।**

**एवं व्यंजनमासाद्य अकारो हरति स्वरम् ॥१६॥**

**सरलार्थः** यथा कश्चिच्छक्तिशाली राजा शक्तिहीनस्य शासकस्य राष्ट्रं हरते,तथैवाकारादिस्वरवर्णो (अकारः) व्यञ्जनवर्णं प्राप्य तस्योदात्तादिस्वरं हरति । स्वरविधौ व्यञ्जनवर्णो नैव बाधको भवति । व्यञ्जनवर्णोऽपि स्वरवर्णेन साकं मिलित्वोदात्तादिवत् प्रतिभातीति वेदितव्यम् ॥१६॥

**स्वर उच्चैः स्वरो नीचः स्वरः स्वरित एव च ।**

**स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥१७॥**

**सरलार्थः** अकारादिस्वरवर्ण एवोदात्तो भवति । अकारादिस्वरवर्ण एवानुदात्तः, अकारादिस्वरवर्णश्चैव स्वरितः । उदात्तादि-त्रिस्वरत्वञ्चैतत् स्वरवर्ण-प्रधानं वर्तते । तेन कारणेन स्वरवर्णसहितव्यञ्जनवर्णोऽपि स्वर एव भवतीति विज्ञेयम् ॥१७॥

**मणिवद् व्यंजनान्याहुः सूत्रवत् स्वर ईष्यते ।**

**व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति सस्वरः ॥१८॥**

**सरलार्थः** मालायां मणिवद् व्यञ्जनानि कथ्यन्ते । स्वरवर्णस्तु सूत्रवद् उच्यते । यत्रोदात्तादिसहितः स्वरवर्णस्तिष्ठति तत्रैव व्यञ्जनान्यनुवर्त्तन्ते । तेनोदात्तत्वादियुक्तेन स्वरवर्णेनैव व्यञ्जनान्यपि स्वरयितव्यानीत्यर्थः ॥१८॥

**शब्दार्थः**

**रहयोः** - रकारहकारयोः, **स्वरभक्तिः** - स्वरवियोजनम्, **पूर्वम्** - पूर्वनियमम्, **आक्रम्य** - अतिक्रम्य, **पठ्यते** - पठनं क्रियते, **प्रयुञ्जानः** - प्रयोगं, कुर्वाणः **धीमता** - बुद्धिमता, **हितकाम्यया** - कल्याणेच्छया, **सिध्द्यर्थम्** - अध्ययनप्रयोजनसिद्धये, **आख्यातम्** - कथितम्, **अर्धमात्रास्वरम्** - स्वरभक्तिस्वरम्, **न्यूनम् इव** - एकारोच्चारणतः स्वल्पमिव, **हृत्कण्ठमनसा** - हृदयेन कण्ठेनमनसा च, **प्लुतः** - त्रिमात्रिकः **वाजसनेयिनः** - वाजसेनयानुयायिनः, **स्वरितस्य** - उदात्तादिस्वविशिष्टवर्णस्य, **कथञ्च** - केनापि प्रकारेण, **विधीयते** - क्रियते, **उभयोः** - पराङ्गापूर्वाङ्गयोः, **विचक्षण** - स्वरसंचालने स्पष्टदर्शी, **पदच्छेदे** - संहितापाठस्य पदपाठकाले, **प्राहुः** - प्रकर्षेण कथयन्ति, **स्वार्यते** - स्वरमिवाचरते, **आसाद्य** - प्राप्य, **त्रैस्वर्यम्** - त्रिस्वरता ।

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) स्वरभक्तेः प्रकाराः ........................ सन्ति । (षड्विधाः, पञ्चविधाः, सप्तविधाः)

(२) ''ओ३म्'' इत्यत्य ........................ सन्ति । (सप्तमात्राः, त्रिमात्राः, पञ्चमात्रा)

(३) शुक्लयजुर्वेदे ........................ प्लुतानि सन्ति । (अष्ट, पञ्च, सप्त)

(४) पाठकगुणाः ........................ सन्ति । (षडेते, पञ्चैते, सप्तैते)

(५) वाजसनेयि संहितायां ........................ दीर्घत्वं नास्ति । (उकारः, लृकारः, वकारः)

२. **निम्नाङ्कितानां प्रश्नानां एकैकवाक्येनोत्तराणि लिखत ।**

(१) अपराविद्यायां के ग्रन्थाः समाविष्टाः ?

(२) वेदाङ्गसन्दर्भे अङ्ग इति संज्ञायाः लक्षणम् किम् ?

(३) वेदरक्षा कतिविधाः ? सा का ?

(४) ओङ्कारः कीदृशः ज्ञेयः ?

(५) शुक्लयजुर्वेदे कति प्लुतानि सन्ति ?

३. **पञ्चैर्वाक्यैरुत्तरं दीयताम् ।**

(१) पञ्चैते स्वरभक्तयः ।

(२) स्वरभक्तेरुपकारिता ।

(३) स्वरसन्धिविधानम् ।

(४) ॐकारस्य प्लुतस्थानानि निरूपयत ।

(५) स्वरव्यञ्जनयोः समानाधिकारण्यम् ।

४. **मन्त्रद्वयस्य सरलार्थं लिखत ।**

(१) एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता ।
सम्यक्पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया ॥

(२) अवग्रहे पदच्छेद उदात्तो दृश्यते यदि ।
स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम् ॥

५. **मन्त्रद्वयस्य पूर्तिम् कुरुत ।**

(१) स्वरसन्धि .................. स्वर उच्यते ॥

(२) दुर्बलस्य .................. हरति स्वरम् ॥

**६. शब्दानां परिचयो देयः ।**

(१) प्रयुञ्जानाः
(२) वाजसनेयिनः
(३) सन्धौ
(४) त्रैस्वर्यम्
(५) व्यञ्जनानि

**७. क्रियापदानां परिचयो देयः ।**

(१) स्युः
(२) परिवर्जयेत्
(३) विद्यते
(४) हरते
(५) अनुवर्त्तन्ते

**८. सन्धिविच्छेदं कुरुत ।**

(१) वर्षीयसीत्याहुः
(२) पृथङ्न्यूनमिवोच्चरन्
(३) स्विदासीदिति
(४) उभयोरर्द्धसंयोगे

**९. सन्धिमेलनं कुरुत ।**

(१) च + अपि + उपकारम्
(२) एकार + ओकारयोः + भवेत्
(३) हि + अष्टमम्
(४) स्वारम् + कुर्यात् + विचक्षणः

**छात्र-प्रवृत्तिः**

- छात्राणां प्रत्यक्षाभ्यासाय स्वरव्यञ्जनध्वनीनाम् आदर्शोच्चारणयुक्तं ध्वनिमुद्रणयन्त्रं विधाय निदर्शन-कार्यक्रमः सज्जीकरणीयः ।

**विशिष्टज्ञानम्**

- मणिवद् व्यञ्जनान्याहुः सूत्रवत् स्वर इष्यते ।
- ककारादिव्यञ्जनानि मालायां स्थापितानि मणिवत् सन्ति, एवंच मालायाः सूत्रम् अकारादयः स्वराः कथ्यन्ते।

●

# ८ | ऋग्वेदीयरुद्राभिषेकमन्त्राः १

**प्रस्तावना**

"वेदोऽखिलोधर्ममूलम्" सूक्त्यनुसारं धर्मस्य मूलतत्त्वरूपाः वेदाः सन्ति । चतुर्षु वेदेषु आदिमवेदः ऋग्वेदः वर्तते। "विद्" धातोः समुत्पन्नोऽयं शब्दः तस्यार्थः "ज्ञानम्" भगवतः आदिनारायणस्य निःश्वासरूपाः वेदाः सन्ति । अत एव वेदाः अपौरुषेयाः नित्याः सर्व-सत्यविद्योपेताश्च सन्ति । ऋग्वेदे तु स्थले-स्थले न केवलं मानवानां कल्याणं परं प्राणिमात्राणां कल्याणं हितसाधनं कथं भवेत्, इति उपदिष्टमस्ति । तेनैव कारणेनादिकालतः ऋग्वेदस्य (चतुर्वेदस्य च) शिक्षायाः प्रचलनम् अद्यावधि प्रचलति । महर्षिवेदव्यासेन अस्य ऋग्वेदस्य विभाजनं कृत्वा चतुर्वेदानां संकलनं कृतमस्ति। ऋग्वेदस्तु ज्ञानकाण्डस्य वहनं करोति, यजुर्वेदस्तु कर्मकाण्डस्य वहनं करोति, सामवेदस्तु उपासनाकाण्डस्य वहनं करोति, अथर्ववेदः औषधि अभिचारकाण्डयोः वहनं करोति । वयं सर्वे ज्ञानोपासकाः स्मः । अतः ऋग्वेदस्याध्ययनम् उपासनादिकं कुर्मः । ज्ञानोपासकाः रुद्रस्य शिवस्य चोपासनामपि कुर्वन्ति । अतः अत्र ऋग्वेदानुसारेण ऋग्वेदीयरुद्राभिषेकमन्त्राणां मन्त्रपाठः, पदपाठः, सायणभाष्यानुसारेण सरलार्थः प्रदत्तोऽस्ति । वैदिकछात्राः ऋग्वेदीयरुद्रमन्त्रान् पठित्वा लाभान्विताः भविष्यन्ति।

प्रस्तुतपाठे ऋग्वेदस्य नवममण्डले दशममण्डले च- संगृहीतमन्त्राः संधृताश्च सन्ति । ते मन्त्राः - रुद्राभिषेकेऽप्युयज्यन्ते। तत्र मुख्यत्त्वे रुद्रस्य समीपे अस्माभिः याच्यते यत् हे रुद्र ! त्वम् अस्मभ्यं ज्ञानम्, आयुष्यम्, स्वर्गं, मोक्षम् धर्मादिचतुष्टयपुरुषार्थं च देहि । अस्माकं रोगाणां, शत्रूणां च संहारं कुरु । पाठेऽस्मिन् सोमवर्णनम्, ज्ञानयज्ञवर्णनम्, विराट्पुरुषवर्णनम्, सृष्टिप्रक्रियावर्णनम्, ऋतूत्पत्तिवर्णनम्, वेदोत्पत्तिवर्णनम्, लोकोत्पत्तिवर्णनम् मुख्यत्त्वेवर्णितमस्ति ।

---

**ॐ अ॒या रु॒चा हरि॑ण्या पुना॒नो विश्वा॒ द्वेषां॑सि तरति स्व॒युग्व॑भिः॒ सूरो॒ न स्व॒युग्व॑भिः।**

**धारा॑ सु॒तस्य॑ रोचते पुना॒नो अ॑रु॒षो हरिः॑ ।**

**विश्वा॒ यद्रू॒पा प॑रि॒यात्यृक्व॑भिः स॒प्तास्ये॑भि॒र्ऋक्व॑भिः ॥१॥**

**पदपाठः-** अ॒या । रु॒चा । हरि॑ण्या । पु॒नानः॑ । विश्वा॑ । द्वेषां॑सि । त॒र॒ति॒ । स्व॒युग्व॑ऽभिः । सूरः॑ । न । स्व॒युग्व॑ऽभिः। धारा॑ । सु॒तस्य॑ । रो॒च॒ते॒ । पु॒नानः॑ । अ॒रु॒षः । हरिः॑ । विश्वा॑ । यत् । रू॒पा । प॒रि॒ऽयाति॑ । ऋक्व॑ऽभिः। स॒प्तऽआ॑स्येभिः । ऋक्व॑ऽभिः ।

**सरलार्थः-** सूर्यः यथा स्वकिरणैः अन्धकारं नाशयति, तथैव पवित्रसंस्कारितसोमः स्वहरितवर्णैः असुरं नाशयति । सोमस्य धाराविद्युतयुक्ता शोभमाना चाऽस्ति । तेजोत्तमसोमः सप्तचन्द्रयुक्तः अन्तरिक्षे सर्वाणि नक्षत्राणि दमयति। प्रकाशयति च ।

**त्वं तत् प॑णीनां वि॒दो॒ व॒सु॒ सं मा॒तृभि॑र्मर्जयसि॒ स्व आ दम॑ ऋ॒तस्य॑ धी॒तिभि॒र्दमे॑ ।**

**प॒रा॒व॒तो॒ न साम॒ तद् यत्रा॒ रण॑न्ति धी॒तयः॑ ।**

**त्रि॒धातु॑भि॒ररु॑षीभि॒र्वयो॑ दधे॒ रोच॑मानो॒ वयो॑ दधे ॥२॥**

**पदपाठः-** त्वम् । तत् । प॒णीनाम् । वि॒दः॒ । वसुः॑ । सम् । मा॒तृभिः॑ । म॒र्ज॒य॒सि॒ । स्वे । आ । दमे॑ । ऋ॒तस्य॑। धी॒तिभिः॑ । दमे॑ । प॒रा॒ऽवतः । न । साम॑ । तत् । यत्र॑ । रणन्ति । धी॒तयः॑ ॥ त्रि॒धातु॒ऽभिः। अरुषिभिः वयः॑। द॒धे॒ । रोच॑मानः । वयः॑ । द॒धे॒ ।

**सरलार्थः-** हे सोम! त्वं यज्ञस्य धारणकर्ता असि । जलापेक्षया अधिकाधिकसुसंस्कृतोऽसि । पणिभिः अपहृताः गावः त्वया संप्राप्ताः सन्ति । सामध्वनिः दूरस्थानात् सुदूरम् अस्माभिः श्रूयते, तथैव तव सोमध्वनिः सर्वैः श्रूयते। सोमोऽयं स्तुति-कर्तृभ्यः अन्नादि, धनादि सर्वं प्रयच्छति । कर्मकर्ता यजमानः सोमशब्देनैवानन्दम् अनुभवति।

**पूर्वामनु प्रदिशंयाति चेकितत् संरश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।**

**अग्मन्नुक्थानि पौस्येन्द्रं जैत्राय हर्षयन् । वज्रश्च यद्भवथो अनपच्युता समत्सवनपच्युता ॥३॥**

**पदपाठः-** पूर्वाम् । अनु । प्रऽदिशम् । याति । चेकितत् सम् । रश्मिऽभिः । यतते । दर्शतः । रथः । दैव्यः । दर्शतः । रथः । अग्मन् । उक्थानि । पौस्या । इन्द्रम् । जैत्राय । हर्षयन् । वज्रः । च । यत् । भवथः । अनपऽच्युता । समत्ऽसु । अनपच्युता ।

**सरलार्थः-** सर्वज्ञः सोमः पूर्वदिशं गत्वा सूर्यकिरणैः सह मेलनं करोति । स्तोतृणां स्तोत्रं श्रुत्वा इन्द्रोऽपि उत्साहयुक्तो भवति । इन्द्रस्य हस्ते वज्रमपि चञ्चलितं भवति । यदा रणभूमौ इन्द्रसोमौ शत्रू परास्तं कुरुतः । तदा स्तोतृगणाः अधिकाधिकस्तुतिं कुर्वन्ति ।

**सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।**

**स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलम् ॥४॥**

**पदपाठः-** सहस्रशीर्षा । पुरुषः । सहस्रऽअक्षः । सहस्रऽपात् । सः भूमिम् । विश्वतः । वृत्वा । अति । अतिष्ठत् । दशऽअंगुलम् ।

**सरलार्थः-** सर्वप्राणिसमष्टिरूपी ब्रह्माण्डदेही विराटाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा – असंख्यशिरोयुक्तः, पुरुषः (विराट्नारायणः) सहस्राक्षः – असंख्यनेत्रधारी, सहस्रपादः – असंख्यपादधारी अत्र सहस्रशब्द असंख्यवाचकः, स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतो परिवेष्ट्य दशांगुलपरिमितं देशमत्यतिष्ठत् अर्थात् ब्रह्माण्डबहिरपि सर्वतो व्याप्तव्यवस्थितः ।

**पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥५॥**

**पदपाठः-** पुरुषः । एव । इदम् । सर्वम् । यत् । भूतम् । यत् । च । भव्यम् । उत । अमृतऽत्वस्य । ईशानः । यत् । अन्नेन । अतिऽरोहति ।

**सरलार्थः-** यदिदं वर्तमानं जगत्सर्वं पुरुष एव, (नारायणमेव) यच्च भूतम्, वर्तमानं, भविष्यं च जगति तत् सर्वं पुरुष एव, (आदिनारायणमेव) अस्यां सृष्ट्यां वर्तमानाः देहधारिणः सर्वेऽपि विराट्पुरूषस्यावयवाः सन्ति । तथापि अयम् विराट् पुरूषः तिरोहितोऽस्ति, कल्पयोर्द्रष्टव्योऽस्ति ।

**एतावानस्य महिमाऽतो ज्यायाँश्च पुरुषः ।**

**पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥६॥**

**पदपाठः-** एतावान् । अस्य । महिमा । अतः । ज्यायान् । च । पुरुषः । पादः । अस्य । विश्वा । भूतानि । त्रिऽपात् । अस्य । अमृतम् । दिवि ।

**सरलार्थः-** भूतभविष्यवर्तमानकालादि सर्वं जगदिदं च परमपुरुषस्य वैभवं वा माहात्म्यं वर्तते । विभूतिविस्तारेणायं महान् वर्तते, अतिशयेनाधिको वर्तते । अस्मिन् जगति सर्वेषु भूतेषु चतुर्थांऽशरूपेण स्थितोऽस्ति (एकपादविभूतिरूपेण) शेष त्रिपाद्भूतिषु शाश्वतदिव्यलोकरूपेणाऽयम् अस्ति । अर्थात् वैकुण्ठलोकः, गोलोकः, साकेतलोकः, शिवलोकादिषु अयमेव विराट्-पुरुषः प्रकाशरूपेण स्थितोऽस्ति ।

**त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ।**

**ततो विष्वङ्व्यक्रामत् साशनानशने अभि ॥७॥**

**पदपाठः-** त्रिऽपात् । उर्ध्वः । उत । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरिति । ततः विष्वङ्ग । वि । अक्रामत् । साशनानशने इति । अभिः ।

**सरलार्थः-** त्रिपाद् अंशत्रयात्मकेन विराट्पुरुषेण, मायाहितेन, प्रकाशमानेन स्वस्वरुपेणास्मिन् विश्वे तेन एकैवपादः प्रकटितः, एकपादेनैवायंविश्वेरूपोऽस्ति । अत एव जड़-चेतनाद्युभयात्मकं जगत् धारितम् अस्ति । अर्थात् सर्वत्रैव परिव्याप्तोऽस्ति ।

**तस्मा॑द्वि॒राड॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।**

**सजा॒तो अत्य॑रिच्यत प॒श्चाद् भूमि॒मथो॑ पु॒रः ॥८॥**

**पदपाठः-** तस्मा॑त् । वि॒ऽराट् । अ॒जा॒य॒त । वि॒ऽराज॑ः । अधि॑ । पूरु॑षः । सः । जा॒तः । अति॑ । अ॒रि॒च्य॒त । प॒श्चात् । भूमि॑म् । अथो॒ इति॑ । पु॒रः ।

**सरलार्थः-** तस्मात् आदिपुरुषात् विराट्-ब्रह्माण्डरूपसंसारः समुत्पन्नः, परमपुरूषात् विराजः अधिपुरूषः अधिदेवताहिरण्यरूपस्योत्पत्तिर्जाता, तस्मात् संपूर्णविश्वं प्रकाशितं जातम्, तदनन्तरम् तेन हिरण्यगर्भेण भूम्यादि लोकानां देवमानवतिर्यकादि सर्वेषां प्राणिनाम् उत्पत्तिः कृता ।

**यत् पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।**

**व॒स॒न्तो अ॑स्यासीदाज्यं॑ ग्री॒ष्मः इ॒ध्मः श॒रद्ध॒विः ॥९॥**

**पदपाठः-** यत् । पुरु॑षेण । ह॒विषा॑ । दे॒वाः । य॒ज्ञम् । अत॑न्वत । व॒स॒न्तः । अ॒स्य॒ आ॒सी॒त् । आज्य॑म् । ग्री॒ष्मः । इ॒ध्मः । श॒रत् । ह॒विः॑ ।

**सरलार्थः-** सर्वैः देवैः मिलित्वा पुरुषरूपहविर्द्वारा यज्ञस्य विस्तारः कृतः । तदा अस्य यज्ञस्य वसन्ताज्यम् आसीत् ग्रीष्मः ईध्मः, शरद् हविरासीत् ।

**तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॒न् पुरु॑षं जा॒तम॑ग्र॒तः ।**

**तेन॑ दे॒वा अ॑यजन्त सा॒ध्या ऋष॑यश्च॒ये ॥१०॥**

**पदपाठः-** तम् । य॒ज्ञम् । ब॒र्हिषि॑ । प्र । औ॒क्ष॒न् । पुरु॑षम् । जा॒तम् । अ॒ग्र॒तः । तेन॑ । दे॒वाः । अ॒ज॒य॒न्त॒ . सा॒ध्याः । ऋषयः । च॒ । ये ।

**सरलार्थः-** प्राक् तस्मात् यज्ञात् देवताः, सिद्धाः, ऋषयः समुत्पन्नाः सर्वैः समुत्पन्नैः अस्य यज्ञपुरुषस्य कुशासनोपरि अभिषेकः कृतः एवं तस्य एव यजनं कृतम् । धारितम् च ।

**तस्मा॑द्यज्ञात् स॑र्वहु॒तः॒ संभृ॑तं पृषदा॒ज्यम् ।**

**प॒शून्ताँश्च॑क्रे वाय॒व्या॑नार॒ण्यान् ग्रा॒म्याश्च॒ये ॥११॥**

**पदपाठः-** तस्मा॑त् । य॒ज्ञात् । स॒र्व॒ऽहु॒तः॑ । सम्ऽभृ॑तम् । पृ॒ष॒त्ऽआज्यम् । प॒शून् । तान् । च॒क्रे॒ । वा॒य॒व्या॑न् । आ॒रण्या॒न् । ग्रा॒म्याः । च॒ । ये ।

**सरलार्थः-** तस्मिन् यज्ञे सर्वं हुतं, तस्मात् यज्ञपुरुषात् दधि, घृतम्, समुत्पन्नम्, विचरणवायुः, वने ग्राम्ये च निवास योग्याः पशवः समुत्पन्नाः ।

**तस्मा॑द्यज्ञात् स॑र्वहु॒तऽऋच॒ः सामा॑नि जज्ञिरे ।**

**छन्दां॑सि जज्ञि॒रे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥१२॥**

**पदपाठः-** तस्मा॑त् । य॒ज्ञात् । स॒र्व॒ऽहु॒तः॑ । ऋच॑ः । सामा॑नि । ज॒ज्ञि॒रे॒ । छन्दां॑सि । ज॒ज्ञि॒रे॒ । तस्मा॑त् । यजुः॑ । तस्मा॑त् । अ॒जा॒य॒त॒ ।

**सरलार्थः-** सर्वहुतयज्ञपुरुषात् ऋग्वेदस्य एवं सामवेदस्य मन्त्राः समुत्पन्नाः । तस्मादेव यजुर्वेदस्य मन्त्राः, सर्वाणि छन्दांसि समुत्पन्नानि सन्ति ।

**तस्मा॒दश्वा॑ अजायन्त॒ ये के चो॑भ॒याद॑तः ।**
**गावो॑ह जज्ञिरे॒ तस्मा॑त्ज्जा॒ता अ॑जा॒वय॑ः ॥१३॥**

**पदपाठः-** तस्मा॑त् । अश्वा॑ः । अ॒जा॒य॒न्त॒ । ये । के । च॒ । उ॒भ॒याद॑तः । गाव॑ः । ह॒ । ज॒ज्ञि॒रे॒ । तस्मा॑त् । जा॒ता । अ॒जा॒वय॑ः ।

**सरलार्थः-** सर्वहुतयज्ञपुरुषात् अश्वाः, गावः, मेषाः, अजाः सर्वे समुत्पन्नाः, ते सर्वे दन्तधारिणः सन्ति । तादृशाः ते समुत्पन्नाः । दन्तयुक्ताः ।

**यत्पु॑रुष॒ं व्य॑दधुः कति॒धा व्यकल्पन् ।**
**मुख॒ं किम॑स्य॒ कौ बा॒हू का ऊ॒रू पादा॑ उच्येते ॥१४॥**

**पदपाठः-** यत् । पुरु॑षम् । वि । अद॑धुः । क॒ति॒धा । वि । अ॒क॒ल्प॒य॒न् । मुख॑म् । किम् । अ॒स्य॒ । कौ । बा॒हूइति॑ । कौ । ऊ॒रूइति॑ । पादौ॑ । उ॒च्ये॒ते॒ इति॑ ।

**सरलार्थः-** यदा विराट्पुरुषस्य विभाजनं जातम्, तदाविराट्पुरुषस्य देवाः कतिप्रकाराः विकल्पितवन्तः यथा अस्य विराट्पुरुषस्य सृष्टिरूपं बाहुद्वयं किमासीत् । सृष्टिरुपमुरुद्वयं किमासीत्, कौ च पादौ कथ्येते ।

**ब्रा॒ह्म॒णो॑स्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्य॑ः कृ॒तः ।**
**ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः प॒द्भ्यां शू॒द्रो अ॑जायत ॥१५॥**

**पदपाठः-** ब्रा॒ह्म॒णः अ॒स्य॒ । मुख॑म् । आ॒सी॒त् । बा॒हू इ॑ति । रा॒ज॒न्य॑ः । कृ॒तः । ऊ॒रू । इति॑ । तत् । अ॒स्य॒। यत् । वैश्य॑ः । पत्ऽभ्याम् । शू॒द्रः । अ॒जा॒य॒त॒ ।

**सरलार्थः-** अस्य विराट्पुरुषस्य सृष्ट्यां बाह्मणः मुखमासीत्, अर्थात् मुखात् ब्राह्मणाः समुत्पन्नाः, क्षत्रियाः भुजाभ्यां समुत्पन्नाः, वैश्याः जँघाभ्यां समुत्पन्नाः, पद्भ्यां शूद्राः समुत्पन्नाः सन्ति ।

**च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒ः सूर्यो॑ अजायत ।**
**मुखा॒दिन्द्र॑श्चा॒ग्निश्च॑ प्रा॒णाद्वा॒युर॑जायत ॥१६॥**

**पदपाठः-** च॒न्द्रमा॑ः । मन॑सः । जा॒तः । चक्षो॑ः । सूर्य॑ः । अ॒जा॒य॒त॒ । मुखा॑त् । इन्द्र॑ः । च॒ । अ॒ग्निः । च॒। प्रा॒णात् । वा॒युः । अ॒जा॒य॒त ।

**सरलार्थः-** अस्य विराट्पुरुषस्य मनसा चन्द्रमा समुत्पन्नः, अर्थात् चन्द्रलोकःसमुत्पन्नः, नेत्रात् सूर्यः समुत्पन्नः, अर्थात् चक्षोः सूर्यलोकः समुत्पन्नः, कर्णाभ्यां वायुः एवं प्राणः समुत्पन्नः, मुखात् अग्निः समुत्पन्नः ।

**नाभ्या॑ आसीद॒न्तरि॑क्षं शीर्ष्णो द्यौः सम॑वर्तत ।**
**प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॒त् तथा॑ लो॒काँ अ॑कल्पयन् ॥१७॥**

**पदपाठः-** नाभ्या॑ः । आ॒सी॒त् । अ॒न्तरि॑क्षम् । शी॒र्ष्णः । द्यौः । सम् । अ॒व॒र्त॒त॒ । प॒त्ऽभ्याम् । भूमि॑ः । दिश॑ः। श्रोत्रा॑त् । तथा॑ । लो॒कान् । अ॒क॒ल्प॒य॒न् ।

**सरलार्थः-** अस्य विराट्पुरुषस्य नाभौः अन्तरिक्षलोकः समुत्पन्नः, मस्तकात् स्वर्गलोकः (द्युलोकः) समुत्पन्नः, पद्भ्यां भूमिः (पृथ्वी) समुत्पन्ना, श्रोत्रात् दिशः समुत्पन्नाः, अनेन प्रकारेण समस्त लोकाः अस्माद् विराट्पुरुषादेव समुत्पन्नाः ।

**स॒प्तास्या॑सन् परि॒धय॒स्त्रिः स॒प्त स॒मिधः कृताः ।**
**दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न् पुरु॑षं प॒शुम् ॥१८॥**

**पदपाठः-** स॒प्त । अ॒स्य॒ । आ॒स॒न् । प॒रि॒धय॑ः । त्रिः । स॒प्त । स॒म्ऽइध॑ः । कृ॒ताः । दे॒वा । यत् । य॒ज्ञम्। त॒न्वा॒नाः । अब॑ध्नन् । पुरु॑षम् । प॒शुम् ।

**सरलार्थः-** देवैः यज्ञस्यारम्भावसरे संकल्पात् पुरुषरूपपशोः बन्धनं कृतम्, तदा सप्तसमुद्राः तस्य मेखलाः (परिधयः)

सञ्जाताः, एकविंशतिप्रकारकाणि छन्दांसि समुत्पन्नानि (गायत्री, अतिजगति, कृत्यां च) प्रत्येकऽस्मिन् छन्दसि सप्त-सप्तप्रकारकाः समिधः सञ्जाताः सन्ति ।

**य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।**

**ते ह॒ नाकं॑ महि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥१९॥**

**पदपाठः-** य॒ज्ञेन॑ । य॒ज्ञम् । अ॒य॒ज॒न्त॒ । दे॒वाः । तानि॑ । धर्मा॑णि । प्र॒थ॒मानि॑ । आ॒स॒न् । ते । ह॒ । नाक॑म्। म॒हि॒मानः॑ । स॒च॒न्त॒ । यत्र॑ । पूर्वे॑ । सा॒ध्याः । सन्ति॑ । दे॒वाः ।

**सरलार्थः-** देवैः पूर्वोक्तरूपेण यज्ञमाध्यमेन यज्ञस्वरूपपरमपुरुषस्याराधनं कृतमस्ति, तस्मात् यज्ञात् प्रथमं धर्मस्योत्पत्तिर्बभूव, धर्माचरणेन देवाः यशोगौरवादिकं प्राप्य स्वर्गस्य सेवनं कुर्वन्ति, तत्र प्राचीनाः साद्ध्यदेवाः निवसन्ति, अतः वयं सर्वे सर्वव्याप्तजडचेतनात्मकरूपविराट्पुरुषस्य करबद्धं स्तुतिं कुर्मः ।

## शब्दार्थः

**रुचा** - रोचमानया, **पुनानः** - पूयमानः, **स्वयुग्वभिः** - स्वयं युक्तौ रश्मिभिः, **धीतिभिः** - धात्रीभिः, **रणन्ति** - रमन्ति, **जैत्राय** - चयार्थम्, **उक्थानि** - स्तोत्राणि, **समत्सु** - संग्रामेषु, **सहस्रशीर्षा** - सहस्रादिसंख्यातानि शिरांसि यस्मिन् सः, **सहस्राक्षः** - सहस्रादिसंकख्यान्यक्षीणि, **सहस्रपात्** - सहस्रादिसंख्याताः पादाः यस्मिन् सः, **अमृतत्वस्य** - मोक्षसुखस्य कारणस्य, **अतिरोहति** - अत्यन्तं वर्धते, **महिमा** - माहात्म्यम्, **ऊर्ध्व** - सर्वेभ्यः उत्कृष्टः, **अत्यरिच्यत** - अतिरिक्तो भवति, **बर्हिषि** - मनसे ज्ञानयज्ञे, **ऋषयः** - मंत्रार्थविदः, **सम्भृतम्** - सम्यक् सिद्धम्, **पृषदाज्यम्** - दध्याज्यादिभोज्यं वस्तु, **आरण्याः** - अरण्येभवाः, **ग्राम्याः** - ग्राम्ये भवाः, **जज्ञिरे** - जायन्ते, **ऋचः** - ऋग्वेदः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) सोमस्य वर्णः ........................ सदृशोऽस्ति । (रक्तः, हरितः, पीतः)

(२) इन्द्रस्य गावः ........................ अपहृताः । (पणिभिः, हरिभिः, चन्द्रमोभिः)

(३) स्तोतृणां ........................ श्रुत्वा इन्द्रः उत्साहितो भवति । (स्तोत्रम्, गानम्, रोदनम्)

(४) ब्रह्माण्डात् दशांगुलोपरि ........................ स्थितः । (वामनपुरुषः, विराट्पुरुषः, कालपुरुषः)

(५) सर्वप्रथमं यज्ञात् ........................ उत्पत्तिर्बभूव । (अधर्मस्य, सधर्मस्य, धर्मस्य)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) विराट्पुरुषस्य शिरांसि कतिविधानि सन्ति?

(२) तिरोहितविराट्पुरुषः कदा दृष्टो भवति?

(३) हिरण्यगर्भात् किं समुत्पन्नम्?

(४) वैकुण्ठगोलोकादिषु प्रकाशमानः कः अस्ति?

(५) यज्ञास्याज्यम् इध्मः हविर्द्रव्यं किमासीत्?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) ए॒तावा॑नस्य महि॒मातो॒ ज्याया॑ँश्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥

(२) तस्मा॑द्य॒ज्ञात् स॑र्व॒हुतः॒ संभृ॑तं पृषदा॒ज्यम् ।
प॒शूँन्ताँश्च॑क्रे वाय॒व्या॑नार॒ण्यान् ग्रा॒म्याश्च॒ ये ॥

(३) स॒प्तास्या॑सन् परि॒धय॒स्त्रिः स॒प्त स॒मिधः कृताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒ना अब॑ध्न॒न् पुरु॑षं प॒शुम् ॥

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) सहस्त्रशीर्षापुरुषः ................................ दशांगुलम् ॥

(२) ब्राह्मणोस्य ................................ अजायत ॥

(३) सप्तास्यासन् ................................ पशुम् ॥

**४. टिप्पणी लेख्या ।**

(१) रुद्राभिषेकमहिमा ।

(२) विराट्पुरुषस्य वर्णनम् ।

**५. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) यज्ञात् (४) अमृतम्

(२) भूमिम् (५) अस्य

(३) ज्यायान्

**६. क्रियापदानां परिचयं लिखत ।**

(१) अतिरोहति (४) उच्येते

(२) जायत (५) अकल्पयन्

(३) अतन्वत

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) पौस्येन्द्रं (४) यदन्नेन

(२) वज्रश्च (५) पादोऽस्य

(३) अत्यतिष्ठद्

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) त्रिपाद् + अस्य + अमृतम् (४) अति + अरिच्यत

(२) ज्यायाँन् + च (५) जातम् + अग्रतः

(३) त्रिपाद् + ऊर्ध्वम्

**छात्र-प्रवृत्तिः**

- चतुर्वेदानां पुरुषसूक्तम् कण्ठस्थं कुरुत ।

**विशिष्टज्ञानम्**

- हृदा यशयन्ति मनसा विपश्चितः । (ऋ. १०/१७७/१)
- हृदयेन यशः प्रवर्तते मनसा विपत्तयः प्रवर्तन्ते ।

| ९ | ऋग्वेदीयरुद्राभिषेकमन्त्राः २ |
|---|---|

**प्रस्तावना**

''**रुत् ज्ञानं ददातीति रुद्रः**'' ज्ञानदाता भगवान् स्वयं रूद्रः अस्ति । ''**ज्ञानमिच्छेत् महेश्वरात्**'' सूक्त्यनुसारं ज्ञानस्येच्छा चेत् भगवतः शिवस्याराधनां सर्वे मानवाः कुर्वन्तु । रुद्राभिषेकस्य महत्त्वं शास्त्रे प्रतिपादितमस्ति यत्, ये मानवाः प्रतिदिनं रुद्रपूजनं कृत्वा रुद्राभिषेकादिकं कुर्वन्ति, ते मानवाः मनोवाञ्छितफलं प्राप्नुवन्ति, ग्रहजनितदोषाणां निवृत्तिर्भवति एवम् रोगादिनां शीघ्रमेवोपशमनं भवति । रोगात् मुक्तिर्भवति, रूद्रह्रदयोपनिषदनुसारेण शिव एव वा रूद्रएव ''**सर्वदेवात्मको रूद्रः सर्वेदेवाः शिवात्मकाः**'' अर्थात् सर्वाषां देवतानाम् आत्मनि रूद्रः समुपस्थितोऽस्ति, सर्वा देवता रुद्रस्यात्माऽस्ति । जाबालोपनिषदि याज्ञवल्क्येन उक्तं यत् ''शतरुद्रियेणेति'' अर्थात् शतरुद्रियस्य सततपाठाभिषेकेन मोक्षस्य प्राप्तिर्भवति, भगवतः शिवस्य जटायां गङ्गा विराजिताऽस्ति, अतः अविच्छिन्नधारा तस्योऽपरि अभिषेको भवत्येव अत एव उक्तं च जलधारा प्रियो ''शिवः'', रुद्राभिषेके द्रव्यस्य प्राधान्यमस्ति, केन द्रव्येण कीदृशो लाभो भवति, इति विस्तृतरूपेण प्रतिपाद्यते ।

**यथा -**

**जलेन वृष्टिमाप्नोति व्याधिशान्त्यै कुशोदकैः । प्रमेहरोगशान्त्यर्थं प्राप्नुयात् मानसेप्सितम् ॥**
**दध्ना च पशुकामाय श्रिया इक्षुरसेन वै ॥ केवलं दुग्धधारा च यदा कार्या विशेषतः ।**
**मध्वाज्येन धनार्थीस्यान्मुमुक्षुस्तीर्थवारिणा । शर्करामिश्रितांतत्र यदाबुद्धिर्जडाभवेत् ।**
**पुत्रार्थी पुत्रमाप्नोति पयसा चाभिषेचनात् ॥ श्रेष्ठाबुद्धिर्भवेत्तस्य कृपयाशंकरस्य च ॥**
**वन्ध्या वा काकवन्ध्या वा मृतवत्सा यथांगना । सार्षपेनैवतैंलेन शत्रुनाशो भवेदिह ।**
**ज्वरप्रकोपशान्त्यर्थं जलधाराशिवप्रियः ॥ पापक्षयार्थी मधुना निर्व्याधिः सर्पिषा तथा ।**
**घृतधारा शिवे कार्या यावन्मन्त्रसहस्त्रकम् । महालिंगाभिषेकेन सुप्रीतः शंकरो मुदा ।**
**तदा वंशस्य विस्तारो जायते नात्र संशयः । कुर्यात् विधानं रुद्राणां प्रीतिप्राप्तिर्भवेत् ध्रुवम् ॥**

प्रस्तुतपाठेऽस्मिन् ऋग्वेदस्य केचनमन्त्राः उद्धृताः सन्ति । ते मन्त्राः ऋग्वेदस्य दशममण्डले समागच्छन्ति । एते मन्त्राः रुद्राभिषेकेऽप्युपयुज्यन्ते ।

अत्र प्रस्तुतपाठे विजयप्राप्तिः, सुखप्राप्तिः, पुत्रप्राप्तिः, पापनिवृत्तिः, धनप्राप्तिः, शत्रुनाशः, आत्मसुरक्षादि रुद्रस्य समीपे याचितमस्ति ।

---

**ममा॑ग्ने॒ वर्चो॑ विह॒वेष्व॑स्तु व॒यं त्वेन्धा॑नास्त॒न्वं पुषेम ।**

**मह्यं॑ नमन्तां प्र॒दिश॒श्चत॑स्र॒स्त्वयाध्य॑क्षेण पृत॑ना जयेम ॥१॥**

**पदपाठः-** मम॑ । अ॒ग्ने॒ । वर्चः॑ । वि॒ऽह्वेषु॑ । अ॒स्तु॒ । व॒यम् । त्वा॒ । ईन्धा॑नाः । त॒न्व॑म् । पु॒षे॒म॒ । मह्य॑म् . न॒म॒न्ताम् । प्र॒ऽदिशः॑ । चत॑स्रः । त्वया॑ । अधि॑ऽअक्षेण । पृत॑नाः । ज॒ये॒म॒ ।

**सरलार्थः-** हे अग्ने ! संग्रामावस्थितेषु मां तेजस्विनं कुरु । वयं त्वां प्रदीप्तं कृत्वा बलवन्तम् भवामः । मदर्थं दिशः प्रदिशः नम्रीभूताः भवन्तु । तवाशीर्वादेन वयं शत्रुसेनां जयेम ।

**मम॑ दे॒वा वि॑ह॒वे स॑न्तु सर्व॒ इन्द्र॑वन्तो म॒रुतो॒ विष्णु॑र॒ग्निः ।**

**मम॒ान्तरि॑क्षमु॒रूलो॑कमस्तु॒ मह्यं॒ वात॑ः पवतां॒ कामे॑ अ॒स्मिन् ॥२॥**

**पदपाठः-** मम॑ । दे॒वाः । वि॒ऽह॒वे । स॒न्तु . सर्वे॑ । इन्द्र॑वन्तः । म॒रुत॑ः । विष्णु॑ः । अ॒ग्निः । मम॑ । अ॒न्तरि॑क्षम्। उ॒रुऽलो॑कम् । अ॒स्तु॒ । मह्य॑म् । वात॑ः । प॒व॒ताम् । कामे॑ । अ॒स्मिन् ।

**सरलार्थः-** इन्द्राग्निसूर्यमरुत्गणादि सर्वे देवाः मम यज्ञे वा युद्धसंग्रामे मम पक्षग्रहणं कुर्वन्तु । द्यावापृथ्व्यन्तरिक्षादिलोकाः मम विजये यज्ञफले चानुकूलाः भवन्तु । ममेच्छानुसारेण सर्वे शत्रवः पराभवं प्राप्नुवन्तु ।

**मयि॑ देवा द्रवि॑ण॒माय॑जन्तां॒ मय्या॒शीर॑स्तुमयि॑ देवहू॒तिः ।**

**दैव्या॒ होता॑रो वनुषन्त॒ पूर्वेऽरि॑ष्टाः स्याम त॒न्वा॑ सुवीरा॑ः ॥३॥**

**पदपाठः-** मयि॑ । दे॒वाः । द्रवि॑णम् । आ । य॒ज॒न्ताम् । मयि॑ । आ॒ऽशीः । अ॒स्तु । मयि॑ । दे॒वहू॑तिः । दैव्या॑ः। होता॑रः । व॒नु॒ष॒न्त । पूर्वे॑ । अरिष्टाः । स्या॒म॒ । त॒न्वा॑ । सु॒ऽवीरा॑ः ।

**सरलार्थः-** मम यज्ञे समागत्य तृप्ताः देवाः मे धनं यच्छन्तु । देवतानाम् आह्वानं कृत्वा अहम् आशीर्वादप्राप्तिं करोमि। प्राचीनकाले यैः ऋषिभिः देवयागः विहीतः ते सर्वे ऋषिगणाः आशीर्वादं यच्छन्तु । वयं स्वास्थ्यलाभं संगृह्य सुपुत्रपौत्रादियुक्ताः भवामः ।

**मह्यं॑ यजन्तु॒ मम॒ यानि॑ ह॒व्याऽकू॑तिः स॒त्या मन॑सो मे अस्तु॒ ।**

**एनो॒ मा नि गां॑ कत॒मच्च॒नाहं विश्वे॑ देवासो॒अधि॑ वोचता नः ॥४॥**

**पदपाठः-** मह्य॑म् । य॒ज॒न्तु॒ । मम॑ । यानि॑ । ह॒व्या । आ॒ऽकू॑तिः । स॒त्या । मन॑सः । मे॒ । अ॒स्तु॒ । एन॑ः । मा । नि । गा॒म् । क॒त॒मत् । च॒न । अ॒हम् । विश्वे॑ । दे॒वा॒सः॒ । अधि॑ । वो॒च॒त॒ । न॒ः ।

**सरलार्थः-** मम यज्ञीयपदार्थः देवतानां कृते गृहणीयः अस्तु । अहं पापात् दूरे भवामि, सर्वे देवाः प्रसन्नाः आशीर्वाददातारः भवन्तु, तेन वयं अभिलषितं (एश्वर्य-प्राप्तं कुर्मः) ऐश्वर्यं प्राप्नुमः ।

**देवीः॑ षडुर्वीरू॒रू न॑ः कृणोत विश्वे॑ देवास इ॒ह वी॑रयध्वम्॒ ।**

**मा हा॑स्महि प्र॒जया॒ मा त॒नूभि॒र्मा रधाम द्विष॒ते सो॑म राजन् ॥५॥**

**पदपाठः-** देवी॑ । ष॒ट् । उ॒र्वी॒ः । ऊ॒रु । न॒ः । कृ॒णो॒त॒ । विश्वे॑ । दे॒वा॒सः॒ । इ॒ह॒ । वी॒र॒य॒ध्व॒म् । मा । हा॒स्म॒हि॒। प्र॒ऽजया॑ । मा । त॒नु॒भि॑ः । मा । र॒धा॒म॒ । द्वि॒ष॒ते॒ । सो॒म॒ । रा॒ज॒न् ।

**सरलार्थः-** आकाश दिनम् - रात्रीः-फलौषध्यादि षट्देव्यः अस्मभ्यं समृद्धिं यच्छन्तु । हे देवगणाः ! अस्मान् बलवन्तः कुर्वन्तु । अस्माकं पुत्राः तथा वयं सर्वे सशरीरेण निर्विघ्नाः भवामः । हे सोम ! शत्रवः सर्वे अस्माकं नाशकाः मा भवन्तु ।

**अग्ने॑ म॒न्युं प्र॑तिनुदन् परे॑षामद॑ब्धो गो॒पाः परि॑ पाहि न॒स्त्वम्॒ ।**

**प्रत्यञ्च॑ः य॒न्तु नि॒गुतः॒ पुन॒स्ते३॑मैषां॑ चि॒त्तं प्र॒बुधां॒ विने॑शत् ॥६॥**

**पदपाठः-** अग्ने॑ । म॒न्युम् । प्र॒ति॒ऽनु॒दन् परे॑षाम् । अद॑ब्धः । गो॒पाः । परि॑ । पा॒हि न॒ः । त्वम् । प्र॒त्यञ्च॑ः । य॒न्तु॒ । नि॒ऽगुत॑ः । पु॒नरी॒ति॑ । ते । अ॒मा । ए॒षा॒म् । चि॒त्तम् । प्र॒ऽबु॒धा॑म् । वि । ने॒श॒त् ।

**सरलार्थः-** हे अग्ने ! तेजस्विनो भूत्वा सर्वतः अस्मान् रक्ष । त्वम् अस्मान् शत्रुप्रहारात् पाहि, अस्माकं शत्रवः स्वेच्छापूर्त्यां विफलाः भवन्तु, दूरे ते गच्छन्तु । शत्रूणां बुद्धिः नष्टा भवन्तु ।

**धा॒ता धा॑तॄ॒णां भुव॑नस्य॒ यस्पति॑र्दे॒वं त्रा॒तार॑मभिमातिषाहम् ।**

**इ॒मं य॒ज्ञम॒श्विनो॒भा बृह॒स्पति॑र्दे॒वाः पा॑न्तु यज॑मानं न्य॒र्थात् ॥७॥**

**पदपाठः-** धा॒ता । धा॒तृ॒णाम् । भुव॑नस्य । यः । पति॑ः । दे॒वम् । त्रा॒तार॑म् । अ॒भि॒मा॒ति॒ऽस॒हम् । इ॒मम् । य॒ज्ञम् । अ॒श्विना॑ । उ॒भा । बृह॒स्पति॑ः । दे॒वाः । पा॒न्तु॒ । यज॑मानम् । नि॒ऽअ॒र्थात् ।

**सरलार्थः-** सृष्टिकर्ता, द्रष्टा चेन्द्रोऽस्ति । स एव लोकस्वामी शत्रुनाशकोऽस्ति, स एवेन्द्रो अस्माकं रक्षकोऽस्ति । अत एव वयम् इन्द्रं स्तौमः ।

**ऊ॒रु॒व्यचा॑ नः म॒हि॒षः शर्म॑ यंसद॒स्मिन् हवे॑ पुरुहू॒तः पु॑रु॒क्षुः ।**

**स न॑ः प्र॒जायै॑ हर्यश्व मृल॒येन्द्र॒ मा नो॑ रीरिषो॒ मा परा॑ दाः ॥८॥**

**पदपाठः-** उ॒रु॒ऽव्यचा॑ः । न॒ः । म॒हि॒षः । शर्म॑ । य॒ंसत् । अ॒स्मिन् । हवे॑ । पु॒रु॒हू॒तः । पु॒रु॒ऽक्षु । सः । न॒ः । प्र॒ऽजायै॑ । ह॒रि॒ऽअ॒श्व । मृ॒ल॒य॒ । इन्द्र॑ । मा । न॒ः । री॒र॒षः । मा । परा॑ । दाः ।

**सरलार्थः-** इन्द्रस्तु महान् तेजोयुक्तः, विभिन्नस्थले निवासितः, यस्य आह्वाहनं सर्वप्रथमं क्रियते, तादृगिन्द्रः अस्माकं कल्याणं करोतु । हे इन्द्र ! त्वं हर्यश्वस्वामि असि, अतः अस्मभ्यं सुखसंपत्तिसौभाग्यादिसुखं प्रयच्छ।

**ये न॑ः स॒पत्ना॒ अप॒ ते भ॑वन्त्विन्द्रा॒ग्निभ्या॒मव॑ बाधामहे॑ तान् ।**

**वस॑वो रु॒द्रा आ॑दि॒त्या उ॑परि॒पृश॑ मो॒ग्रं चोत्ता॑रमधीरा॒जमक्र॑न् ॥९॥**

**पदपाठः-** ये । न॒ः। स॒ऽपत्ना॑ः । अप॑ । ते । भ॒व॒न्तु॒ । इ॒न्द्रा॒ग्निऽभ्या॑म् । अव॑ । बा॒धा॒म॒हे । तान् । वस॑वः। रु॒द्राः । आ॒दि॒त्याः । उ॒प॒रि॒ऽस्पृश॑म् । मा॒ । उ॒ग्रम् । चोत्ता॑रम् । अ॒धि॒ऽरा॒जम् । अ॒क्र॒न् ।

**सरलार्थः-** त्वम् अस्माकं प्रतिकूलं मा भव, अस्माकम् अनिष्टमपि मा कुरु । इन्द्रप्रभावेणाऽस्माकं सर्वे शत्रवः पलायनं कुर्वन्तु इन्द्राग्न्योः (तेजः) सर्वेभ्यः शत्रुभ्यः अस्मान् दूरे नयतु ।

**अग्ने॒ अच्छ वदे॒ह न॑ः प्र॒त्यङ्ञ न॑ः सु॒मना॑ भव ।**

**प्र नो॑ यच्छ विशस्पते धन॒दा अ॑सि न॒स्त्वम् ॥१०॥**

**पदपाठः-** अग्ने॑ । अच्छ॑ । व॒द । इ॒ह । न॒ः । प्र॒त्यङ्ञ । न॒ः । सु॒ऽमना॑ः । भ॒व॒ । प्र । न॒ः । य॒च्छ॒ । वि॒शः॒ । प॒ते॒ । ध॒न॒ऽदाः । अ॒सि॒ । न॒ः । त्वम् ।

**सरलार्थः-** हे अग्ने ! त्वम् अस्माकमुपरि प्रसन्नो भव, अस्मभ्यं उचितोपदेशं यच्छ । हे धनदाताः ! अस्मभ्यं सर्वान् धनं देहि ।

**प्र नो॑ यच्छत्वर्य॒मा प्र भग॒ः प्र बृह॒स्पति॑ः ।**

**प्र दे॒वाः प्रोत सू॒नृता॑ रा॒यो दे॒वी द॑दतु नः ॥११॥**

**पदपाठः-** प्र । न॒ः । य॒च्छ॒तु॒ । अ॒र्य॒मा । प्र । भग॑ः । प्र । बृह॒स्पति॑ः । प्र । दे॒वाः । प्र । उ॒त । सू॒नृता॑। रा॒यः । दे॒वी । द॒द॒तु॒ । न॒ः ।

**सरलार्थः-** अन्ये ये देवगणाः सन्ति, यथा बृहस्पतिः, भगः, अर्यमा, वाण्याधिष्ठात्रीदेवीसरस्वती सर्वाः देवताः समागत्य अस्मान् धनं यच्छन्तु ।

**सोमं॒ राजा॑नमव॑से॒ऽग्निं गी॒र्भिर्ह॑वामहे । आ॒दि॒त्यान् विष्णुं॒ सूर्यं॑ ब्र॒ह्माणं॑ च॒ बृह॒स्पति॑म् ॥१२॥**

**पदपाठः-** सोम॑म् । राजा॑नम् । अव॑से । अ॒ग्निम् । गी॒ऽभिः । ह॒वा॒म॒हे । आ॒दि॒त्यान् । विष्णु॑म् । सूर्य॑म् । ब्र॒ह्माण॑म्। च॒ । बृह॒स्पति॑म् ।

**सरलार्थः-** बृहस्पतिविष्णुसूर्याग्निप्रजापत्यादित्यगणैः सह राजसोमस्य वयम् अस्माकं रक्षार्थम् आह्वानं कुर्मः । एतेषां बृहस्पत्त्यादिदेवतानाम् आह्वानेन वयं सुखिनः भवामः । देवतानां आगमनेन सुखप्राप्तिर्भवत्येव । नात्र शंकाऽवकाशः ।

**इ॒न्द्र॒वा॒यू बृह॒स्पतिं॑ सु॒हवे॒ह ह॑वामहे ।**

**यथा॑ नः॒ सर्व॒ इज्जनः॒ संग॑त्यां सु॒मना॒ अस॑त् ॥१३॥**

**पदपाठः-** इ॒न्द्र॒वा॒यू इति॑ । बृह॒स्पति॑म् । सु॒ऽहवा॑ । इ॒ह । ह॒वा॒म॒हे । यथा॑ । न॒ः । सर्वः॑ । इत् । जनः॑ । सम्ऽग॑त्याम्। सु॒ऽमनाः॑ । अस॑त् ।

**सरलार्थः-** इन्द्रवायुबृहस्पत्यादिदेवतानाम् आह्वानेन वयं सुखस्य प्राप्तिं कुर्मः, अत एव एतेषां देवानां वयम् आह्वानं कुर्मः । धनप्राप्त्यर्थं ते देवाः अस्माकम् अनुकूलाः भवन्तु ।

**अ॒र्य॒मणं॒ बृह॒स्पति॒मिन्द्रं॒ दाना॑य चोदय ।**

**वातं॒ विष्णुं॒ सर॑स्वतीं सवि॒तारं॑ च वा॒जिन॑म् ॥१४॥**

**पदपाठः-** अ॒र्य॒मण॑म् । बृह॒स्पति॑म् । इन्द्र॑म् । दाना॑य । चो॒द॒य॒ । वात॑म् । विष्णु॑म् । सर॑स्वतीम् । स॒वि॒स्तार॑म्। च॒ । वा॒जिन॑म् ।

**सरलार्थः-** हे स्तोतृगणाः ! यूयं सर्वे इन्द्रबृहस्पतिवायुसवितृविष्णु-अर्यमादि, विशेषसरस्वत्याः पार्श्वे दानस्य याचनां कुरुथ । अन्नस्य च याचनां यूयं कुरुथ ।

**त्वं नो॑ अग्ने अ॒ग्निभि॒र्ब्रह्म॑ य॒ज्ञं च॑ वर्धय ।**

**त्वं नो दे॒वता॑तये रा॒यो दाना॑य चोदय ॥१५॥**

**पदपाठः-** त्वम् । न॒ः । अ॒ग्ने॒ । अग्निऽभिः॑ । ब्रह्म॑ । य॒ज्ञम् । च॒ । व॒र्ध॒य॒ । त्वम् । न॒ः । दे॒वता॑तये । रा॒यः । दाना॑य । चो॒द॒य॒ ।

**सरलार्थः-** हे अग्ने ! भवद्भिः समस्ताग्निदेवैः मिलित्वा अस्माकं यज्ञः सम्पादनीयः, एवम् अस्माकं स्तोतृगणानां वृद्धिं कुरु । अस्माकं यज्ञे धनदातृदेवतानाम् आह्वानं कुरु ।

**तच्छंय्योरावृ॑णीमहे गा॒तुं य॒ज्ञाय॑ गा॒तुं य॒ज्ञपतये ।**

**दैवीं॑ स्व॒स्तिर॑स्तु नः स्व॒स्तिर्मानु॑षेभ्यः ॥**

**उर्ध्वं जि॑गातु भेष॒जं शन्नो॑ अस्तु द्वि॒पदे॒ शं चतु॑ष्पदे ॥१६॥**

**पदपाठः-** तत् । शंऽयो । आऽवृ॑णीमहे । गा॒तुम् । य॒ज्ञाय॑ । गा॒तुम् । य॒ज्ञपतये । दैवी॑ । स्व॒स्तिः । अ॑स्तु । नः । स्व॒स्तिः । मानु॑षेभ्यः । उर्ध्वम् । जि॑गातु । भेष॒जम् । शम् । न॑ः । अस्तु । द्वि॒ऽपदे॒ । शम्। चतु॑ष्पदे ।

**सरलार्थः-** हे अग्ने ! वयं कल्याणकारकयज्ञस्य स्तुतिं कुर्मः । अतः यज्ञनारायणः सर्वेषां प्रजानां दिव्यगुणयुक्तसर्वेषां जनानां कल्याणं विदधातु सर्वोत्त्कृष्टं सर्वश्रेष्ठं दिव्यमौषधं मानवानां पशूनाम् च कल्याणं करोतु ।

**नमो॑ ब्र॒ह्म॒णे॒ नमो॑ अस्त्व॒ग्नये॒ नम॑: पृथि॒व्यै नम ओष॑धीभ्य: ।**

**नमो॑ वा॒चे नमो॑ वा॒चस्प॑तये॒ नमो॒ विष्ण॑वे मह॒ते क॑रोमि ॥१७॥**

**पदपाठ:-** नम॑: । ब्र॒ह्म॒णे॑ । नम॑: । अस्तु॒ । अग्न॑ये । नम॒: । पृथि॒व्यै । नम॑: । ओष॑धीऽभ्य॒: । नम॑: । वा॒चे। नम॑: । वाच॒स्ऽपत॑ये । नम॑: । विष्णवे । म॑हते । करो॑मि ।

**सरलार्थ:-** अस्मिन् यज्ञे सर्वेभ्य: देवेभ्य: नमोनम: । अग्निभ्योनम: । पृथिव्यै नमोऽस्तु । दिव्यमौषधीभ्यश्च नमोस्तु। सर्वव्यापकविष्णवे नमोस्तु । अस्मिन् यज्ञे समुपस्थितेभ्य: सर्वदिव्यगुणयुक्तेभ्य: देवेभ्य: नमोस्तु । वयं नमस्कुर्म:।

**भ॒द्रन्नो॒ अपि॑वातय॒मन॑: ॥१८॥**

**पदपाठ:-** भद्र॑म् । न: । अपि॑ऽवातय॒ऽमन॑: ।

**सरलार्थ:-** हे यज्ञनारायण ! हे विश्वव्यापक परमात्मन् ! मनस्तु बहुचञ्चलमस्ति, अत: अस्माकम् अति चञ्चलं मन: शीघ्रगामि मन: कल्याणयुक्तं त्वं शान्तं कुरु ।

**शा॒न्तापृ॑थि॒वी शि॒वम॒न्तरि॑क्ष॒ं द्यौर्नो॑ दे॒व्यभ॑यंनो अस्तु॒ ।**

**शिवा॒दिश॑: प्र॒दिश॒ उ॒द्दिशो॑न आपो॑ वि॒द्यु॒त॒: परि॑पान्तु स॒र्वत॒: ॥**

**शान्ति॒: शान्ति॒: शान्ति॒: ॥१९॥**

**पदपाठ:-** शान्ता॑ । पृथिवी । शिव॑म् । अन्त॒रिक्षम् । द्यो: । न॑: । देवी॒ । अभ॑यम् । न: । अस्तु । शिवा। दिश॒: । प्रऽदि॑श: । उत्ऽदिश॑: । न॒: । आप: । विद्युत: । परिऽपा॑न्तु । सर्वत: । शान्ति: । शान्ति:। शान्ति: ।

**सरलार्थ:-** हे अग्निस्वरूपपरमात्त्मन् ! हे नारायण ! अस्माकं कृते इयं पृथ्वी मातृरूपा विद्यते, सा पृथ्वी शान्ता (भूकंपादि) रहिता भवतु । अन्तरिक्षलोक: अस्माकं कृते कल्याणकारको भवतु । द्युलोकदिव्यगुणसम्पन्नोऽस्तु। वयम् भयरहिता: अभययुक्ता: भवाम: । दिश: प्रदिश: अस्माकं कृते कल्याणकारिका: भवन्तु । अस्माकं कृते विद्युतज्जलादितत्त्वं रक्षणकारकं भवतु । सर्वत: शान्तिरस्तु । आधिदैविका, आधिभौतिका, आध्यात्मिका शान्त्या: अस्माकं जीवने प्राप्तिरस्तु ।

## शब्दार्थ:

**वर्च:** - दीप्ति:, **विह्वेषु** - संग्रामेषु यज्ञेषु वा, **ईन्धाना:** - समिभिर्दीपयन्त:, **पुषेम** - वर्धयेम, **तन्वम्** - शरीरम, **नमन्ताम्** - नम्रीभवन्तु, **पृतना:** - शत्रुसेना:, **जयेम** - अभिभवेम, **इन्द्रवन्त:** - इन्द्रयुक्ता:, **उरुलोकम्** - विस्तीर्णप्रकाशकम्, **प्रवताम्** - प्रवातु, **द्रविणम्** - धनम्, **गमयन्तु** - प्रापयन्तु, **आशी:** - शुभाशीर्वाद:, **देवहूति:** - यज्ञ, **वनुषन्त:** - संभजनात्, **अरिष्टा** - अहिंसिता, **सुवीरा:** - सुपुत्रा:, **आकूति:** - संकल्पनम्, अभीष्टस्य प्रार्थनम्, **कतमच्चन** - किमपि, **कृणोत** - कुरुत, **वीरयध्वम्** - विक्रामयत, **मा हास्महि** - परित्यजेमहि, **मा रद्याम्** - मा वश प्राप्नुयाम, **मन्युम्** - क्रोधम्, **प्रतिनुदन्** - प्रतिमुखं, **प्रेरयन्** - तिरस्कुर्वन्, **अदब्ध:** - अहिंसित:, **प्रत्यंश:** - प्रतिनिवर्तमाना:, **निगुत:** - भयेन गद्‌गदरुपम् अव्यक्त: शब्दं कुर्वन्त:, **अमा सह** - युगपत्, विनेशत्, विनेश्यतु, **न्यर्थान्** - निकृष्टादर्थान्, पापात्, **उरुव्यचा** - विस्तीर्णव्यापन:, बहुतेजोऽधिकारी, **महिष:** - महान्, पुरुहूत:, बहुप्रशंसनीय:, **पुरुक्षु:** - बहुविवास:, **सपत्ना:** - शत्रव:, **चेत्तारम्** - चेतितारम्, **अच्छ वद** - प्रियं ब्रुहि विश:, प्रजाया:, **राय:** - धनानि, **अधशे** - रक्षार्थम्, **गीर्भि:** - स्तुतिभि:, **सुह्वा** - प्रशंसनीयौ, **संगत्याम्** - संगमने, **असेत्** - भवेत्, **चोदय** - प्रेरय, **वाजिनम्** - अन्नवन्तं वा, **आवृणीमहे** - स्वीकुर्महे, भजामहे, चञ्चलं मन:, **परिपान्तु** - परिरक्षन्तु ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) संग्रामेषु मां ........................ तेजस्विनं करिष्यति । (वायुः. अग्निः, सूर्यः)

(२) यज्ञे तृप्ताः देवाः ........................ यच्छन्ति । (विद्याम्, धनम्, अन्नम्)

(३) षट्देव्यः ........................ यच्छन्ति । (समृद्धिम्, औषधिम्, सुधियम्)

(४) सृष्टिकर्ता, द्रष्टा च ........................ अस्ति । (तारकोऽस्ति, चन्द्रोऽस्ति, सूर्योऽस्ति)

(५) ममेच्छानुसारेण सर्वे शत्रवः ........................ प्राप्नुवन्तु । (स्वराजम्, विजयम्, पराजयम्)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैक वाक्येनोत्तराणि लिखत ।**

(१) यज्ञीयपदार्थः कस्य कृते गृहणीयः?

(२) ऋषीणाम् आशीर्वादेन किं भवति?

(३) शत्रुसेनाजयार्थं कस्याशीर्वादम् अपेक्षते?

(४) हर्यश्वस्वामी कः अस्ति?

(५) सर्वे देवाः किं यच्छन्ति?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) धा॒ता धा॑तॄ॒णां भुव॑नस्य॒ यस्पति॑र्दे॒वं त्रा॒तार॑मभिमातिषाहम् ।
इ॒मं य॒ज्ञम॒श्विनो॒भा बृह॒स्पति॑र्दे॒वाः पा॑न्तु यज॑मानं न्य॒र्थात् ॥

(२) अग्ने॒ अच्छा॑ वदे॒ह नः॑ प्र॒त्यङ्ञ नः॑ सु॒मना॑ भव ।
प्र नो॑ यच्छ विशस्पते धन॒दा अ॑सि न॒स्त्वम् ॥

(३) सोमं॒ राजा॑न॒मव॑से॒ऽग्निं गी॒र्भिर्ह॑वामहे ।
आ॒दि॒त्यान् विष्णुं॑ सूर्यं॑ ब्र॒ह्मा॒णं॑ च॒ बृह॒स्पति॑म् ॥

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) ममाग्ने वर्चो ................................ जयेम ॥

(२) अग्ने मन्युं ................................ विनेशत् ॥

(३) उरुव्यचा नो ................................ परा दाः ॥

**४. टिप्पणी लेख्या ।**

(१) रुद्राभिषेकफलप्राप्तिवर्णनम् ।

(२) शत्रुनाशात्मरक्षावर्णनम् ।

**५. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) द्रविणम्
(२) इन्धानाः
(३) मयि
(४) मह्यं
(५) अग्ने

**६. क्रियापदानां परिचयं लिखत ।**

(१) सन्तु
(२) स्याम
(३) यजन्तु
(४) वद
(५) करोमि

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) ममाग्ने
(२) पूर्वेऽरिष्टा
(३) परेषामदब्धो
(४) मृलयेन्द्रः
(५) प्रोतः

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) विह्वेषु + अस्तु
(२) मयि + आशी + अस्तु
(३) चन + अहम्
(४) यज्ञम् + अश्विना
(५) भवन्तु + इन्द्र + अग्निः

**छात्र-प्रवृत्तिः**

- छात्राः स्वमहाविद्यालये ऋग्वेदीयरुद्राभिषेकस्यायोजनं कुर्वन्तु ।1

**विशिष्टज्ञानम्**

- आयुर्यज्ञेन कल्पताम् । (यजु. ९/२१)
  यज्ञेन आयुः प्राप्तिर्भवेत्

# १० शुक्लयजुर्वेदे अष्टमोऽध्यायः १

**प्रस्तावना**

प्रस्तुतेऽस्मिन् पाठे वाजपेययागस्य वर्णनं कृतमस्ति । अस्मिन् पाठे शुक्लयजुर्वेदस्य माध्यन्दिनीशाखायाः अष्टमाध्यायस्य प्रथमतः त्रिंशत्पर्यन्ताः मन्त्राः संगृहीताः सन्ति ।

अथ वाजपेयस्वरूपम् उच्यते - स च ब्राह्मणक्षत्रियमात्रकर्तृको न वैश्याधिकारिकः । एतत् अतिरिक्ते सप्तसंस्थान्तर्गते वाजपेये तु वैश्यः अपि अधिकारी । अस्य कालश्च शरदृतुः । स च अयम् उभयतो बृहस्पतिसवः । एवं च आश्विन्यां वाजपेय सुत्यानुष्ठानम्, ततः पूर्वस्यां भाद्रपद्यां कार्तिक्यां च बृहस्पतिसवद्वयं कार्यम् । अयमेकः पक्षः । बृहस्पतिसवस्थाने अग्निष्टोमसंस्थः ज्योतिष्टोमः भवति इति द्वितीयः पक्षः । अथवा वाजपेयस्य द्वादशसु शुक्लपक्षेषु द्वादशानां यागानाम् अनुष्ठानम् । तत्र अयुग्मेषु षट्सु शुक्लपक्षेषु अग्निष्टोमसंस्थः ज्योतिष्टोमः । युग्मेषु तु षट्सुक्रमशः पृष्ठ्यषडसंबन्धीनि अहानि क्रमात् रथन्तर - बृहत्-बैरूप-वैराज-शाक्वर-रैवताख्यसामषट्कसाध्यानि स्तोत्राणि एकैकस्मिन् अहनि कार्याणि। स्तोमाश्च त्रिवृत्-पञ्चदश-सप्तदश-एकविंश-त्रिणव-त्रयस्त्रिंशरूपाः क्रमात् एकैकस्मिन् दिवसे कार्याः । वाजपेयानन्तरं च युग्मेषु शुक्लपक्षेषु ज्योतिष्टोमः एव । अयुग्मेषु षट्सु पूर्वानुष्ठानवैपरीत्येन पृष्ठ्यस्तोत्राणाम् अनुष्ठानम् इति तृतीयः पक्षः॥

---

**उ॒प॒या॒मगृ॑हीतोस्यादि॒त्त्येब्भ्य॑स्त्वा ।**

**व्विष्ण॑ऽउरुगायै॒ष ते॒ सोम॒स्त॒ꣳ र॑क्क्षस्व॒ मा त्त्वा॑ दभन् ॥१॥**

**पदपाठः-** आ॒दि॒त्त्येब्भ्य॑ऽ । त्वा॒ ॥ व्विष्ण्णो॒ऽइति॒विष्ण्णो॑ । उ॒रु॒गा॒येत्त्यु॑रु गाय ॥

**सरलार्थः-** हे सोम ! उपयामेन पात्रेण त्वं गृहीतोऽसि । हे सोम ! आदित्येभ्यः अर्थाय त्वां सिञ्चामि । हे विष्णो यज्ञपुरुष ! हे ऊरुगाय ! एषः सोमः तवार्पितः वर्तते । सोमं रक्षस्व । हे सोम ! रक्षणे प्रवृत्तं त्वां रक्षाँसि मा हन्युः ॥

**क॒दा च॒न स्त्त॒रीर॑सि॒ नेन्द्र॑ सश्च॒सि दा॒शुषे॑ ।**

**उपो॒पेन्नु म॑घव॒न्भूय॒ऽइन्नु ते॒ दान॑न्देवस्य॑ पृच्च्यतऽआदि॒त्त्येब्भ्य॑स्त्वा ॥२॥**

**पदपाठः-** क॒दा । च॒न । स्त्त॒रीः । अ॒सि॒ । न । इ॒न्द्र॒ । स॒श्च॒सि । दा॒शुषे॑ ॥ उपो॒पेत्त्युप॑ उप । इत् । नु। मघवन्निति॑मघ घन् । भूय॑ । इत् । नु । ते॒ । दान॑म् । दे॒वस्य॑ । पृच्च्य॒ते॒ ॥

**सरलार्थः-** हे इन्द्र ! त्वं कदाचिदपि हिंसको नासि । त्वं हविर्दत्तवतः यजमानस्य हविः सेवसे । हे मघवन् । धनवन्निन्द्र ! प्रकाशमानस्य देवस्य तव बहुतरमेव दानं क्षिप्रं यजमानेन सह संपर्कं प्राप्नोति । यजमानेन दत्तं । हविः त्वया अङ्गीक्रियते । हे ग्रह ! आदित्येभ्यः अर्थाय त्वां गृह्णामि ॥

**क॒दा च॒न प्प्रयु॑च्छस्यु॒भे निपा॑सि॒ जन्म॑नी ।**

**तुरी॑यादित्त्य॒ सव॑नन्तऽइन्द्रि॒यमात॑स्त्थावमृत॑न्दि॒व्यादि॒त्त्येब्भ्य॑स्त्वा ॥३॥**

**पदपाठः-** क॒दा । च॒न । प्र । यु॒च्छ॒सि॒ । उ॒भेऽइत्त्यु॒भे । नि । पा॒सि॒ । जन्म॑नी॒ऽइ॒ति॒जन्म॑नी । तु॒री॑य । आ॒दि॒त्त्य॒। सव॑नम् । ते॒ । इ॒न्द्रि॒यम् । आ । त॒स्त्थौ॒ ॥ अ॒मृत॑म् । दि॒वि । आ॒दि॒त्त्येब्भ्य॑ऽ । त्वा॒ ॥

**सरलार्थः-** हे आदित्य ! त्वं कदाचिदपि प्रमादं न करोसि । त्वं देवतानां मनुष्याणां च रक्षां करोसि । हे आदित्य! तव चतुर्थसवनं जगत्प्रवर्तकम् अमृतं, विज्ञानानन्दस्वभावं यदिन्द्रियं, वीर्यं च द्युलोके आभिमुख्येन स्थितं वर्तते । हे आदित्यग्रह ! आदित्येभ्यः अर्थाय त्वां गृह्णामि ॥

**यज्ञो देवानाम्प्रत्त्येति सुम्म्नमादित्त्यासो भवता मृडयन्तः ।**

**आ वोर्व्वाची सुमतिर्व्ववृत्त्याद्ꣳहोश्चिद्या व्वरिवोवित्तरासदादित्त्येब्भ्यस्त्वा ॥४॥**

**पदपाठः-** यज्ञो३ । देवानाम् । प्रति । एति । सुम्म्नम् आदित्त्यासः । भवत । मृडयन्तः ॥ आ । व्वः । अर्व्वाची सुमतिरितिसु मतिः । व्ववृत्त्यात् । अहोः । चित् । या व्वरिवोवित्तरेतिवरिवोवित् तरा । असत्। आदित्त्येभ्यः। त्वा ॥

**सरलार्थः-** यज्ञः देवानां सुखकर्तुं प्रत्यागच्छति । अतः हे आदित्यासः ! यूयम् अस्माकं सुखकर्त्तारो भवत । युष्माकं या सुमतिः शोभनबुद्धिः भक्तानुग्रहपरा सा अस्मदभिमुखी आवर्ततताम् । हननशीलस्य पापिनोऽपि या सुमतिः तया सुमत्या अतिधनस्य लब्धि भवेत् । हे सोम ! त्वाम् आदित्येभ्यः देवेभ्यः त्वां दध्ना मिश्रयामि ॥

**व्विवस्वन्नादित्त्यैष ते सोमपीथस्तस्म्मिन्मत्स्व । श्रदस्म्मै नरो व्वचसे दधातन यदाशीर्द्दा दम्पती व्वाममश्नुतः । पुमान्पुत्रो जायते व्विन्दते व्वस्वधा व्विश्श्वाहारपऽएधते गृहे ॥५॥**

**पदपाठः-** व्विवस्वन् । आदित्त्य । एषः । ते । सोमपीथऽइतिसोम पीथः । तस्म्मिन् । मत्स्व ॥ श्रत् । अस्म्मै। नरः । व्वचसे । दधातन । यत् । आशीर्द्देत्त्याशीः दा । दम्पतीऽइतिदम् पती । व्वामम् । अश्नुतः ॥ पुमान् । पुत्त्रः । जायते । व्विन्दते । व्वसु । अध । व्विश्श्वाहा । अरपः । एधते । गृहे ॥

**सरलार्थः-** हे विवस्वन् आदित्य ! एषः सोमरसः तव कृते पातुं योग्यः अस्ति । सोमरसपानेन त्वं तृप्तो भव । हे ऋत्विग्यजमानाः ! यूयम् अस्मै आशीर्वचनाय आशिषः दातारो भवत । पत्नीयजमानौ हवनीयं यज्ञफलं प्राप्नुतः । पुँस्त्वधर्मसम्पन्नः पुत्रः जायते । स पुत्रः धनं लभते । अनन्तरं धने लब्धे सति सर्वदा पापरहितः सन् स्वगृहे वर्धताम् ॥

**व्वाममद्य सवितर्व्वाममु श्वो दिवेदिवे व्वाममस्मभ्यꣳ सावीः ।**

**व्वामस्य हि क्षयस्य देव भूरेरया धिया व्वामभाजः स्याम ॥६॥**

**पदपाठः-** व्वामम् । अद्य । सवितः । व्वामम् । ऊँऽइत्त्यूँ । श्वः । दिवेदिवऽइतिदिवे दिवे । व्वामम् । अस्म्मब्भ्यम्। सावीः ॥ व्वामस्य । हि । क्षयस्य । देव । भूरेः । अया । धिया । व्वामभाजऽइतिवाम भाजः। स्याम ॥

**सरलार्थः-** हे सवितः ! अद्य अस्मिन् दिने अस्मभ्यं वननीयं कर्मफलं देहि । श्रद्धायुक्त्या बुद्ध्या वयं यज्ञानुष्ठातारो भवेम । हे देव ! वननीयस्य धनपूर्णस्य निवासस्य दाता भव । अनेन सोमाख्येन कर्मणा वयम् अभिलषितभागिनो भवेम ॥

**उपयामगृहीतोसि सावित्रोसि चनोदाश्श्चनोधाऽअसि चनो मयि धेहि ।**

**जिन्व यज्ञञ्जिन्व यज्ञपतिम्भगाय देवाय त्त्वा सवित्रे ॥७॥**

**पदपाठः-** सावित्त्रः । असि । चनोधाऽइतिचनः धाः । चनोधाऽइतिचनः धाः । असि । चनः । मयि । धेहि ॥ जिन्व । यज्ञम् । जिन्व । यज्ञपतिमितियज्ञ पतिम् । भगाय । देवाय । त्वा । सवित्रे॥

**सरलार्थः-** हे सोम ! त्वमुपयामेन ग्रहणगृहीतोऽसि । हे ग्रह ! सूर्यसमानः असि । त्वम् अन्नस्य धारयिता असि। अतः अत्यन्तम् अन्नस्य धारणकर्ता असि । त्वम् अन्नमपि स्थापय । यज्ञं यज्ञपतिं च तर्पय । ऐश्वर्यादिगुणयुक्ताय सवित्रे देवाय त्वां गृह्णामि ॥

**उपयामगृहीतोसि सुशर्म्मासि सुप्प्रतिष्ठानो बृहदुक्षाय नमः ।**

**विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्व्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥८॥**

**पदपाठः-** सुशर्म्मेतिसु शर्म्मा । असि । सुप्प्रतिष्ट्ठानः । सुप्प्रतिस्थानऽइतिसु प्रतिस्थानः । बृहदुक्क्षायेतिबृहत् उक्क्षाय । नमः ॥

**सरलार्थः-** हे वैश्वदेव ग्रह ! त्वमुपयामेन गृहीतोऽसि । त्वं सुशर्मा सुप्रतिष्ठानः च असि ! तस्मात् जगदुत्पादयित्रे प्रजापतये अन्नं भवितुमर्हसि । विश्वेभ्यो देवेभ्यः अर्थाय त्वां गृह्णामि ॥

**उपयामगृहीतोसि बृहस्प्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः पत्क्नीवतो ग्ग्रहाँ॥ऽऋद्ध्यासम्। अहम्परस्तादहमवस्ताद्यदन्तरिक्षन्तदु मे पिताभूत् । अहꣳ सूर्य्यमुभयतो ददर्शाहन्देवानाम्परमङ्गुहा यत् ॥९॥**

**पदपाठः-** बृहस्प्पतिसुतस्येतिबृहस्प्पति सुतस्य । देव । सोम । ते । इन्दोः । इन्द्रियावतः । इन्द्रियवतऽइतीन्द्रिय व्वतः । पत्नीवतऽइतिपत्नी व्वतः । ग्रहान् । ऋद्ध्यासम् ॥ अहम् । परस्तात् । अहम् । अवस्तात्। यत् । अन्तरिक्क्षम् । तत् । ऊँऽइत्यूँ ॥

**सरलार्थः-** हे देदीप्यमान सोम ! त्वमुपयामेन पात्रेण गृहीतः असि । अतः तव संबन्धिनः अन्यान् ग्रहान् उपांशुप्रभृतीन् अहं समर्धयेयम् । अहं परमात्मरूपः सन् उपरि द्युलोके तथा अधस्तनभूलोके च तिष्ठामि । यदन्तरिक्षं मध्यवर्तिलोकरूपमस्ति तदुतदेव मे देहधारिणः मम पितृवत्पालकं भवति . अहं परमात्मरूपः सन् उभयतः उपरिष्टात् अधस्ताच्च स्थित्वा सूर्यं ददर्श । इन्द्रादीनां देवानां यत् परमं गुह्यं हृदयमस्ति तदेव अहमस्मि॥

**अग्ग्रा३॥ऽइ पत्क्नीवन्त्सजूर्द्देवेन त्त्वष्ट्रा सोमम्पिब स्वाहा । प्प्रजापतिर्व्वृषासि रेतोधा रेतो मयि धेहि प्प्रजापतेस्ते व्वृष्णो रेतोधसो रेतोधामशीय ॥१०॥**

**पदपाठः-** अग्ग्रा३ई । पत्नीवन्नितिपत्नी व्वन् । सजूरितिस जूः । देवेन । त्वष्ट्रा । सोमम् । पिब । स्वाहा ॥ प्रजापतिरितिप्प्रजा पतिः । व्वृषा । असि । रेतोधाऽइतिरेतः धाः । रेतः । मयि । धेहि । प्रजापतेरितिप्प्रजा पतेः । ते । व्वृष्णः । रेतोधसऽइतिरेतः धसः । रेतोधामितिरेतः धाम् । अशीय ॥

**सरलार्थः-** हे पत्नीवन् पत्नीयुक्त-अग्ने ! त्वष्ट्रा देवेन सह समानप्रीतिः सन् सोमरसं पिब । हे उद्गातः ! त्वं प्रजानां पालकः सेक्ता च भवसि । रेतोधाः असि । एवं भूतः त्वमयि वीर्यं स्थापय । ततः वीर्यस्य सेक्तः वीर्यस्य धारयितुः प्रजापतेः तव अनुग्रहात् रेतसः धारयितारं प्रजोत्पादनसमर्थं पुत्रं प्राप्नुयाम् ॥

**उपयामगृहीतोसि हरिरसि हारियोजनो हरिब्भ्यान्त्वा ।**

**हर्य्योर्द्धाना स्त्थ सहसोमाऽइन्द्राय ॥११॥**

**पदपाठः-** हरिः । असि । हारियोजनऽइतिहारि योजनः । हरिब्भ्यामितिहरि भ्याम् । त्वा ॥ हर्य्योः । धानाः । स्थ । सहसोमाऽइतिसह सोमाः । इन्द्राय ॥

**सरलार्थः-** हे ग्रह ! त्वं हरितवर्णः असि । उपयामेन गृहीतोऽसि । हारियोजनः असि । त्वां हरिभ्यां ऋक्सामाभ्यां गृह्णामि । सोमेन सहिताः धानाः भ्रष्टयवाः यूयम् इन्द्राय हरितवर्णयोः अश्वयोः इन्द्राश्वसंबन्धिनौ भवथ॥

**यस्तेऽअश्श्वसनिर्ब्भक्षो यो गोसनिस्त्तस्य तऽइष्ट्टयजुषस्त्तुतस्त्तोमस्य शस्तोक्क्थस्योपहूतस्योपहूतो भक्क्षयामि ॥१२॥**

**पदपाठः-** यः । ते । अश्श्वसनिरित्त्यश्श्व सनिः । भक्क्षः । यः । गोसनिरितिगो सनिः । तस्य । ते । इष्ट्टयजुषऽइनीष्ट्ट यजुषः । स्तुतस्तोमस्येतिस्तुत स्तोमस्य । शस्तोक्क्थस्येतिशस्त उक्क्थस्य । उपहूतस्येत्त्युप हूतस्य । उपहूतऽइत्त्युप हूतः । भक्क्षयामि ॥

**सरलार्थः-** हे धानासहितसोम भक्षद्रव्यम् ! तव भक्षणम् अश्वसनि : गोसनिश्च वर्तते । तव भक्षणम् अनुज्ञातः अहं भक्षयामि . कीदृशं यज्ञरूपम् इष्टयजुषः, स्तुतस्तोमस्य, शस्तोक्थस्य तथा उपहूतस्य भक्षयामि ॥

**दे॒वकृ॑त॒स्यैन॑सोव॒यज॑नमसि मनु॒ष्य॒कृ॒त॒स्यैन॑सोव॒यज॑नमसि पि॒तृकृ॑त॒स्यैन॑सोव॒यज॑नमस्यात्मकृ॑त॒स्यैन॑-सोव॒यज॑नम॒स्येन॑सऽएनसोव॒यज॑नमसि। यच्चा॒हमेनो॑ वि॒द्वाँश्च॒कार॒ यच्चावि॑द्वाँ॒स्तस्य॒ सर्व्व॒स्यैन॑सोवयज॑नमसि ॥१३॥**

**पदपाठः-** दे॒वकृ॑त॒स्येति॑दे॒व कृ॑तस्य । एन॑सः । अ॒व॒यज॑न॒मित्त्य॑व॒ यज॑नम् । अ॒सि॒ । म॒नु॒ष्य॒कृ॒त॒स्येति॑मनु॒ष्य॒ कृतस्य। पि॒तृकृ॑त॒स्येति॑पि॒तृ कृ॑तस्य । आ॒त्मकृ॑त॒स्येत्त्या॒त्म कृ॑तस्य । एन॑सऽएनस॒ऽइत्त्येन॑सः एनसः । अ॒व॒यज॑न॒मित्त्य॑व॒ यज॑नम् । अ॒सि॒ ॥ यत् । च॒ । अ॒हम् । एन॑ः । वि॒द्द्वान् । च॒कार॑ । यत् । च॒ । अवि॑द्द्वान् । तस्य॑ । सर्व्व॑स्य ॥

**सरलार्थः-** हे शकल ! त्वं देवविषये विहितस्य यजनाभावादिलक्षणस्य पापस्य नाशकं भवसि । मनुष्येषु कृतस्य द्रोहनिन्दादेः एनसः अवयजनमसि । पितृषु कृतस्य पापस्य श्राद्धाकरणादेः नाशकमस्ति । आत्मविषये कृतस्य पापस्य आत्मनिन्दादेः नाशनमसि । यावन्ति पापानि तानि सर्वाणि नाशकानि सन्ति । विद्वान् ज्ञानपूर्वकं यदेनः अहं कृतवान्, अविद्वान् अज्ञानपूर्वकं च यदेनः अहं कृतवान् तस्य सर्वस्य एनसः ज्ञानाज्ञानपूर्वस्य पापस्य त्वं नाशकर्ताऽसि ॥

**सँव्वर्च्चसा॒ पय॑सा॒ सन्त॒नूभि॒रग॑न्महि॒ मन॑सा॒ सꣳ शि॒वेन॑ ।**

**त्वष्टा॑ सु॒दत्रो॒ विद॑धातु॒ रायोनु॑माष्र्ट्टु त॒न्वो॒ यद्विलि॑ष्टम् ॥१४॥**

**पदपाठः-** सम् । व्वर्च्च॑सा । पय॑सा । सम् । त॒नूभि॑ः । अग॑न्महि । मन॑सा । सम् । शि॒वेन॑ ॥ त्वष्टा । सु॒दत्त्र॒ऽइति॑सु॒ दत्त्रः॑ । वि । द॒धा॒तु॒ । राय॑ः । अनु॑ । भा॒र्ष्टु॑ । त॒न्व॒ः । यत् । व्विलि॑ष्टमिति॒वि लि॑ष्टम् ॥

**सरलार्थः-** वयं ब्रह्मवर्चसा सङ्गता भवामः । क्षीरादिरसेन अनुष्ठानक्षमैः शरीरावयवैः सम्यक्तया कर्मश्रद्धायुक्तेन मनसा च सङ्गता भवामः । शोभनदानदाता सवितादेवः अस्मभ्यं धनानि विदधातु । अस्मदीयशरीरस्य यद्विकारं विशेषेण न्यूनमङ्ग न्यूनत्वपरिहार्य अनुकूलं कृत्वा शोधयतु ॥

**समि॑न्द्र णो॒ मन॑सा नेषि॒ गोभि॒ः सꣳ सू॒रिभि॑र्म्मघव॒न्त्सꣳ स्व॒स्त्या ।**

**सम्ब्रह्म॑णा दे॒वकृ॑तँ॒य्यदस्ति॒ सन्दे॒वाना॑ꣳ सु॒मतौ य॒ज्ञिया॑ना॒ꣳ स्वाहा॑ ॥१५॥**

**पदपाठः-** सम् । इ॒न्द्र॒ । न॒ः । मन॑सा । ने॒षि॒ । गोभि॑ः । सू॒रिभि॒रिति॑सू॒रि भि॑ः । म॒घ॒व॒न्निति॑मघ व्वन् । स्व॒स्त्या॥ ब्रह्म॑णा । दे॒वकृ॑त॒मिति॑दे॒व कृ॑तम् । यत् । अस्ति॑ । दे॒वाना॑म् । सु॒म॒ता॒विति॑सु म॒तौ । य॒ज्ञिया॑नाम् । स्वाहा॑ ॥

**सरलार्थः-** हे मघवन् धनवन् इन्द्र ! अनुग्रहयुक्तेन मनसा त्वम् अस्मान् संयोजयसि । वाग्भिः गवादि पशुभिः वा संयोजयसि । पण्डितैः होत्रादिभिः क्षेमेण च संयोजयसि । ब्रह्मणार्थं ज्ञानसहितेन वेदेन संयोजयसि । देवकृतं कर्म यदस्ति यज्ञाख्यं देवैः कृतं दृष्टं वा यत्कर्म तेन संयोजयसि । यतः त्वम् अस्मान् एवं मनआदिभिः संयोजयसि तस्मै इयं हविः सुहुतमस्तु ॥

**सँव्वर्च्चसा॒ पय॑सा॒ सन्त॒नूभि॒रग॑न्महि॒ मन॑सा॒ सꣳ शि॒वेन॑ ।**

**त्वष्टा॑ सु॒दत्रो॒ विद॑धातु॒ रायोनु॑माष्र्ट्टु त॒न्वो॒ यद्विलि॑ष्टम् ॥१६॥**

**पदपाठः-** सम् । व्वर्च्च॑सा । पय॑सा । सम् । त॒नूभि॑ः । अग॑न्महि । मन॑सा । सम् । शि॒वेन॑ ॥ त्वष्टा॑ । सु॒दत्त्र॒ऽइति॑सु॒ दत्त्रः॑ । वि । द॒धा॒तु॒ । राय॑ः । अनु॑ । मार्ष्टु॑ । त॒न्व॒ः । यत् । व्विलि॑ष्टमिति॒वि लि॑ष्टम् ॥

**सरलार्थः-** वयं ब्रह्मवर्चसा सङ्गता भवामः । क्षीरादिरसेन अनुष्ठानक्षमैः शरीरावयवैः सम्यक्तया कर्मश्रद्धायुक्तेन मनसा च सङ्गता भवामः । शोभनदानदाता सवितादेवः अस्मभ्यं धनानि विदधातु । अस्मदीयशरीरस्य यद्विकारं विशेषेण न्यूनमङ्ग न्यूनत्वपरिहार्य अनुकूलं कृत्वा शोधयतु ॥

**धाता राति सविंतेदञ्जुषन्ताम्प्रजापतिर्निधिपा देवोऽअग्निः ।**

**त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणन्दधात स्वाहा ॥१७॥**

**पदपाठः-** धाता । रातिः । सविता । इदम् । जुषन्ताम् । प्रजापतिरितिप्रजा पतिः । निधिपाऽइतिनिधि पाः । देवः । अग्निः ॥ त्वष्टा । विष्णुः । प्रजयेतिप्र जया । सꣳरराणाऽइतिसम् रराणाः । यजमानाय। द्रविणम् । दधात । स्वाहा ॥

**सरलार्थः-** धाता, सविता, प्रजापतिः, अग्निः, त्वष्टा, विष्णुः एते षट् देवाः इदम् अस्मत् हविः सेवन्ताम् । रातिः दानशीलः । निधिपाः महापद्मशङ्खपद्मादिनिधीनां नवानां पालयिता प्रजापतिः यजमानसंबन्धिन्या सन्तत्या सह सम्यक् रममाणाः सन्तः यजमानाय धनं दधातु । एतेभ्यः देवेभ्यः इयमाहुतिः अस्तु ॥

**सुगा वो देवाः सदनाऽअकर्म्म यऽआजग्मेदꣳ सवनञ्जुषाणाः ।**

**भरमाणा व्वहमाना हवीꣳष्यस्मे धत्त व्वसवो व्वसूनि स्वाहा ॥१८॥**

**पदपाठः-** सुगेतिसु गा । वः । देवाः । सदना । अकर्म्म ये । आजग्मेत्या जग्म । इदम् । सवनम् । जुषाणाः भरमाणाः । व्वहमानाः । हवीꣳषि । अस्मेऽइत्यस्मे । धत्त व्वसवः । व्वसूनि । स्वाहा ॥

**सरलार्थः-** हे देवा ! ये यूयमिमं यज्ञं सेवामानाः सन्तः आगताः । तेषा युष्माकं सदनानि सुगानि सुगमनीयानि वयम् अकर्म कृतवन्तः । हे वसतः ! अस्मासु यूयं धनानि स्तापयत । किंभूता यूयंम् ! भरमाणाः, वहमानाः तेभ्यः युष्मभ्यं सुहुतमस्तु ॥

**याँ॥ऽआवहऽउशतो देव देवाँस्तान्प्रेरय स्वेऽअग्ने सधस्थे ।**

**जक्षिवाꣳसः पपिवाꣳसश्च व्विश्वेसुंघर्म्मꣳ स्वरातिष्ठतानु स्वाहा ॥१९॥**

**पदपाठः-** यना । आ । अवहः । अशतः । देव । देवान् । तान् । प्र । ईरय । स्वे । अग्ने । सधस्थऽइतिसध स्थे ॥ जक्षिवाꣳसऽइतिजक्षि व्वाꣳसः । पपिवाꣳसऽइतिपपि व्वाꣳसेः । च । व्विश्वे । असुम्। घर्म्मम् । स्वः । आ । तिष्ठत । अनु । स्वाहा ॥

**सरलार्थः-** हे देदीप्यमन् ? अग्ने ? कामयमानान् यान् देवान् त्वम् आहूतवानसि । तान् देवान् स्वकीये निवासस्थाने प्रस्थापय । हे देवाः ? यूयं सर्वे जक्षिवांसः, पापिवांसः इदानीं यज्ञसमाप्तौ हिरण्यमर्भप्राणलक्षणं वायुमण्डलं धर्मादिमण्डलं वा द्युलोकं आश्रयत । इयं हविः तुभ्यं सुहुतमस्तु ॥

**व्वयꣳ हि त्त्वा प्प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह ।**

**ऋधगयाऽऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि व्विद्वान्स्वाहा ॥२०॥**

**पदपाठः-** व्वयम् । हि । त्वा । प्रयतीतिप्र यति । यज्ञे । अस्मिन् । अग्ने । होतारम् । अवृणीमहि । इह॥ ऋधक् । अयाः । ऋधक् । उत । अशमिष्ठा । प्रजानन्नितिप्र जानन् । यज्ञम् । उप । यपाहि । व्विद्द्वान् । स्वाहा ॥

**सरलार्थः-** हे अग्ने ! यस्मात् कारणात् अस्मिन् दिने प्रवर्तमाने यज्ञे सति होमनिष्पादकं त्वां वयं वृतवन्तः । त्वं यज्ञं समर्धयन्सन् इष्टवानसि । यज्ञप्रायश्चित्तं शमितवानसि । त्वमिदानीं यज्ञं समाप्तम् अवगच्छन् स्वगृहं गच्छ । इयं हविः तुभ्यं सुहुतमस्तु ॥

देवा गातुविदो गातुँव्वित्त्वा गातुमित ।

मनसस्पतऽइमन्देव यज्ञꣳ स्वाहा व्वाते धाः ॥२१॥

**पदपाठः-** देवाः । गातुविदऽइतिगातु विदः । गातुम् । वित्त्वा । गातुम् । इत ॥ मनसः । पते । इमम् । देव । यज्ञम् । स्वाहा । धाते । धाः ॥

**सरलार्थः-** हे देवाः ! अस्मदीयो यज्ञः प्रवृत्तः इति विदित्वा यज्ञेन तुष्टाः सन्तः स्वकीयं मार्गं गच्छत । हे मनसस्पते प्रजापते ? इममनुष्ठितं यज्ञं त्वत् हस्ते दधामि । त्वं वायुरूपे देवे यज्ञं स्थापय ॥

यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वाँय्योनिङ्गच्छ स्वाहा ।

एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥२२॥

**पदपाठः-** यज्ञ । यज्ञम् । गच्छ । यज्ञपतिमितियज्ञ पतिम् । स्वाम् । योनिम् ॥ एषः । ते । यज्ञः । यज्ञपतऽइतियज्ञ पते । सहसूक्तवाकऽइतिसह सूक्तवाकः । सर्व्ववीरऽइतिसर्व्व व्वीरः । तम् । जुषस्व । स्वाहा ॥

**सरलार्थः-** हे यज्ञ ! त्वं स्वप्रतिष्ठार्थं यज्ञनामकं विष्णुंप्रतिगच्छ । फलप्रदानेन प्राप्नुहि । स्वनिष्पत्यर्थं स्वकरणभूतां वापीः । क्रियाशक्तिं प्रतिगच्छ । इदं हविः तुभ्यं सुहुतमस्तु । हे यज्ञपते यजमान ! एषः अनुष्ठीयमानः सहसूक्तवाकः सर्ववीरः यज्ञः त्वदीयः अस्ति । तं यज्ञं फलभोगेन सेवस्व । इदं हविः तुभ्यं सुहुतमस्तु॥

माहिर्भूर्म्मा पृदाकुः । उरुꣳ हि राजा व्वारुणश्चकार सूर्य्याय पन्थामन्वेतवाऽउ।
अपदे पादा प्प्रतिधातवेकरुतापवक्त हृदयाविधश्चित् । नमो व्वरुणायाभिष्ठितो
व्वरुणस्य पाशः ॥२३॥

**पदपाठः-** उरुम् । हि । राजा । व्वरुणः । चकार । सूर्य्याय । पन्थाम् । अन्वेतवाऽइत्यनु एतवै । ऊँऽइत्यूँ॥ अपदे । पादा । प्रतिधातवऽइतिप्रति धावते । अकः । उत । अपवक्तेत्यप व्वक्ता । हृदयाविधः। हृदयविधऽइतिहृदय व्विधः । चित् ॥ नमः । व्वरुणाय । अभिष्ठितः । अभिस्थितऽइत्यभि स्थितः। व्वरुणस्य । पाशः ॥

**सरलार्थः-** हे रज्जो ! त्वं सर्पः अजगरः च माभूः । सूर्यस्य अनुक्रमेण अन्वहं गन्तुं विस्तीर्णं मार्गं चकार । तस्मिन् अन्तरिक्षे अस्माकमपि पादौ निक्षेप्तुं मार्गं चकार । हृदयाविधः अपवक्ताकृतेऽपि मार्गं चकार । वरुणस्य पाशः अधिष्ठितः आक्रान्तः तस्मात् न बन्धनक्षमः तस्मै वरुणाय नमोऽस्तु ॥

अग्ग्रेरनीकमपऽआविवेशापान्नपात्प्प्रतिरक्क्षन्नसुर्य्यम् ।

दमेदमे समिधँय्यक्क्ष्यग्ग्रे प्रति ते जिह्वा घृतमुच्चरण्ण्यत्स्वाहा ॥२४॥

**पदपाठः-** अग्ग्रे । अनीकम् । अपः । आ । व्विवेश । अपाम् । नपात् । प्रतिरक्क्षन्नितिप्रति रक्क्षन् । असुर्य्यम् ॥ दमेदमऽइतिदमे दमे । समिधमितिसम् इधम् । यक्क्षि । अग्ग्रे । प्रति । ते । जिह्वा । घृतम् । उत् । चरण्ण्यत् । स्वाहा ॥

**सरलार्थः-** हे अग्ने ! तव ज्वलनशीलस्य सतः अपान्नपात्संज्ञकं मुखं उदकानि आभिमुख्येन प्रविवेश । हे अग्ने! त्वं तत् तत् यज्ञगृहे असुरैः कृतं यज्ञविघ्नं प्रतिरक्षन्निवर्तयन् सन् समिन्धनसाधनं घृतं सङ्गतं कुरु ॥ अनन्तरं तव ज्वाला घृतं प्रति उच्चरतु । इदं हविः तुभ्यं सुहुतमस्तु ॥

समुद्रे ते हृदयमप्प्स्वन्तः सन्त्वा व्विशन्त्वोषधीरुतापः ।

यज्ञस्य त्त्वा यज्ञपते सूक्तोक्तौ नमोवाके व्विधेम यत्स्वाहा ॥२५॥

**पदपाठः-** समुद्रे । ते । हृदयम् । अप्स्वित्यप् सु । अन्तरित्यन्तः । सम् । त्वा । विशन्तु । ओषधीः । उत। आपः ॥ यज्ञस्य । त्वा । यज्ञपतऽइतियज्ञ पते । सूक्तोक्ताविति सूक्त उक्तौ । नमोवाकऽइतिनम व्वाके । विधेम । यत् । स्वाहा ॥

**सरलार्थः-** हे सोम ! तव हृदयं समुद्रसमानासु अप्सु बहुलोदकेषु अन्तर्मध्ये तिष्ठते तत्र त्वां गमय । तत्रस्थं त्वाम् ओषधयः संविशन्तु । हे यज्ञपते ! यज्ञपालक-सोम ! यज्ञस्य शोभनवचनोच्चारणे नमस्कारवचने च त्वां स्थापयामः । इदं हविः तुभ्यं सुहुतमस्तु ॥

**देवीरापऽएष वो गर्ब्भस्त्तꣳ सुप्प्रीतꣳ सुभृतम्बिभृत ।**

**देवं सोमैष ते लोकस्तस्मिञ्छञ्च व्वक्ष्व परि च व्वक्ष्व ॥२६॥**

**पदपाठः-** देवीः । आपः । एषः । व्वः । गर्ब्भः । तम् । सुप्रीतमितिसु प्रीतम् । सुभृतमितिसु भृतम् । बिभृत॥ देव । सोम । एषः । ते । लोकः । तस्मिन् । शम् । च । व्वक्ष्व । परि । च । व्वक्ष्व॥ देवानाम् । समिदितिसम् इत् । असि ॥

**सरलार्थः-** हे आपः ! युष्माकं एषः सोमः गर्भस्थानीयः वर्तते । तादृशं सुप्रीतं सोमं यूयं धारयत । हे सोम ! हे देव दीप्यमान ! तव एषः जललक्षणयुक्तः लोकः तस्मिन् अवस्थितः सन् त्वं सुखं वह । अस्मान् प्रति सुखं प्रापय । अस्मत्तः सर्वाः आर्तीः निवर्तय ॥

**अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोयासिषमव मर्त्त्यैर्मर्त्त्यकृतम्पुरुराव्व्णो देव रिषस्प्पाहि । देवानाꣳ समिदसि ॥२७॥**

**पदपाठः-** अवभृयेत्यव भृथ । निचुम्पुणेतिनि चुम्पुण । निचेरुरितिनि चेरुः । असि । निचुम्पुणऽइतिनि चुम्पुणः॥ अव । देवैः । देवकृतमितिदेव कृतम् । एनः । अयासिषम् । अव । देवैः । देवेकृनतमितिदेव कृतम्। पुरुराव्णऽइति पुरु राव्णः । देव । रिषः । पाहि । देवानाम् । समिदितिसम् इत । असि ॥

**सरलार्थः-** हे अवभृथ ! त्वं नितरां मन्दं गच्छ । यद्यपि त्वं नितरां चरणशीलः असि । तथापि अत्र नितरां मन्दं गच्छ । देवैः द्योतनात्मकैः अस्मदीयैः इन्द्रियैः देवेषु हविः स्वामिषु कृतं पापं यदस्ति तत् जले अवनीतमस्ति। तथा मनुष्यैः अस्मत् सहायभूतैः ऋत्विग्भिः मर्त्येषु यज्ञदर्शनार्थमागतेषु कृतम् अवज्ञारूपं यत् पापं तदपि जले अवनीतवानस्मि । अस्माभिः इदं परित्यक्तं पापं यथा त्वां न प्राप्नोप्ति तथा हे यज्ञ ! मन्दं गच्छ। अस्मान् वधात् पाहि । विरुद्धफलदायीवधः त्वत्प्रसादात् अस्माकं मा भूत् । देवभूतानाम् अस्माकं समिन्धनं भवसि ॥

**एजतु दशमास्यो गर्ब्भो जरायुणा सह । यथायँव्वायुरेजति यथा समुद्रऽएजति ।**

**एवायन्दशमास्योऽअस्त्रज्जरायुणा सह ॥२८॥**

**पदपाठः-** एजतु । दशमास्यऽइतिदश मास्यः । गर्ब्भः । जरायुणा । सह ॥ यथा । अयम् । व्वायुः । एजति। यथा । समुद्रः । एजति ॥ एव । अयम् । दशमास्यऽइतिदश मास्यः । अस्रत् । जरायुणा । सह॥

**सरलार्थः-** अयं दशमास्यः सम्पूर्णावयवः गर्भः जरायुणा सह निर्गच्छतु । यथा येन प्रकारेण अयं वायुः समुद्रश्च चलति तेनैव प्रकारेण दशमास्यः गर्भः कम्पयेत् ॥

**यस्यै ते यज्ञियो गर्ब्भो यस्यै योनिर्हिरण्ययी । अङ्गान्यहुता यस्य तम्मात्रा समजीगमꣳ स्वाहा ॥२१॥**

**पदपाठः-** यस्यै । ते । यज्ञियः । गर्ब्भः । यस्यै । योनिः । हिरण्ययी ॥ अङ्गानि . अहुता । यस्य । तम् । मात्रा । सम् । अजीगमम् । स्वाहा ॥

**सरलार्थः-** हे वशे ! तव गर्भः यज्ञीयः वर्तते । तव योनिः सुवर्णमयी वर्तते । तव गर्भस्य अङ्गानि अखण्डितानि सन्ति । तादृशं गर्भ अनूबन्ध्यालक्षणया मात्रा सह सङ्गमयामि ॥

**पु॒रु॒द॒स्म्मो विषु॑रूप॒ऽइन्दु॑र॒न्तर्म्म॑हि॒मान॑मानञ्ज धीर॑÷ ।**
**एक॑पदीन्द्वि॒पदी॑न्त्रि॒पदी॒ञ्चतु॑ष्प्पदीमष्ट्टाप॑दी॒म्भुव॒नानु॑ प्रथन्ता॒ᳪ स्वाहा॑ ॥३०॥**

**पदपाठः-** पु॒रु॒द॒स्म्मऽइति॑पु॒रु द॒स्म्मः॑ । विषु॑रूप॒ऽइति॒विषु॑ रूपः॑ । इन्दु॑÷ । अ॒न्तः॑ । म॒हि॒मान॑म् । आ॒न॒ञ्ज । धीर॑÷॥ एक॑पदी॒मित्त्येक॑ पदीम् । द्वि॒पदी॒मिति॑द्वि॒ पदी॑म् । त्रि॒पदी॒मिति॑त्रि॒ पदी॑म् । चतु॑ष्प्पदीम् । चतु॑÷पदी॒मिति॒चतु॑÷ पदी॑म् । अ॒ष्टाप॑दी॒मित्त्य॒ष्टा प॑दीम् । भुव॑ना । अनु॑ । प्र॒थ॒न्ता॒म् । स्वाहा॑ ॥

**सरलार्थः-** क्लेदनरूपः, सोमसदृशः, पुरुदस्मः, विषुरूपः धीरः गर्भः अन्तरुदरेस्थितः महत्वं व्यक्तीकरोतु । एवं महिमवतः गर्भस्य अनुबन्ध्यां मातरं भुवनानि प्रख्यातां कुर्वन्तु । एकपदीं द्विपदीं त्रिपदीं चतुष्पदीम् अष्टापदीम् एवं भूतां वशां गणयित्वा भुवनानि प्रख्यातां कुर्वन्तु । हदं हविः तुभ्यं सुहुतमस्तु ॥

## शब्दार्थः

**सुम्नम्** - सुखम्, **अᳪहोः** - पापिनः, **अरपः** - पापरहितः, **चनः** - अन्नम्, **भगाय** - ऐश्वर्यादिगुणयुक्ताय, **बृहदुक्षाय** - प्रजापतये, **अश्वसनिः** - अश्वानां दाता, **अवयजनम्** - नाशकम्, **वर्चसा** - ब्रह्मवर्चसेन, **पयसा** - क्षीरादिरसेन, **सुदत्तः** - शोभनदानः, **संनिषे** - संयोजयसि, **जक्षिवांसः** - भक्षितवन्तः, **स्वः** - द्युलोकः, **यज्ञम्** - विष्णुम्, **अहिः** - सर्पः, **पृदाकुः** - अजगरः, **दमे दमे** - तत्तद्यज्ञगृहे ॥

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) अस्मिन् यागे ........................ यागस्य वर्णनं कृतमस्ति । (सोम, वाजपेय, रुद्र)

(२) वाजपेययागस्य कालः ........................ वर्तते । (शरदृतुः, वसन्तऋतुः, वर्षाऋतुः)

(३) वाजपेययागस्य वर्णनं ........................ अध्याये कृतमस्ति । (दशमे, प्रथमे, अष्टमे)

(४) 'सुम्नम्' इत्यस्य अर्थः ........................ भवति । (सुखम्, दुःखम्, ऐश्वर्यम्)

(५) 'पृदाकुः' इत्यस्य अर्थः ........................ भवति । (सर्पः, अजगरः, व्याघ्रः)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) कः कदाचिदपि हिंसकः नास्ति ?

(२) कः देवः कदाचिदपि प्रमादं न करोति ?

(३) अस्माकं कृते सुखकर्तारः के भवन्ति ?

(४) 'अरपः' इत्यस्य कः अर्थः भवति ?

(५) 'यज्ञः' इत्यस्य कः अर्थः भवति ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) उ॒प॒या॒मगृ॑हीतोसि॒ हरि॑रसि हारियोज॒नो हरि॑ब्भ्यान्त्वा ।
हर्य्यो॑र्द्धाना स्त्थ॑ स॒हसो॑मा॒ऽइन्द्रा॑य ॥

(२) विव॑स्वन्नादित्त्यै॒ष तें सोमपी॒थस्त॒स्मिन्मत्त्स्व । श्रद॑स्मै नरो॒ वच॑से दधातन॒ यदाशी॒र्दा दम्प॑ती वा॒मम॑श्नु॒तः॑।
पुमा॑न्पु॒त्रो जा॑यते वि॒न्दते॒ वस्वधा॑ वि॒श्श्वाहा॑र॒पऽए॑धत॒ गृहे ॥

(३) सँव्वर्च्चसा पयसा सन्तनूभिरगन्महि मनसा स शिवेन ।

त्वष्टा सुदत्रो व्विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम् ॥

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) कदाचन ।

(२) देवागातु ।

(३) उपयामगृहीतोसिसावित्र ।

**४. टिप्पणी लेख्या ।**

(१) वाजपेययागस्य महत्वम् ।

(२) अष्टमाध्यायस्य वर्णितविषयाः ।

**५. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) आदित्येभ्यः

(२) देवस्य

(३) हे इन्द्र !

(४) यज्ञः

(५) तस्मिन्

**६. क्रियापदानां परिचयं लिखत ।**

(१) असि

(२) भवत

(३) यूपम्

(४) जायते

(५) कुरु

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) उपयामगृहीतोसि

(२) प्रत्येति

(३) वोर्वाची

(४) विश्वाहारपः

(५) यस्ते

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) व्वसवः + व्वसूनि

(२) होतारम् + अवृणीमहि

(३) मनसः + पते

(४) मा + अहिः

(५) अग्नेः + अनीकम्

**छात्र-प्रवृत्तिः**

- वाजपेययागस्य मण्डपकुण्डसिद्धिः कथं भवतीति सपरिमाणं सचित्रं छात्रैः चित्रणीयम् ।

**विशिष्टज्ञानम्**

- अग्नेनय सुपथा राये अस्मान् (यजु. ५/३६)

  हे अग्निदेवते अस्मान् शोभन मार्गेण धनार्थं प्रेरय ।

# ११ शुक्लयजुर्वेदे अष्टमोऽध्यायः २

**प्रस्तावना**

प्रस्तुतेऽस्मिन् पाठे शुक्लयजुर्वेदस्य माध्यन्दिनीशाखायाः अष्टमाध्यायस्य एकत्रिंशत्तः त्रिषष्टिपर्यन्ताः मन्त्राः संगृहीताः सन्ति । अस्मिन् पाठे वाजपेययागस्य अवशिष्टाँशः निरूपितः वर्तते ।

कार्तिक्यामाश्वयुज्यां वाऽमायां राजसूयम्य सुत्या कार्या । कार्तिकामायां सुत्यापक्षे आश्विनशुक्लदशम्यां मातृपूजादि। तदारभ्य सत्रदीक्षाः । कार्तिककृष्णद्वादश्यां प्रायणीयेष्टिः, तस्मिन्नेव दिने सोमस्य क्रयः सुराद्रव्यस्यापि । सुरासाधनीयूतानि द्रव्याणि तत्साधनप्रकारश्च सौत्रामण्यामुक्तः । ततस्तिसृषु दिनेषु सायं प्रातः प्रवर्ग्योपसदौ । चर्तुदश्यामग्नीषोमीयः पसुः, सप्तदशारन्निरेकोयूपः । तस्य सप्तदशमिर्वासोभिर्वेष्टनम् । पूर्णिमायां पात्रयोजने षोडशिपात्रमधिकम् । सुराग्रहार्थानि सप्तदश पात्राणि । द्वाविंशतिः सवनीयाः पशवः । तत्र प्रथम आग्नेयः द्वितीय ऐन्द्राग्रः, तृतीयः ऐन्द्रः, चतुर्थी मेषी सारस्वती, पञ्चमी वसा गौः ।

---

**मरु॑तो॒ यस्य॒ हि क्षये॑ पा॒था दि॒वो वि॑महसः । स सु॑गो॒पात॑मो॒ जनः॑ ॥३१॥**

**पदपाठः**- मरु॑तः । यस्य॑ । हि । क्षये॑ । पा॒थ । दि॒वः । वि॒म॒ह॒स॒ऽइति॑वि महसः ॥ सः । सु॒गो॒पात॑म॒ऽइति॑सु गो॒पात॑मः । जनः॑ ॥

**सरलार्थः**- हे विमहसः मरूतः ! यस्य यजमानस्य यज्ञगृहे यूयं सोमपानं कुरुथ । स जनः यजमानस्य सुरक्षितो भवति ॥

**म॒ही द्यौः पृ॑थि॒वी च॑ नऽइ॒मँय्य॒ज्ञम्मि॑मिक्षताम् । पि॒पृ॒तान्नो॒ भरी॑मभिः ॥३२॥**

**पदपाठः**- म॒ही । द्यौः । पृ॒थि॒वी । च॒ । न॒ः । इ॒मम् । य॒ज्ञम् । मि॒मि॒क्ष॒ता॒म् ॥ पि॒पृ॒ता॒म् । न॒ः । भरी॑मभि॒रिति॒भरी॑म भिः ॥

**सरलार्थः**- मही द्युलोकः भूलोकश्च अस्माकम् इमं यज्ञं परिपूर्णं कुर्वन्तु । भरर्णैः हिरण्यपशुधान्यादिभिः स्वैर्भागैः अस्मदीयं गृहं पूरयताम् ॥

**आति॑ष्ठ वृत्रह॒न्रथ॑म्युक्ता ते॒ ब्रह्म॑णा॒ हरी॑ । अ॒र्वा॒चीन॒ꣳ सु ते॒ मनो॒ ग्रावा॑ कृणोतु व॒ग्नुना॑ । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा षोड॒शिन॑ऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोड॒शिने॑ ॥३३॥**

**पदपाठः**- आ । ति॒ष्ठ॒ । वृ॒त्र॒ह॒न्निति॑वृत्र हन् । रथ॑म् । यु॒क्ता । ते॒ । ब्रह्म॑णा । हरी॒ऽइति॒हरी॑ ॥ अ॒र्वा॒चीन॑म्। सु । ते॒ । मनः॑। ग्रावा॑ । कृ॒णो॒तु॒ । व॒ग्नुना॑ ॥ इन्द्रा॑य । त्वा॒ । षो॒ड॒शिने॑ ॥

**सरलार्थः**- हे वृत्रहन् इन्द्र ! तव हरितवर्णौ अश्वौ त्रयीलक्षणेन "इन्द्रागच्छ" इत्यादिमन्त्रेण युक्तौ रथे संयुक्तौ वर्तेते अतः त्वं रथम् आरोह . सोमाभिषवपाषाणः तव रथारूढस्य मनः अस्मद्यज्ञाभिमुखं सुतरां करोतु . हे सोम! त्वम् उपयामेन पात्रेण गृहीतः असि । तस्मै षोडिशने इन्द्राय त्वां गृह्णामि । हे सोम ! एषाः तव योनिः इन्द्राय त्वां सादयामि ॥

**यु॒क्ष्व हि के॒शिना॒ हरी॒ वृष॑णा कक्ष्य॒प्रा । अथा॑ नऽइन्द्र सोमपा गि॒रामुप॑श्रुतिञ्चर । उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्वा षोड॒शिन॑ऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्वा षोड॒शिने॑ ॥३४॥**

**पदपाठः-** युक्क्ष्व + हि । केशिना॑ । हरी॒ऽइति॒हरि॑ । व्वृष॑णा । कक्क्ष्यप्प्रेति॑कक्क्ष्य॒ प्रा ॥ अथ॑ । नः॒ । इन्द्र॒। सो॒म॒पा॒ऽइति॑सोम पाः॒ । गि॒राम् । उप॑श्श्रुति॒मित्त्युप॑ श्रुतिम् । च॒र ॥

**सरलार्थः-** हे इन्द्र ! प्रलम्बकेसरौ तरुणो शक्तिशालिनौ हरितवर्णौ त्वदीयौअश्वौ रथेन संयोजय । रथारोहणानन्तरं हे इन्द्र ! सोमपानं कुर्वन् अस्मदीयानां ऋग्यजुःसामलक्षणानां नितराम् उपश्रवणं प्राप्नुहि । वाचं श्रुत्वा अस्मत् गृहमागच्छ । त्वम् उपयामेन गृहीतः असि । तस्मै षोडशिने इन्द्राय त्वां गृह्णामि । हे सोम! एषाः तव योनिः इन्द्राय त्वां सादयामि ॥

**इन्द्र॒मिद्धरी॑ व्वह॒तोप्प्र॑तिधृष्टशवसम् । ऋषी॑णाञ्च स्तुतीरुप॑ य॒ज्ञञ्च॒ मानु॑षाणाम् ।**

**उ॒प॒या॒मगृ॑हीतो॒सीन्द्रा॑य त्त्वा षोड॒शिन॑ऽए॒ष ते॒ योनि॒रिन्द्रा॑य त्त्वा षोड॒शिने॑ ॥३५॥**

**पदपाठः-** इन्द्र॑म् । इत् । हरी॒ऽइति॒री॑ । व्व॒ह॒तः॒। अप्प्र॑तिधृष्टशव॒समित्त्यप्प्र॑तिधृष्ट शवसम् ॥ ऋषी॑णाम् । च॒ । स्तु॒तीः। उप॑ । यज्ञम् । च॒ । मानु॑षाणाम् ॥

**सरलार्थः-** हरितवर्णौ अश्वौ वसिष्ठादीनां मुनीनां स्तुतिसमीपे इन्द्रमेव प्रापयतः । एवं च यजमानानां यज्ञसमीपे इन्द्रं वहतः । किं भूतमिन्द्रम् ! अप्रति-धृष्टशवसम् इन्द्रम् । त्वमुपयामेन गृहीतोऽसि । तस्मै षोडशिने इन्द्राय त्वां गृह्णामि । एषाः तव योनिः इन्द्राय त्वां सादयामि ॥

**यस्म्मा॒न्न जा॒तः परो॑ऽअ॒न्योऽअस्ति॒ यऽआ॑वि॒वेश॒ भुव॑नानि॒ व्विश्श्वा॑ ।**
**प्र॒जाप॑तिः प्प्र॒जया॑ स॒ꣳरराणस्त्रीणि॒ ज्ज्योती॑ꣳषि सचते॒ स षो॑ड॒शी ॥३६॥**

**पदपाठः-** यस्म्मा॑त् । न । जा॒तः । पर॑ः । अ॒न्यः । अस्ति॑ । यः । आ॒वि॒वेशेत्त्या॑ व्वि॒वेश॑ । भुव॑नानि । व्विश्श्वा॑ ॥ प्र॒जाप॑ति॒रिति॑प्र॒जा प॑तिः । प्र॒जयेति॑प्र॒ जया॑ । स॒ꣳरराण॒ऽइति॑सम् र॒रा॒णः । त्रीणि॑ । ज्योती॑ꣳषि। स॒च॒ते । सः । षो॒ड॒शी ॥

**सरलार्थः-** यस्मात् पुरुषात् अन्यः उत्कृष्टो जातो देवः न विद्यते, यश्च विश्वानि भुवनानि अन्तर्यामिरूपेण प्रविष्टवान् सः प्रजापतिः स्व-उत्पन्नप्रजापालकस्त्रीणि अग्निवायुसूर्यलक्षणानि तेजांसि विषयज्ञापकानि सेवते । किंभूतः प्रजापतिः ? प्रजारूपेण सम्यक्रममाणः तथा षोडशकलात्मकलिङ्गशरीरोपहितः सर्वव्यवहाराश्रयः इति ॥

**इन्द्र॑श्श्च स॒म्म्राड्वरु॑णश्श्च॒ राजा॒ तौ ते॑ भ॒क्षञ्च॑क्क्रतु॒रग्ग्र॑ऽएतम् । तयो॑र॒हमनु॑**
**भ॒क्षम्भ॑क्क्षयामि॒ व्वाग्दे॒वी जु॑षा॒णा सोम॑स्य तृप्प्यतु स॒ह प्प्रा॒णेन॒ स्वाहा॑ ॥३७॥**

**पदपाठः-** इन्द्र॑ः । च॒ । स॒म्म्राडिति॑स॒म् राट् । व्वरु॑णः । च॒ । राजा॑ । तौ । ते॒ । भ॒क्क्षम् । च॒क्क्र॒तुः॒ । अग्ग्रे॑। ए॒तम् ॥ तयो॑ः । अ॒हम् । अनु॑ । भ॒क्क्षम् । भ॒क्क्ष॒या॒मि॒ । व्वाक् । दे॒वी । जु॒षा॒णा । सोम॑स्य। तृ॒प्प्य॒तु । स॒ह । प्रा॒णेन॑ । स्वाहा॑ ॥

**सरलार्थः-** हे षोडशि-ग्रह ! इन्द्रावरुणौ देवौ तव एतं सोमरसं प्रथमं भक्षं चक्रतुः । किंभूतः इन्द्रः ? परमैश्वर्ययुक्तः। किंभूतो वरुणः ? राजसूययाजी । तयोः इन्द्रावरुणयोः सोमसंबन्धिनं भक्षंणानन्तरम् अहं भक्षयामि (सोमं पिबामि) । मदीयेन भक्षेण सेवमाना सरस्वती प्राणदेवतया सह सोमेन तृप्ता भवतु । इदं हविः तुभ्यं सुहुतमस्तु ॥

**अग्ग्रे॒ पव॑स्व॒ स्वपा॑ऽअस्म्मे व्वर्च्च॑ः सुवीर्य्य॑म् । दध॑द्र॒यिम्मयि॒ पोष॑म् ।**
**उ॒प॒या॒मगृ॑हीतोस्य॒ग्ग्रये॑ त्त्वा॒ व्वर्च॑स॒ऽए॒ष ते॒ योनि॑र॒ग्ग्रये॑ त्त्वा॒ व्वर्च्च॑से । अग्ग्रे॑**
**व्वर्च्च॑स्वि॒न्वर्च्च॑स्वाँस्त्वन्दे॒वेष्ष्वसि॒ व्वर्च्च॑स्वा॒नहम्म॑नु॒ष्ष्ये॑षु भूयासम् ॥३८॥**

**पदपाठः-** अग्ग्रे । पर्वस्व । स्वपाऽइतिसु अपाः । अस्म्मेऽइत्त्यस्म्मे । व्वर्च्चः । सुवीर्य्यमितिसु व्वीर्य्यम् ॥ दधत्। रयिम् । मयि । पोषम् ॥ अग्ग्रये । त्वा । व्वर्च्चसे ॥ अग्ग्रे . व्वर्च्चस्विन् । व्वर्च्चस्वान् । त्वम्। देवेषु । असि । व्वर्च्चस्वान् । अहम् । मनुष्ष्येषु । भूयासम् ॥

**सरलार्थः-** हे अग्ने ! त्वम् अस्मासु शोभनवीर्यं शोभनसामर्थ्योपेतं बह्मवर्चसं च प्रापय । किं भूतस्त्वम् ? स्वपाः एवं ऋत्विक्भिः सह संप्रार्थ्य स्वयं याचते । हे अग्ने ! त्वं मयि धनं स्थापयन् सन् पुष्टिं पुत्रपश्वादिवृद्धिं प्रवर्तय । हे सोम ! त्वयुपयामेन गृहीतोऽसि । हे ग्रह ! वर्चस्विने तेजस्विने अग्नये त्वां गृह्णामि । एषः खरप्रदेशः तव योनिः वर्चस्विने अग्नये त्वां सादयामि । हे वर्चस्विन् विशिष्टतेजोयुक्त हे अग्ने! त्वं इन्द्रादिषु देवेषु मध्ये अतिदीप्तिमानसि अतः त्वत्प्रसादात् अहमपि मनुष्येषु मध्ये ब्रह्मवर्चससंपन्नो भवेयम्॥

**उत्तिष्ठ्न्नोजसा सह पीत्त्वी शिप्प्रेऽअवेपय । सोममिन्द्र चमूसुतम् । उपयामगृहीतोसीन्द्राय त्त्वौजसऽएष ते योनिरिन्द्राय त्त्वौजसे । इन्द्रौजिष्ठौजिष्ठस्त्वन्देवेष्ष्वस्योजिष्ठोहम्मनुष्ष्येषु भूयासम् ॥३९॥**

**पदपाठः-** उत्तिष्ट्ठन्नित्त्युत् तिष्ट्ठन् । ओजसा । सह । पीत्त्वी । शिप्प्रेऽइतिशिप्प्रे । अवेपयः ॥ सोमम् । इन्द्र। चमूऽइतिचमू । सुतम् ॥ इन्द्राय । त्वा । ओजसे ॥ इन्द्र । ओजिष्ट्ठ । ओजिष्ठः । त्वम् । देवेषु। असि । ओजिष्ठः । अहम् । मनुष्ष्येषु । भूयासम् ॥

**सरलार्थः-** हे इन्द्र ! त्वम् ओजसा सह उत्तिष्ठन् सन् शिप्रे चमूसुतं सोमं पीत्वा कम्पितवान् असि । हे ग्रह ! त्वमुपयामगृहीतोऽसि । बलवते इन्द्राय त्वां गृह्णामि । एषाः तव योनिः ओजसे इन्द्राय सादयामि । हे ओजिष्ठ इन्द्र ! त्वं यथा देवेषु ओजिष्ठोऽसि तथैव अहमपि मनुष्येषु मध्ये ओजिष्ठो (अतिबलिष्ठो) भूयासम् ॥

**अदृश्श्रमस्य केतवो व्वि रश्म्मयो जनाँ॥ऽअनु । भ्राजन्तोऽअग्ग्रयो य था । उपयामगृहीतोसि सूर्य्याय त्त्वा ब्भ्राजायैष ते योनिः सूर्य्याय त्त्वा ब्भ्राजाय । सूर्य्य ब्भ्राजिष्ठ ब्भ्राजिष्ठस्त्वन्देवेष्ष्वसि ब्भ्राजिष्ठोहम्मनुष्ष्येषु भूयासम् ॥४०॥**

**पदपाठः-** अदृश्श्रम् । अस्य । केतवः । व्वि । रश्श्मयः । जनान् । अनु ॥ भ्राजन्तः । अग्ग्रयः । यथा॥ सूर्य्याय । त्वा । भ्राजाय ॥ सूर्य्य । भ्राजिष्ट्ठ । भ्राजिष्ठः । त्वम् । देवेषु । असि । भ्राजिष्ठः। अहम् । मनुष्ष्येषु । भूयासम् ॥

**सरलार्थः-** यथा ज्वलन्तः वह्नयः यमानुगता दृश्यन्ते तद्वत् अस्य सूर्यस्य प्रज्ञाहेतवः सर्वपदार्थज्ञाकृतकिरणाः सर्वप्राणिनः अनुगताः विशेषेण दृष्टुं शक्यन्ते । हे ग्रह ! त्वपुययामेन गृहीतोऽसि । तस्मै भ्राजते सूर्याय त्वां गृह्णामि। एषः तव योनिः दीप्ताय सूर्याय त्वां सादयामि । हे भ्राजिष्ठ अतिदीप्त सूर्य ! यथा त्वं देवेषु भ्राजिष्ठोऽसि तथैव अहमपि मनुष्येषु अतिदिप्तभ्राजिष्ठः भूयासम् ॥

**उदु त्त्यञ्जातवेदसन्देवँव्वहन्ति केतवः । दृशे व्विश्श्वाय सूर्य्यम् । उपयामगृहीतोसि सूर्य्याय त्त्वा ब्भ्राजायैष ते योनि सूर्य्याय त्त्वा ब्भ्राजाय ॥४१॥**

**पदपाठः-** उत् । ॐऽइत्यूँ । त्यम् । जातवेदसमितिजात व्वेदसम् । देवम् । व्वहन्ति । केतवः ॥ दृशे । व्विश्श्वाय। सूर्य्यम् ॥

**सरलार्थः-** विश्वस्य दर्शनाय जातवेदसं देवं सूर्यं प्रज्ञावन्तः किरणाः उदयाचलात् उद्गमयन्ति । उपयामेन त्वं गृहीतोऽसि। तस्मै प्राजते सूर्याय त्वां गृह्णामि । एषा तव योनिः भ्राजाय सूर्याय सादयामि ॥

आजिंग्घ्र कलशंम्मह्या त्वां व्विशन्त्विन्दंवः । पुनंरूर्ज्जा निवंर्त्तस्व सा नंः सहस्रंन्धुक्क्ष्वोरुधांरा पयंस्वती पुनर्म्माविंशताद्रयिः ॥४२॥

**पदपाठः-** आ । जिग्घ्र । कलशंम् । महि । आ । त्वा व्विशन्तु । इन्दंवः ॥ पुनंः । ऊर्ज्जा । नि । व्वर्त्तस्व। सा । नः । सहस्रंम् । धुक्क्ष्व । उरुधारेत्त्युरु धांरा । पयंस्वती । पुनंः । मा । आ । व्विशतात्। रयिः ।

**सरलार्थः-** हे यहि हे घेनो ! त्वं द्रोणकलशाख्यं पात्रम् आभिमुख्येन आध्राणं कुरु । हे धेनो ! द्रोणकलशस्थाः सोमाः त्वां प्रविशन्तु । विशिष्टरसेन पयोभूतेन सह पुनः अस्मान्प्रति निवर्तस्व । या घेनुं मया स्तुता सा अस्माकं सहस्रसंख्यं धनं देहि । अथवा यद् अस्माभिः गवां सहस्रं दत्तं तत् अस्मभ्यं पुनः देहि । त्वत्प्रसादात् उरुधारा पयस्वती धेनुः मा पुनः आगच्छतु । त्वत्प्रसादात् धनमपि माम् आविशतात् ॥

इडे रन्ते हठ्व्ये काम्म्ये चन्द्रे ज्ज्योतेदिंति सरंस्वति महि व्विश्श्रुंति ।
एता तेंऽअग्घ्ये नामांनि देवेब्भ्यों मा सुकृतंमब्रूतात् ॥४३॥

**पदपाठः-** इडें । रन्तें । हठ्ठयें । काम्म्यें । चन्द्रें । ज्योतें । अदिंति । सरंस्वति । महिं । व्विश्श्रुतीतिवि श्रुंति॥ एता । ते । ऽ अग्घ्ये । नामांनि । देवेब्भ्यंः । मा । सुकृतमितिंसु कृतंम् । ब्रूतात् ॥

**सरलार्थः-** हे महि, विश्रुति, इडे, रन्ते, हव्ये, काम्ये, चन्द्रे, ज्योते, अदिते, सरस्वति, अघ्न्ये ! तव एतानि अतिशयगुणयुक्तानि नामानि एताभिः अभिहिता सती देवेभ्यः शोभनकर्मकर्रणं त्वं मां ब्रूहि ।

व्वि नंऽइन्द्र मृधों जहि नीचा यंच्छ पृतन्न्यतः ।
योऽअस्म्माँ॥ऽअंभिदासत्त्यधंरङ्गमया तमंः । उपयामगृंहीतोसीन्द्रांय त्त्वा व्विमृधंऽएष ते योनिरिन्द्रांय त्त्वा व्विमृधें ॥४४॥

**पदपाठः-** व्वि । नः । इन्द्र । मृधंः । जहि । नीचा । यच्छ । पृतन्न्यतः ॥ यः ऽ। अस्म्मान् । अभिदासतीत्त्यंभि दासंति । अधंरम् । गमय + तमंः ॥ इन्द्रांय । त्वा । व्विमृधऽइतिंवि मृधें ॥

**सरलार्थः-** हे इन्द्र ! अस्माकं शत्रून् विशेषेण नाशय । ये शत्रवः अस्मान् प्रति संग्रामम् इच्छन्ति तान् शत्रून् नीचैः निगृहणीष्व । यः अस्मान् उपक्षयति तम् अधरं निकृष्टम् अर्वाचीनं तमः गमय । हे ग्रह ! त्वमुपयामेन गृहीतोऽसि । विमृघे इन्द्राय त्वां गृहणामि । एषाः तव योनिः विमृद्गुणविशिष्टाय इन्द्राय सादयामि ॥

व्वाचस्प्पतिंव्विश्श्वकंर्म्माणमूतयें मनोजुवंव्वाजेंऽअद्या हुंवेम । स नो व्विश्श्वांनि हवंनानि जोषद्विश्श्वशंम्भूरवंसे साधुकंर्म्मा । उपयामगृंहीतोसीन्द्रांय त्त्वा व्विश्श्वकंर्म्मणऽएष ते योनिरिन्द्रांय त्त्वा व्विश्श्वकंर्म्मणे ॥४६॥

**पदपाठः-** व्वाचः । पतिंम् । व्विश्श्वकंर्म्माणमितिंविश्श्व कंर्म्माणम् । ऊतयें । मनोजुवमितिंमनः जुवंम् । व्वाजें । अद्य । हुवेम ॥ सः । नः । व्विश्श्वांनि । हवंनानि । जोषत् । व्विश्श्वशंम्भूरितिंविश्श्व शंम्भूः । अवंसे । साधुकर्म्मेतिंसाधु कंर्म्मा ॥ इन्द्रांय । त्वा व्विश्श्वकंर्म्मणऽइतिंविश्श्व कंर्म्मणे ॥

**सरलार्थः-** अद्य अस्मिन् दिने वयं विश्वकर्माणं वाचस्पतिं, मनोजुवं, इन्द्र रक्षणाय आह्वयामः । स इन्द्रः अस्माकं सर्वाणि हवनानि अन्नसमृदध्यै रक्षणाय वा जुषताम् । किं भूतः इन्द्रः ? विश्वशम्मूः साधुकर्मा । हे ग्रह! त्वमुपयामेन गृहीतोऽसि । विश्वकर्मणे इन्द्राय सादयामि ॥

व्विश्श्वंकर्म्मन्हविषा व्वर्द्धनेन त्रातारमिन्द्रंमकृणोरवद्ध्यम् । तस्म्मै व्विशः समंनमन्त पूर्व्वीरयमुग्ग्रो व्विहव्व्यो यथासंत् । उपयामगृंहीतोसीन्द्रांय त्त्वा विश्श्वकंर्म्मणऽएष ते योनिरिन्द्रांय त्त्वा व्विश्श्वकंर्म्मणे ॥४६॥

**पदपाठः-** विश्वकर्म्मन्निति विश्व कर्म्मन् । हविषा । वर्द्धनेन । त्रातारम् । इन्द्रम् । अकृणोः । अवद्ध्यम् ॥ तस्मै । विशः । सम् । अनमन्त । पूर्वीः । अयम् । उग्रः । विहव्य इति विहव्यः । यथा । असत् ॥

**सरलार्थः-** हे विश्वकर्मन् ! वर्धमानेन हविषा त्वम् इन्द्रं जगतो रक्षकं हन्तुम् अशक्यं कृतवानसि । तादृशाय इन्द्राय प्रजाः वसिष्ठादयो मनुष्याः सम्यक् नताः । यस्मात् कारणात् अयमिन्द्रः उद्गुर्णवज्रः विहव्यः अभूत् तस्मात् विशः । हे विश्वकर्मन् ! त्वत् हविः सामर्थ्यात् इन्द्रस्य अयं प्रभावः वर्तते । त्वमुपयामेन गृहीतोऽसि। विश्वकर्मणे सर्वकर्त्रे इन्द्राय गृह्णामि । एषा तव योनिः विश्वकर्मणे इन्द्राय सादयामि ॥

**उपयामगृहीतोस्यग्ग्रये त्त्वा गायत्रच्छन्दसङ्गृह्णामीन्द्राय त्त्वा त्रिष्टुप्छन्दसङ्गृह्णामि विश्श्वेब्भ्यस्त्वा देवेब्भ्यो जगच्छन्दसङ्गृह्णाम्यनुष्टुप्तेभिगरः ॥४७॥**

**पदपाठः-** अग्ग्रये । त्वा । गायत्रच्छन्दसमिति गायत्र छन्दसम् । गृह्णामि । इन्द्राय । त्रिष्टुप्छन्दसम् । त्रिस्तुप्छन्दसमितित्रिस्तुप् छन्दसम् । विश्श्वेब्भ्यः । देवेब्भ्यः । जगच्छन्दसमितिजगत् छन्दसम् । अनुष्टुप्। अनुस्तुबित्त्यनु स्तुप् । ते । अभिगरऽइत्त्यभि गरः ॥

**सरलार्थः-** हे सोम ! त्वमुपयामेन ग्रहेण गृहीतोऽसि । हे ग्रह ! त्वां गायत्रीचन्छन्दः अग्निप्रीत्यर्थं ग्रहणामि । हे ग्रह ! त्वां त्रिष्टुप्छन्दः इन्द्रप्रीत्यर्थ ग्रहणामि । हे ग्रह ! त्वां विश्वेभ्यो देवेभ्यः प्रीत्यर्थं जगच्छन्दः ग्रहणामि। हे सोम ! अनुष्टुप्छन्दः तव स्तवनं वर्तते ॥

**व्व्रेशीनान्त्वा पत्क्मन्नाधूनोमि कुकूननानान्त्वा पत्क्मन्नाधूनोमि भन्दनानान्त्वा पत्क्मन्नाधूनोमि मदिन्तमानान्त्वा पत्क्मन्नाधूनोमि मधुन्तमानान्त्वा पत्क्मन्नाधूनोमि शुक्क्रन्त्वा शुक्क्रऽआधूनोम्म्यह्नो रूपे सूर्य्यस्य रश्मिषु ॥४८॥**

**पदपाठः-** व्व्रेशीनाम् । त्वा । पत्मन् । आ । धूनोमि । कुकूननानाम् । भन्दनानाम् । मदिन्तमानामितिमदिन् तमानाम्। मधुन्तमानामितिमधुन् तमानाम् । शुक्क्रम् । त्वा । शुक्क्रे । आ । धूनोमि । अह्नः । रूपे । सूर्य्यस्य । रश्मिषु ॥

**सरलार्थः-** हे सोम ! मेघानां वृष्टिनिष्पत्यर्थं त्वां कम्पयामि । ध्वनियुक्तमेघानां वृष्टिनिष्पत्यर्थं कम्पयामि । आनन्ददायकमेघानां पतने निमित्ते कम्पयामि । संतुष्टिप्रदमेघानां निमिते कम्पयामि । अमृतरूपमेघानां निमित्ते कम्पयामि । हे सोम ! शुद्धम् अक्लिष्टकर्माणं त्वां शुद्धे अक्लिष्टकर्मणि जले आधूनोभि । दिवसस्य सूर्यस्य रश्मिषु त्वां कम्पयामि ॥

**ककुभꣳ रूपँव्वृषभस्य रोचते बृहच्छुक्क्रः शुक्क्रस्य पुरोगाः सोमः सोमनस्य पुरोगाः । यत्ते सोमादाब्भ्यन्नाम जागृवि तस्मै त्त्वा गृह्णामि तस्मै ते सोम सोमानय स्वाहा ॥४९॥**

**पदपाठः-** ककुभम् । रूपम् । व्वृषभस्य । रोचते । बृहत् । शुक्क्रः । शुक्क्रस्य । पुरोगाऽइतिपुरः गाः । सोमः। सोमस्य । पुरोगाऽइतिनपुरः गाः ॥ त्वा । गृह्णामि ॥

**सरलार्थः-** हे सोम ! श्रेष्ठस्य तव महत आदित्यलक्षणं रूपं दीप्यते । महान् शुद्धः आदित्यः सोमस्य पुरोगामी वर्तते। हे सोम ! त्वदीयम् अनुपहिसितं जागरणशीलं यत् नामास्ति । तादृशं त्वां गृहणामि । हे सोम ! तादृशाय तुभ्यं सुहुतमस्तु ।

**उशिक्क्त्वन्देव सोमाग्ग्रेः प्प्रियम्पाथोपीहि व्वशी त्त्वन्देनव सोमेन्द्रस्य प्प्रियम्पाथोपीह्यस्म्मत्त्सखा त्त्वन्देव सोम विश्श्वेषान्देवानाम्प्रियम्पाथोपीहि ॥५०॥**

**पदपाठः-** उशिक् । इहि । वशी । इन्द्रस्य । अस्मत्त्सखेत्त्यस्मत् सखा । विश्श्वेषाम् । देवानाम् ॥

**सरलार्थः-** हे देव दीप्यमान सोम ! त्वं कामयमानः अग्नेः अन्नम् अपि-गच्छ । हे सोम ! त्वं कान्तः इन्द्रस्य प्रियमन्नं प्राप्नुहि । हे सोम ! त्वम् अस्माकं मित्रमूतविश्वेषां देवानां अभिरुचितमन्नं प्राप्नुहि ॥

**इह रतिरिह रमद्ध्वमिह धृतिरिह स्वधृतिः स्वाहा । उपसृजन्धरुणम्मात्रे**
**धरुणो मातरन्धयन् । रायस्पोषमस्म्मासु दीधरत्त्स्वाहा ॥५१॥**

**पदपाठः-** इह । रतिः । रमद्ध्वम् । धृतिः । स्वधृतिरितिस्व धृतिः । स्वाहा ॥ उपसृजन्नित्त्युप सृजन् । धरुणम्। मात्रे । धरुणः । मातरम् । धयन् ॥ रायः । पोषम् । अस्म्मासु । दीधरत् । स्वाहा ॥

**सरलार्थः-** हे गावः ! युष्मदीयं रमणम् इह यजमानेषु अस्तु । इह एव यूयं रमध्वम् । युष्माकम् इह यजमानेषु संतोषः अस्तु । स्वकीयानामपि धृतिः ईहैव अस्तु । इदं हविः तुभ्यं सुहुतमस्तु । अग्निः अस्मासु धनस्य पशुपुत्रसुवर्णादेः पुष्टिं धारयतु । किंभूतो धरुणः ? मातुः पृथिव्याः दारयितारम् अग्निं समीपं प्रापयन् तथा मातरं पृथिवीं पिबन् । तत्रोत्पन्नं हविः भक्षयन् । इंद हविः तुभ्यं सुहुतमस्तु ॥

**सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम ।**
**दिवम्पृथिव्याऽअद्ध्यारुहामाविदाम देवान्त्स्वज्ज्योतिः ॥५२॥**

**पदपाठः-** सत्रस्य । ऋद्धिः । असि । अगन्म । ज्योतिः । अमृताः । अभूम ॥ दिवम् । पृथिव्याः । अधि । आ । अरुहाम । अविदाम । देवान् । स्वः । ज्योतिः ॥

**सरलार्थः-** हे सोम ! सत्रस्य समृद्धिः त्वमसि । अतः वयं यजमानाः आदित्यलक्षणं ज्योतिः प्राप्ताः । ततः अमरणधर्मा भूताः । वयं पृथिव्याः सकाशात् द्युलोकं च आरुढाः सन्तः इन्द्रादिदेवान् जानीमः, ज्योतिरूपं स्वर्गं च पश्यामः ॥

**युवन्तमिन्द्रापर्व्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतँव्वज्ज्रेण**
**तन्तमिद्धतम् । दूरे चत्ताय च्छन्त्सद्गहनँय्यदिनक्षत् । अस्म्माकःशत्रून्परि**
**शूर व्विश्श्वतो दर्म्मा दर्षीष्ट व्विश्श्वतः । भूर्भुव स्वः सुप्प्रजाः प्प्रजाभिः**
**स्याम सुवीरान व्वीरैः सुपोषाः पोषैः ॥५३॥**

**पदपाठः-** युवम् । तम् । इन्द्रापर्व्वता । पुरोयुधेतिपुरः युधा । यः । नः । पृतन्यात् । अप । तन्तमितितम् तम् । इत् । हतम् । व्वज्रेण । तन्तमितितम् तम् । इत् ॥ हतम् ॥ दूरे । चत्ताय । छन्त्सत् । गहनम्। यत् । इनक्क्षत् ॥ अस्म्माकम् । शत्रून् । परि । शूर । व्विश्श्वतः । दर्म्मा । दर्षीष्ट । व्विश्श्वतः॥ स्याम । सुवीराऽइतिसु व्वीराः । व्वीरैः । सुपोषाऽइतिसु पोषाः । पोषैः ॥

**सरलार्थः-** शत्रूणां पुरतः युद्धस्य कर्तारौ हे इन्द्रपर्वतौ ! युवां शत्रुं विनाशयतम् । वज्राख्येन आयुधेन शत्रुं विनाशयतम्। यः शत्रुः अस्मान् सेना रहितं कुर्यात् । हे शूर इन्द्र ! त्वदीयः वज्रः यदा अत्यन्तगम्भीरं वनं जलं वा प्रति दूरे गतं शत्रुं प्राप्तुं कामयते तदा तमपि दूरगतं प्राप्नुयात् । विदारणशीलं वज्रः अस्मदीयान् सर्वतः स्थितान् शत्रून् परितः विदारयतु । वयं प्रजाभिः वीरैः पुत्रैः सुवीराः भवेम । पुष्टिभिः सुपोषाः भवेम ॥

**परमेष्ठ्यभिधीतः प्प्रजापतिर्व्वाचि व्याहृतायामन्धोऽअच्छेतः सविता**
**सन्याँव्विश्श्वकर्म्मा दीक्षायाम्पूषा सोमक्क्रयण्यामिन्द्रश्श्च ॥५४॥**

**पदपाठः-** परमेष्ठी । परमेस्थीतिपरमे स्थी । अभिधीतऽइत्त्याभि धीत । प्रजापतिरितिप्रजा पतिः । व्वाचि । व्याहृतायामितिवि आहृतायाम् । अन्धः । अच्छेतऽइत्त्यच्छ इतः । सविता । सन्याम् । विश्श्वकर्म्मेतिविश्श्व कर्म्मा । दीक्क्षायाम् । पूषा । सोमक्क्रयण्यामितिसोम क्रयण्याम् ॥

**सरलार्थः-** यदा सोमः यजमानेन संकल्पितो भवति मनसाभिध्यातः भवति । तदा परमेष्ठी भवति । 'सोमेन यक्ष्ये' इति वचस्युच्चारिते सति सोमः प्रजापतिनामको भवति । यदा सोमः अच्छाभिमुख्येन प्राप्तः तदा अन्धो भवति । सोमस्य संभक्तौ सत्यां सोमः सपितृनामको भवति । दीक्षायां सत्यां सोमः विश्वकर्मा इति उच्यते॥ सोमक्रयणी गौः तस्याम् आनीतायां सत्यां सोमः पूषा भवति ॥

**इन्द्रश्च म॒रुत॑श्च क्क्र॒यायो॑पोत्त्थितोसु॑रः पण्ण्यमा॑नो मि॒त्रः**
**क्क्री॒तो व्विष्ण्णुः॑ शिपिवि॒ष्ट्टऽऊ॒रावास॑न्नो॒ व्विष्ण्णु॑र्न्न॒रन्धि॑षः**
**प्प्रो॒ह्यमा॑णः सोम॑ः ॥५५॥**

**पदपाठः-** इन्द्र॑ः । च॒ । म॒रुत॑ः । च॒ । क्र॒याय॑ । उ॒पोत्थि॑त॒ऽइत्त्यु॑प उत्थितः । असु॑रः । प॒ण्ण्यमा॑नः । मि॒त्रः। क्री॒तः । व्विष्ण्णु॑ः । शि॒पि॒वि॒ष्ट॒ऽइति॑शिपि व्वि॒ष्ट॒ः । ऊ॒रौ । आस॑न्न॒ऽइत्त्या स॑न्नः । व्विष्ण्णु॑ः । न॒रन्धि॑षः॥

**सरलार्थः-** क्रयाय द्रव्यदानेन आत्मसात्करणाय उपस्थापितः सोमः इन्द्रमरुत् नामकश्च भवति । क्रीयमाणः सोमः असुरो भवति । यजमानेन क्रीतः सोमः मित्रो भवति । यजमान-उत्संङ्गे स्थितः सोमः शिपिविष्टो विष्णुर्भवति। शकटेन उह्यमानः सोमः विष्णुर्नरन्धिषः भवति ॥

**प्प्रो॒ह्यमा॑णः सोम॒ऽआग॑तो व्वरु॑णऽआस॒न्द्यामास॑न्नो॒ग्ग्निराग्ग्नी॑द्ध्र॒ऽइन्द्रो॑**
**हवि॒र्द्धाने॒थ॑र्व्वोपावह्रि॒यमा॑णो॒ व्विश्श्वे॑ दे॒वाः ॥५६॥**

**पदपाठः-** प्रो॒ह्य्यमा॑णः । प्रो॒ह्य्यमा॑न॒ऽइति॑प्र उ॒ह्य्यमा॑नः । सोम॑ः । आग॑त॒ऽइत्त्या ग॑तः । व्वरु॑णः । आ॒स॒न्द्यामित्त्या॑ स॒न्द्याम् । आस॑न्न॒ऽइत्त्या स॑न्नः । अ॒ग्ग्निः । आग्ग्नी॑ध्रे । इन्द्र॑ः । ह॒वि॒र्द्धा॒न॒ऽइति॑हविः धाने॑ । अथ॑र्व्वा। उ॒पा॒व॒ह्रि॒यमा॑ण॒ऽइत्त्यु॑प ॑अ॒व॒ह्रि॒यमा॑णः ॥

**सरलार्थः-** शकटात् आगतः अवरूढः सोमनामको भवति । आसन्द्याम् उपविष्टः सोमः वरुणो भवति । आग्नीध्रे वर्तमानः सोमः अग्निर्भवति । हविर्धाने वर्तमानः सोमः इन्द्रो भवति । 'हृदेत्वा मनसे त्वा' इति मन्त्रेण कण्डनार्थम् आनीयमानः सोमः अथर्वनामको भवति ॥

**व्विश्श्वे॑ दे॒वाऽअ॒ꣳशुषु॒ न्न्युप्प्तो॒ व्विष्ण्णु॑राप्प्रीत॒पाऽआ॑प्प्या॒य्यमा॑नो**
**य॒मः सू॒यमा॑नो॒ व्विष्ण्णुः॑ सम्भ्रि॒यमा॑णो व्वा॒युः पू॒यमा॑नः शु॒क्क्रः**
**पू॒तः शु॒क्क्रः क्क्षीर॑श्श्रीर्म्म॒न्थी स॑क्क्तुश्श्रीर्व्विश्श्वे॑ दे॒वाः ॥५७॥**

**पदपाठः-** व्विश्श्वे॑ । दे॒वाः । अ॒ꣳशुषु॑ । न्न्युप्प्त॒ऽइतिनि उप्प्तः । व्विष्ण्णु॑ः । आ॒प्प्रीत॒पा॒ऽइत्त्या॑प्प्रीत पाः । आ॒प्प्या॒य्य॒मा॑न॒ऽइत्त्या॑ प्प्या॒य्यमा॑नः । य॒मः । सू॒यमा॑नः । व्विष्ण्णु॑ः । स॒म्भ्रि॒यमा॑ण॒ऽइति॑सम् भ्रि॒यमा॑णः । व्वा॒युः। पू॒यमा॑नः । शु॒क्क्रः । पू॒तः । शु॒क्क्रः । क्षी॒र॒श्श्री॒रिति॑क्क्षीर॒ श्रीः । म॒न्थी । स॒क्क्तु॒श्श्री॒रिति॑सक्क्तु॒ श्रीः ॥

**सरलार्थः-** ''अꣳशुरꣳशुष्टे'' इत्यादि मन्त्रेण वर्ध्यमानः सोमः आप्रीतपाः विष्णुर्भवति । अभिपूयमानः सोमः यमो भवति । पुष्यमाणः सोमः विष्णुर्भवति । दशापवित्रेण पूयमानः सोमो वायुर्भवति । पूतः सोमः शुक्रो भवति। यदा क्षीरेण दुग्धेन मिश्रीक्रियते तदा शुक्रः एव सोमो भवति । सक्तुभिः मिश्रितः सोमः मन्थी भवति॥

**विश्श्वे॑ दे॒वाश्श्चम॒सेषून्नी॑तोसु॒र्होमा॑योद्द्य॑तो रु॒द्रो हू॒यमा॑नो॒ व्वातो॒ब्भ्यावृ॑त्तो**
**नृ॒चक्क्षाः॒ प्प्रति॑क्ख्यातो भ॒क्क्षो भ॒क्क्ष्यमा॑णः पि॒तरो॑ नाराश॒ꣳसाः**
**स॒न्नः सिन्धु॑ः ॥५८॥**

**पदपाठः-** व्विश्श्वे॑ । दे॒वाः । च॒म॒सेषु॑ । उन्नी॑त॒ऽइत्त्युत् नी॑तः । असु॑ः । होमा॑य । उद्द्यनत॒ऽइत्युत् य॑तः । रु॒द्रः। हू॒यमा॑नः । व्वात॑ः । अ॒ब्भ्यावृ॑त्त॒ऽइत्त्य॑भि॒ आवृ॑त्तः । नृ॒चक्क्षा॒ऽइति॑नृ चक्क्षा॑ः । प्रति॑क्ख्यात॒ऽइति॒प्प्रति॑ ख्यातः । भ॒क्क्षः । भ॒क्क्ष्यमा॑णः । पि॒तर॑ः । ना॒रा॒श॒ꣳसाः ॥

**सरलार्थः-** चमसेषु गृहीतः सोमः विश्वदेवसंज्ञो भवति । होमार्थमुद्यतः सोमः असुसंज्ञो भवति । हूयमानः सोमः रुद्रो भवति । होमशेषीभूतम् फलम् प्रति भक्षणार्थमानीतः सोमः वातो भवति । प्रतिख्यातः 'ब्रह्मन्-उपह्वयस्व' इत्यादिना भक्षणार्थं पृष्टः सोमः नृचक्षाः भवति । पीयमानः सोमः भक्षो भवति । भक्षयित्वा स्वखरेषु सादितः सोमः नाराशंसाः पितरो भवति ॥

**स॒न्न्ः सिन्धु॑रवभृ॒थायोद्य॑तः समु॒द्रोब्भ्यवह्रि॒यमा॑णः सलि॒लः प्रप्प्लु॑तो॒ ययो॒रोज॑सा स्कभि॒ता रजा॑ᳪसि व्वी॒र्य्ये॑भिर्व्वी॒रत॑मा॒ शवि॑ष्ठा । या पत्त्ये॑ते॒ऽअप्प्र॑तीता॒ सहो॑भि॒र्व्विष्ण॑ूऽअग॒न्वरु॑णा पू॒र्व्वहू॑तौ ॥५९॥**

**पदपाठः-** स॒न्न्ः । सिन्धुः॑ । अ॒व॒भृ॒थायेत्त्य॑व भृ॒थाय॑ । उद्य॑त॒ऽइत्युत् य॑त । स॒मु॒द्र । अ॒ब्भ्य॒व॒हि॒यमा॑ण॒ऽइत्त्या॑भि १अ॒व॒हि॒यमा॑ण । स॒लि॒ल । प्रप्प्लु॑त॒ऽइति॒प्र प्लु॑त । ययोः॑ । ओज॑सा । स्क॒भि॒ता । रजा॑ᳪसि । व्वी॒र्ये॑भि । व्वी॒रत॒भेति॑वी॒र त॑मा । शवि॑ष्ठा ॥ या । पत्त्ये॑ते॒ऽइति॒पत्त्ये॑ते । अप्प्र॑ती॒तेत्त्यप्प्र॑ति इता । सहो॑भि॒रिति॒सह॑ भि । व्विष्णू॒ऽइति॒विष्णू॑ । अ॒ग॒न् । व्वरु॑णा । पू॒र्व्वहू॑ता॒विति॑पू॒र्व्व हू॑तौ ॥

**सरलार्थः-** अवभृथार्थमुद्यतः सोमः सिन्धुर्भवति । जलमभिमुखं नीयमानः सोमः समुद्रो भवति । अप्सुप्रप्लुतः सोमः सलिलं भवति । एताभिः यज्ञाहुतिभिः यज्ञः चिकित्सितः प्रतिसंहितश्च भवति । पूर्वहूतौ विष्णुवरुणौ प्रति हविः समर्प्यते । ययोः विष्णुवरुणयोः ओजसा बलेन राजांसि स्तम्भितानि । किं भूतौ विष्णुवरुणौ ? वीर्यैः बलैः वीरतमौ, अत्यन्तं बलवन्तौ शविष्ठौ अप्रतिगतौ एवं विद्यौ विष्णुवरुणौ प्रति कूर्दित्वहविः गता॥

**दे॒वान्दिव॑मग॒न्य॒ज्ञस्त्ततो॑मा॒ द्रवि॑णमष्टु मनु॒ष्या॒न॒न्तरि॑क्षमग॒न्य॒ज्ञस्त्ततो॑ मा॒ द्रवि॑णमष्टु पि॒तॄन्पृ॑थि॒वीम॑ग॒न्य॒ज्ञस्त्ततो॑ मा॒ द्रवि॑णमष्टु यङ्कञ्च॑ लो॒कमग॑न्य॒ज्ञस्त्ततो॑ मे भ॒द्रम॑भूत् ॥६०॥**

**पदपाठः-** दे॒वान् । दिव॑म् । अ॒ग॒न् । य॒ज्ञः । तत॑ः । मा॒ । द्रवि॑णम् । अ॒ष्टु । म॒नु॒ष्या॒न् । अ॒न्तरि॑क्षम्। पि॒तॄन् । पृ॒थि॒वीम् । यम् । कम् । च॒ । लो॒कम् । अग॑न् । य॒ज्ञ । तत॑ः । मे॒ । भ॒द्रम् । अ॒भू॒त्॥

**सरलार्थः-** अयं यज्ञः देवान् वारवादीन्प्राप्य द्युलोकम् अगच्छत् । ततः द्युलोकस्थाद् यज्ञात् विशिष्टभोगसाधनरूपं धनं यज्ञफलभूतं मां प्याप्नोतु । द्युलोकात् अवरोहनकाले यज्ञः मनुष्यलोकमागच्छन् अन्तरिक्षलोकं गतः । तत्र स्थितात् यज्ञात् द्रविणं यज्ञफलं मां प्याप्नोतु । अयं यज्ञः धूम्रादिमार्गेण पितृन् प्राप्य भूलोकं गतः । तत्र स्थितात् यज्ञात् द्रविणं प्याप्नोतु . किं बहुना । यं कंच लोकं यज्ञः गतः तस्मात् यज्ञात् मम भद्रं कल्याणं भूयात् ॥

**चतु॑स्त्रि॒ᳪशत्त॒न्त॑वो॒ ये व्वि॑तत्त्नि॒रे यऽइ॒मम्य॒ज्ञᳪ स्व॒धया॒ दद॑न्ते । तेषा॑ञ्छि॒न्नᳪ सम्वे॒तद्द॑धामि॒ स्वाहा॑ घ॒र्म्मोऽअप्ये॑तु दे॒वान् ॥६१॥**

**पदपाठः-** चतु॑स्त्रिᳪश॒दिति॒चतु॑ः त्रिᳪशत् । तन्त॑वः । ये । व्वि॒त॒त्त्नि॒र॒ऽइति॑वि त॒त्त्नि॒रे । ये । इ॒मम् । य॒ज्ञम् । स्व॒धया॑ । दद॑न्ते ॥ तेषा॑म् । छि॒न्नम् । सम् । ऊँऽइत्त्यूं । ए॒तत् । द॒धा॒मि॒ । स्वाहा॑ । घ॒र्म्मः । अपि॑। ए॒तु । दे॒वान् ॥

**सरलार्थः-** प्रायश्चित्तशमनेन परमेष्ठ्यादयः चतुस्त्रिशत्संख्याकाः देवाः यज्ञं विस्तारयन्ति । ये च इमं स्वधयान्नेन धारयन्ति तेषां देवानां यत् छिन्नं तत् अहं संदघामि । इदं हविः तुभ्यं सुहुतमस्तु । अनेन घृतहोमेन महावीरः संहितो भवति । महावीरः सविता देवान्प्रति गच्छतु ॥

**य॒ज्ञस्य॒ दोहो॒ व्वित॑तः पु॒रु॒त्रा सोऽअ॑ष्ट॒धा दिव॑म॒न्वात॑तान । स य॑ज्ञ धु॒क्ष्व॒ महि॑ मे प्प्र॒जाया॑ᳪ रा॒यस्पोष॒ँव्विश्व॒मायु॑रशीय॒ स्वाहा॑ ॥६२॥**

**पदपाठः-** य॒ज्ञस्य॑ । दोह॑ः । व्वित॑त॒ऽइति॒वि त॑तः । पु॒रु॒त्रेति॑पु॒रु त्रा । सः । अ॒ष्ट॒धा । दिव॑म् । अ॒न्वात॑ता॒नेत्त्य॑नु

आर्तताने ॥ स । यज्ञ । धुक्क्ष्व । महि । मे । प्रजायामितिप्र जायाम् । रायः । पोषम् । विश्श्वम्।
आयुः । अशीय । स्वाहा ॥

**सरलार्थः-** हे यज्ञ ! सः त्वं मम प्रजायां सन्ततौ महिमानं देहि । अहं च त्वत् प्रसादात् धनस्य पुष्टिं सर्वमायुः च प्याप्नुयाम् । सः कः ? यस्य यज्ञस्य आहुतिपरिमाणः सः प्रसिद्धः यज्ञफलरूपः पुरूत्रा विततः प्रसृतः सन् दिग्भेदेन अष्टधा भिद्यमानः द्युलोकम् अन्वाततान । भूमिमन्तरिक्षं च प्राप्य स्वर्गं प्राप्य इति । बह्मादिस्तम्बपर्यन्तः भूतग्रामः यज्ञपरिमाणः इति भावः ॥

**आपवस्व हरिण्यवदश्श्ववत्सोम व्वीरवत् । व्वाजङ्गोमन्तमाभर स्वाहा ॥६३॥**

**पदपाठः-** आ । पवस्व । हिरण्यवदितिरहिरण्य व्वत् । अश्श्ववदित्यश्श्व व्वत् । सोम । व्वीरवदितिवीर व्वत्॥
व्वाजम् । गोमन्तमितिगो मन्तम् । आ । भर । स्वाहा ॥

**सरलार्थः-** हे सोम ! त्वम् आगच्छ । तत्र क्रियाविशेषणानि भवन्ति । कनकयुक्तं, अश्वयुक्तं, वीरयुक्तं च मह्यं देहि । हे सोम धेनुयुक्तम् अन्नं देहि । इदं हविः तुभ्यं सुहुतमस्तु ॥

## शब्दार्थः

**विमहसः** - विशिष्टेन महसा तेजसा युक्ताः, **भरीमभिः** - भरणैः हिरण्यपशुधान्यादिभिः, **पिप्रताम्** - पूरयताम्, **वग्नुना** - वाचा, **कक्ष्यप्रौ** - स्थूलावयवो, **हरी** - हरितवर्णौ अश्वौ, **स्वपाः** - कर्मनामधेयम्, **ओजसा** - बलेन, **शिप्रे** - हनु (नासिके), **केतुः** - प्रज्ञानामसु पठितम्, **भ्राजिष्ठः** - अतिदीप्तः, **उरुधारा** - बहुपयोयुक्ता, **सुकृतम्** - शोभनकर्मकारिणम्, **ग्रहः** - सोमरसः, **अभिगरः** - स्तवनम्, **योनिः** - स्थानम्, **चत्ताय** - गताय, **तन्तवः** - देवाः ।

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) 'योनिः' शब्दस्य अर्थः ........................ भवति । (स्थानम्, कलशन्, विस्तारः)

(२) द्रोणकलशस्य आभिमुख्येन आघ्राणं ........................ करोति । (वायुः, धेनुः, यजमानः)

(३) ........................ अस्माकं शत्रून् नाशयति । (वरूणः, सूर्यः, इन्द्रः)

(४) सोमरसः ........................ पात्रेण ग्रहीतो वर्तते । (उपयामेन, स्रुवेण, स्क्येन)

(५) सत्रस्य समृद्धिः ........................ देवः वर्तते । (सोमः, अग्निः, सूर्यः)

२. **निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) के विमहसः सन्ति?

(२) हरितवर्णौ अश्वौ कस्य वर्तेते?

(३) वृत्रहन् 'इति विशेषणं' कस्य देवस्य वर्तते?

(४) 'ग्रहः' इत्यस्य कः अर्थः भवति?

(५) अग्निदेवः अस्मभ्यं किं ददाति?

३. **(अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) मही द्यौः पृथिवी च नऽइमँय्यज्ञम्मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥

(२) आजिग्घ्र कलशम्महया त्त्वा विशन्त्विन्दवः । पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्रन्धुक्क्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः ॥

(३) यज्ञस्य दोहो विततँ पुरुत्रा सोऽअष्टधा दिवमन्वाततान । स यज्ञ धुक्ष्व महि मे प्रजायाᳬं रायस्पोषँविश्वमायुरशीय स्वाहा ॥

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) उदुत्यम् ।

(२) इडे रन्ते ।

(३) सत्रस्यऽऋद्धिः ।

**४. टिप्पणी लेख्या ।**

(१) वाजपेययागस्य निरूपणं कुरुत ।

(२) अस्य पाठस्य अन्तिमपञ्चमन्त्राणां विषयनिरूपणं कुरुत ।

**५. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) हरितवर्णो

(२) इन्द्रम्

(३) षोडशिने

(४) मानुषाणाम्

(५) अग्ने

**६. क्रियापदानां परिचयं लिखत ।**

(१) तृप्यतु

(२) भूयासम्

(३) सन्ति

(४) प्राप्नुताम्

(५) स्थः

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) मृधो जहि

(२) पुनरुर्ज्जा

(३) अस्यगन्म

(४) इद्धतम्

(५) ऊरावासन्नः ।

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) वयोः + ओजसा

(२) पूयमानः + शुक्रः

(३) लोकम् + अगन्

(४) कम् + च

(५) ततः + मे

**छात्र-प्रवृत्तिः**

- छात्राः वाजपेययागस्य यज्ञीयपात्राणाम् अवलोकनं कुर्युः ।

**विशिष्टज्ञानम्**

- शुचिः पावको अद्भुतः । (ऋ. १/१४२/३)

  शुचिर्नामकः अग्निः अद्भुतः वर्तते ।

# १२ शुक्लयजुर्वेदे नवमोऽध्यायः १

**प्रस्तावना**

प्रस्तुतेऽस्मिन् पाठे राजसूययागास्य वर्णन कृतमस्ति । पाठेऽस्मिन् शुक्लयजुर्वेदस्य माध्यन्दिनी शाखायाः नवमाध्यायस्य प्रथमतः विंशतिपर्यन्ताः मन्त्राः संगृहीताः सन्ति ।

अथ राजसूयस्वरूपम् – अत्राभिषिक्तस्य क्षत्रियमात्रस्याधिकारो नेतरयोर्ब्राह्मणवैश्ययोः अत्रानुमत्याद्या इष्टयः, सामप्रधाना एव, न परस्परमङ्गाङ्गिभावः । फाल्गुनशुक्लप्रतिपदि तस्यारम्भः । तत्र प्रथमं पवित्राख्यः सोमयागः । तत्र चतस्त्रो दीक्षास्तिस्रः उपसद एका सुत्या । अष्टदिनसाध्योऽयं यागः फाल्गुनशुक्लाष्टम्यां परिसमाप्यते । अस्य राजकर्तृकत्वात्तस्य सोमभक्षणनिषेधात् न्यग्रोधस्य सफलाङ्कुरानादाय तस्य सोमेन साकं क्रयणादीन् संस्काराननुष्ठाय दध्ना सह संमेल्य चमसोन्नयनकाले यजमानचमसे तमेव रसं गृह्णीयात् । होमकाले च तं हुत्वा तमेव भक्षयेत् । इतरेषु चमसेषु सोमरसग्रहणं तस्यैव होमो भक्षणं च । अतोऽत्र फलचमस- (न्यग्रोधास्तिभि) – निर्मितो रसो यजमानस्यैव, नेतरेषाम्। अवभृथान्ते तिस्त्रोऽनूबन्ध्याः उदवसानीयास्थाने त्रैधातवीया ।

ततो दशम्यामनुमतीष्टिः, तत्राष्टाकपालः पुरोडाशो द्रव्यम् । एका दश्यामाग्रावैष्णवो द्वादशकपालः द्वादस्यामग्नीषोमीय एकादशकपालः त्रयोदश्यामैन्द्राग्नो द्वादशकपालः । चतुर्दश्यां यवाग्रहणं व्रीह्याग्रंहणं चेति पञ्चेष्टयः । ततः फाल्गुन्यां पूर्णिमायां राजसूयान्तर्गतचातुर्मास्थप्रयोगः । तत्र प्रथमं पूर्णिमायां वैश्वदेवपर्व । ततश्चैत्रकृष्णप्रतिपत्प्रभूतिं चैत्रामान्तं तत्र प्रथमं पूर्णिमाया पौर्णमासेष्टिः प्रकृतिवत् । तत्रश्चैत्रशुक्लप्रतिपत्प्रभृति चैत्रशुक्लपौर्णमासीपर्यन्तं प्रत्यहं दर्शेष्टिः प्रकृतिवत् पिण्डपितृयज्ञं वर्जयित्वा । प्रतिपदितु राजसूयेष्ट्यन्तरं नित्यदर्शपूर्णमासेष्टिः, नित्यः पिण्डपितृयज्ञश्च । ततो वैशाख-ज्येष्ठा-ऽऽषाठ-मासेषु एवमेव कृष्णपक्षेषु पौर्णमासोष्टिः, शुक्लपक्षेषु दर्शेष्टिः । तत्र प्रतिपत्सु नित्येष्टयोऽपि, कर्तव्याः । प्रतिवर्षं चातुर्मास्यानुतिष्ठतो यजमानस्य तत्तत्पर्वकाले तानि तानि नित्यानि पर्वाणि पूर्वमनुष्ठायैव अनन्तरं राजसूयिकानि पर्वाण्यनुष्ठेयानि ।



## हरिःॐ

**देवं सवितः प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय । दिव्व्यो गन्धर्व्वः केतपूः केतन्नः पुनातु व्वाचस्प्पतिर्व्वाजनन्नः स्वदतु स्वाहा ॥१॥**

**पदपाठः-** देवं । सवितरितिसवितः । प्र । सुव । यज्ञम् । प्र । सुव । यज्ञपतिमितियज्ञ पतिम् । भगाय॥ दिव्व्यः । गन्धर्व्वः । केतपूरितिकेत पूः । केतम् । नः । पुनातु । व्वाचः । पतिः । व्वाजम्। नः । स्वदतु । स्वाहा ॥

**सरलार्थः-** हे सवितः ! हे देव दीप्यमान ! वाजपेयलक्षणं यज्ञं प्रवर्तय । अनुष्ठानरूपाय ऐश्वर्याय यजमानं प्रेरय। त्वत्प्रसादात् दिवि दिव्यः गन्धर्वः, अन्नस्य प्रापयिता सूर्यमण्डलरूपः देवः अस्माकम् अन्नं शोधयतु । त्वत्प्रसादात् प्रजापतिः अस्माकमन्नं हविर्लक्षणम् आस्वादयतु । इदं हवि तुभ्यं सुहुतमस्तु ॥

**ध्रुवसदन्त्वा नृषदम्मनःसदमुपयामगृहीतोसीन्द्राय त्त्वा जुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम् । अप्प्सुषदन्त्वा धृतसदँव्व्योमसदमुपयामगृहीतोसीन्द्राय त्त्वा जुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम्। पृथिविसदन्त्वान्तरिक्क्षसदन्दिविसदेन्देवसदन्नाकसदमुपयामगृहीतोसीन्द्राय त्त्वा जुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम् ॥२॥**

**पदपाठः-** ध्रुवसदमितिध्रुव सदम् । त्वा । नृषदम् । नृषदतिनृ सदम् । मनःसदमितिमनः सदम् । इन्द्राय । त्वा। जुष्टम् । गृह्णामि । जुष्टतममितिजुष्ट तमम् ॥ अप्प्सुपदम् । अप्प्सुसदमित्त्यप्प्सु सदम् । घृतसदमितिघृत सदम् । व्व्योमसदमितिव्व्योम सदम् ॥ पृथिविसदमितिपृथिवि सदम् । अन्तरिक्क्षसदमित्त्यन्तरिक्क्ष सदम्। दिविसदमितिदिवि सदम् । देवसदमितिदेव सदम् । नाकसदमितिनाक सदम् ॥

**सरलार्थः-** हे सोम ! त्वम् उपयामेन पात्रेण गृहितोऽसि । इन्द्रास्य त्वां गृह्णामि ।

हे ग्रह ! एषः स्वरप्रदेशः तव स्थानं वर्तते । अतः त्वामिन्द्राय गृह्णामि ॥

**अपाꣳ रसमुद्द्वयसꣳ सूर्य्ये सन्तꣳ समाहितम् । अपाꣳ रसस्य यो रसस्तँव्वो गृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्राय त्त्वा जुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम् ॥३॥**

**पदपाठः-** अपाम् । रसम् । उद्द्वयसमित्युत् व्वयसम् । सूर्य्ये । सन्तम् । समाहितमितिसम् आहितम् ॥ अपाम्। रसस्य । यः । रसः । तम् । व्वः । गृह्णामि । उत्तममित्युत् तमम् ॥

**सरलार्थः-** सूर्ये स्थापितम् उदकानां रसम् अहम् गृह्णामि । वायुना एव धान्यानि निष्पाद्यन्ते । हे देवाः ! युष्मदर्थं प्रजापतिं गृह्णामि । सोमरूपेण वायुतदभिमानिनं प्रजापतिं च गृह्णामि ।

**ग्रहाऽऊर्ज्जाहुतयो व्यन्तो व्विप्प्राय मतिम् । तेषाँव्विशिप्प्रियाणाँव्वोहमिषमूर्ज्जꣳ समग्ग्रभमुपयामगृहीतोसीन्द्राय त्त्वा जुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम् । सम्पृचौ स्त्थः सम्मा भद्रेण पृङ्क्तँव्विपृचौ स्त्थो व्वि मा पाप्म्मना पृङ्क्तम् ॥४॥**

**पदपाठः-** ग्रहाः । ऊर्ज्जाहुतयऽइत्त्यूर्ज्जा आहुतयः । व्व्यन्तः । व्विप्प्राय । मतिम् ॥ तेषाम् । व्विशिप्प्रियाणामितिवि शिप्प्रियाणाम् । व्वः । अहम् । इषम् । ऊर्ज्जम् । सम् । अग्ग्रभम् ॥ सम्पृचावितिसम् पृचौ । स्त्थः। सम् । मा । भद्रेण । पृङ्क्तम् । व्विपृचावितिवि पृचौ । स्त्थः । व्वि । मा । पाप्म्मना । पृङ्क्तम्॥

**सरलार्थः-** हे ग्रहाः ! युष्माकं सन्धिन अन्नरसं सम्यक् गृह्णामि । तथा विप्राय मेधाविने इन्द्राय विशिष्ट बुद्धिं जानन्तः । अद्धर्युः सोमरसम् अक्षोपरि धारयति । हे सोमसुराग्रहौ । युवां संपृक्तौ भवथः । युवां मां भद्रेण कल्याणेंन सयोजयताम् । हे ग्रहौ ! यतः युवां वियुक्तौ स्थः ततः गां पाप्मना वियोजनम् ।

**इन्द्रस्य व्वज्रोसि व्वाजसास्त्वयायँव्वाजꣳ सेत् । व्वाजस्य नु प्प्रसवे मातरम्महीमदितिन्नाम व्वचसा करामहे । यस्यामिदँव्विश्श्वम्भुवनमाविवेश तस्यान्नो देवꣳ सविता धर्म्मं साविषत् ॥५॥**

**पदपाठः-** इन्द्रस्य । व्वज्रः । असि । व्वाजसाऽइतिवाज साः । त्वया । अयम् । व्वाजम् । सेत् ॥ व्वाजस्य । नु । प्रसवऽइतिप्प्र सवे । मातरम् । मह्नीम् । अदितिम् । नाम । व्वाचसा । करामहे ॥ यस्याम् । इदम् । व्विश्श्वम् । भुयनम् । आविवेशेत्त्या व्विवेश । तस्याम् । नः । देवः । सविता । धर्म्मं । साविपत् ॥

**सरलार्थः-** हे रथ ! त्वमिन्द्रस्य वज्रोऽसि । त्वं वाजसाः असि । अन्नस्य अनुज्ञायामेव वर्तमाना वयं यां भूमिं वेदवाक्येन अनुकूलां कुर्महे । सविता देवः तस्यां भूमौ एव अस्माकं धारणम् अवस्थानं प्रेरयतु ॥

**अप्प्स्वन्तरमृतमप्प्सु भेषजमपामुत प्प्रशस्तिष्ष्वश्श्वा भवत व्वाजिनः ।**

**देवीरापो यो वऽऊर्म्मिः प्प्रतूर्त्तिः ककुन्मान्वाजसास्तेनायँव्वाजꣳ सेत् ॥६॥**

**पदपाठः-** अप्प्स्वित्त्यप् सु । अन्तः । अमृतम् । अप्प्स्वित्त्यप् सु । भेषजम् । अपाम् । उत । प्रशस्तिप्प्वितिप्र शस्तिषु । अश्श्वाः । भवत । व्वाजिनः ॥ देवीः । आपः । य्यः । व्वः । उर्म्मिः । प्रतूर्त्तिरितिप्र तूर्त्तिः । ककुन्मानितिककुत् मान् । व्वाजसाऽइतिवाज साः । तेन । अयम् । व्वाजम् । सेत् ॥

**सरलार्थः-** हे अश्वाः ! यूयम् अन्नवन्तो भवत । हे दीव्यमाना आपः युष्माकं या ऊर्मिः सिक्ता वर्तते । तथा अयमश्वः अन्नं भक्ष्यते तं बध्नीयात् ॥

**व्वातो वा मनो वा गन्धर्व्वाः सप्प्तꣳविꣳशतिः ।**

**तेऽअग्ग्रेश्श्वमयुञ्जँस्तेऽअस्म्मिञ्जवमादधुः ॥७॥**

**पदपाठः-** व्वातः । व्वा । मनः । व्वा । गन्धर्व्वाः । सप्प्तविꣳशतिरितिसप्प्त व्विꣳशतिः ॥ ते । अग्ग्रे । अश्श्वम् । अयुञ्जन् । ते । अस्मिन् । जवम् । आ । अदधुः ॥

**सरलार्थः-** वायुदेवता इन्द्रियसप्तविंशतिर्नक्षत्राणि गन्धर्वाः गोः भूमेः धर्तारः वातादयः अग्रे योजितवन्तः । ते च वातादयः अस्मिन् अश्वे वेगं स्थापितवन्तः ॥

**व्वातरꣳहा भव व्वाजिन्युज्ज्यमानऽइन्द्रस्येव दक्क्षिणः श्श्रियैधि ।**

**युञ्जन्तु त्त्वा मरुतो व्विश्श्ववेदसऽआ ते त्त्वष्ट्टा पत्त्सु जवन्दधातु ॥८॥**

**पदपाठः-** व्वातरꣳहाऽइतिवात रꣳहाः । भव । व्वाजिन् । युज्ज्यमानः । इन्द्रस्येतीन्द्रनस्य इव । दक्क्षिणः । श्रिया । एधि ॥ युञ्जन्तु । त्वा । मरुतः । व्विश्श्ववेदसऽइतिविश्श्व व्वेदसः । आ । ते । त्वष्ट्टा । पत्त्स्वितिपत् सु । जवम् दधातु ॥

**सरलार्थः-** हे वेगवान् अश्व । युज्यमानः सन् त्वं वेगयुक्तो भव हे अश्व ! त्वां रथे नियोजयतु । हे अश्व ! तव पादेषु वेगं स्थापयतु ॥

**ज॒वो यस्ते॑ व्वाजि॒न्निहि॑तो॒ गुहा॒ यः श्येने परी॑त्तोऽअच॑रच्च॒ व्वाते॑।
तेन॑ नो व्वाजि॒न्बल॑वा॒न्बले॑न व्वाज॒जिच्च॒ भव॒ सम॑ने च पारयि॒ष्णुः।
व्वाजि॑नो व्वाजजितो॒ वाज॑ꣳ सरि॒ष्ष्यन्तो॒
बृह॒स्प्पतेर्भा॒गमव॑जिग्घ्रत ॥९॥**

**पदपाठः-** ज॒वः । यः । ते॒ . व्वा॒जि॒न् । निहि॑त॒ऽइतिनि हि॑तः । गुहा॑ । यः । श्ये॒ने । परी॑त्तः । अचनरत्। च॒ । व्वाते॑ ॥ तेन॑ । नः । व्वा॒जि॒न् । बल॑वा॒नि॒ति॒बल॑ व्वान् । बले॑न । व्वा॒ज॒जिदिति॑वाज॒ जित् । च॒ । भव॑ । सम॑ने । च॒ । पा॒र॒यि॒ष्णुः ॥ व्वाजि॑नः । व्वा॒ज॒जि॒त॒ऽइति॑वाज जितः । व्वाज॑म् । स॒रि॒ष्यन्त॑ः। बृह॒स्प्पते॑ः । भा॒गम् । अवन । जि॒घ्र॒त ॥

**सरलार्थः-** हे वाजिन् अश्व ! तव वेगः गुहायां हृदयप्रदेशे अवस्थापितः । श्येनाख्ये पक्षिणिः यः वेगः त्वया एव वेगलक्षणेन परिदत्तः सन् प्रवर्तते । अस्माकं कृते वेगवतः अन्नस्य दाता च भव । हे वाजिनः अश्वाः! यूयं बृहस्पतेः भागम् आध्राणं कुरुत ॥

**दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यस॑वसो॒ बृह॒स्प्पते॑रुत्त॒मन्नाक॑ꣳ रुहेयम्।
दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्यस॑वस॒ऽइन्द्र॑स्योत्त॒मन्नाक॑ꣳ रुहेयम् ।
दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवसो॒ बृह॒स्प्पते॑रुत्त॒मन्नाक॑मरुहम्।
दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्त्यप्प्र॑सवस॒ऽइन्द्र॑स्योत्त॒मन्नाक॑मरुहम् ॥१०॥**

**पदपाठः-** दे॒वस्य॑ । अ॒हम् । स॒वि॒तुः । स॒वे । स॒त्त्यस॑वस॒ऽइति॑सत्त्य स॑वसः । बृह॒स्प्पते॑ः । उ॒त्तममित्त्यु॑त् त॒मम्। नाक॑म् । रु॒हे॒य॒म् ॥ इन्द्र॑स्य । स॒त्त्यप्प्र॑सवस॒ऽइति॑स॒त्त्य प्र॑सवस । अ॒रु॒ह॒म् ॥

**सरलार्थः-** सवितुः देवस्य अनुज्ञायां वर्तमानोऽहं बृहस्पतेः संबन्धिनम् उत्कृष्टं स्वर्गम् आरोहामि । क्षत्रियवाजपेये इन्द्रस्य स्वर्गं रुहेयम् इति विशेषः ॥

**बृह॑स्प्पते॒ व्वाज॑ञ्जय॒ बृह॒स्प्पत॑ये व्वाचँ॑व्वदत बृह॒स्प्पतिँ॒व्वाज॑ञ्जापयत ।**

**इन्द्र॒ व्वाज॑ञ्जयेन्द्रा॑य॒ व्वाचँ॑व्वद॒तेन्द्रँ॑व्वाज॑ञ्जापयत ॥११॥**

**पदपाठः-** बृह॑स्प्पते । व्वाज॑म् । ज॒य॒ । बृह॒स्प्पत॑ये । व्वाच॑म् । व्व॒द॒त॒ । बृह॒स्प्पति॑म् । व्वाज॑म् । जा॒प॒य॒त॒ ॥ इन्द्र॑ । इन्द्रा॑य । इन्द्र॑म् ॥

**सरलार्थः-** हे दुन्दुभयः ! यूयं बृहस्पतये वाचं वदत । हे बृहस्पते ! त्वम् अन्नं जय । हे दुन्दुभयः ! यूयमेव बृहस्पतिम् अन्नं जापयत । बृहस्पतिना जयं कारयन् ॥

**ए॒षा व॒ः सा स॒त्त्या स॑ँव्वाग॑भू॒द्यया॒ बृह॒स्प्पतिँ॒व्वाज॒मजी॑जपत॒
बृह॒स्प्पतिँ॒व्वाजँ॒व्वन॑स्प्पतयो॒ व्विमु॑च्च्यद्ध्वम्। ए॒षा व॒ः सा स॒त्त्या
सँ॒व्वाग॑भू॒द्ययेन्द्रँ॒व्वाज॒मजी॑प॒ताजी॑जप॒तेन्द्रँ॒व्वाजँ॒व्वन॑स्प्पतयो॒
व्विमु॑च्च्यद्ध्वम् ॥१२॥**

**पदपाठः-** ए॒षा । व्व॒ः । सा । स॒त्त्या । स॒ँव्वागिति॑स॒म् व्वाक् । अ॒भू॒त् । यया॑ । बृह॒स्प्पति॑म् । व्वाज॑म् । अजी॑जपत। अजी॑जपत । बृह॒स्प्पति॑म् । व्वाज॑म् । व्वन॑स्प्पतयः । व्वि । मुच्च्य॒द्ध्व॒म् ॥ इन्द्र॑म् । व्वा॒ज॒जि॒त॒ऽति॑वा॒ज जित॑ः । व्वाज॑म् । जे॒ष॒म् ॥ व्वाजि॑नः । व्वा॒ज॒जि॒त॒ऽइति॑वाज जितः । अद्ध्व॑नः । स्क॒भ्भु॒वन्त॑ः । योज॑ना । मिमा॑नाः । काष्ठा॑म् । ग॒च्छ॒त॒ ॥

**सरलार्थः-** हे दुन्दुभयः ! युस्माकम् एषा वाक् समभूत् । यया वाचा बृहस्पतिम् अन्नम् आजीजपत । हे वनस्पतयः दुन्दुभयः ! यूयं कृतकृत्याः विमोचनं कुरुत । यया वाचा इन्द्रम् अन्नम् आजीजपत ॥

**दे॒वस्या॒हꣳ स॑वि॒तुः स॒वे स॒त्यप्र॑सवसो॒ बृह॒स्पते॑र्व्वाज॒जितो॒ व्वाजं॑जेषम् ।**
**व्वाजि॑नो व्वाजजि॒तोद्ध्वन स्क्कभ्नुवन्तो॒ योज॑ना॒ मिमा॑नाः काष्ठां॑ङ्गच्छत ॥१३॥**

**पदपाठः-** दे॒वस्य॑ । अ॒हम् । स॒वि॒तुः । स॒वे । स॒त्यप्र॑सवस॒ऽइति॑स॒त्य प्र॑सवसः । व्वा॒ज॒जि॒त॒ऽइति॑वाज॒ जित॑ः । व्वाज॑म् । जे॒ष॒म् ॥ व्वाजि॑नः । व्वा॒ज॒जि॒त॒ऽइति॑वाज जितः । अद्ध्व॑नः । स्क॒भ्नुवन्त॑ः । योज॑ना । मिमा॑नाः । काष्ठा॑म् । ग॒च्छ॒त ॥

**सरलार्थः-** सवितुः देवस्य अनुज्ञायां वर्तमानोऽहं अन्नजेतुः बृहस्पतेः सबन्धिनम् अन्नं जयेयम् । हे वाजिनः अश्वाः। यूयं काष्ठा गच्छत । किं भूताः यूयम् ? अन्नस्य जेतारः, मार्गान् क्षोभयन्तः, योजनानि अतिशीघ्रतया परिच्छिन्दन्तः ॥

**ए॒ष स्य व्वा॒जी क्षि॑प॒णिन्तु॑रण्यति ग्ग्री॒वाया॑म्ब॒द्धोऽअ॑पिक॒क्षऽआ॒सनि॑ ।**
**क्र॒तुं॑दधि॒क्क्राऽअनु॑ स॒ꣳसनि॑ष्य्यदत्त्पथामङ्का॑ꣳस्यन्वा॒पनी॑फण॒त्स्वाहा॑ ॥१४॥**

**पदपाठः-** ए॒षः । स्यः । व्वा॒जी । क्षि॒प॒णिम् । तु॒र॒ण्य॒ति । ग्री॒वाया॑म् । ब॒द्धः । अ॒पि॒क॒क्ष॒ऽइत्य॑पि क॒क्षे। आ॒सनि॑ । क्रतु॑म् । द॒धि॒क्राऽइति॑दधि क्राः । अनु॑ । स॒ꣳसनि॑ष्य्यदत् । स॒ꣳसनि॑स्यद॒दिति॑स॒म् सनि॑स्यदत्। प॒थाम् । अङ्कोसि । अनु॑ । आ॒पनी॑फण॒दित्त्या॑ पनी॑फणत् । स्वाहा॑ ॥

**सरलार्थः-** ग्रीवायां तथा मुखे बद्धः अश्वः शीघ्रं धावति । तथा कुटिलमार्गं किलष्टमार्गम् अतिशीघ्रं त्वं प्रापय । अतिशीघ्रं इदं हविः तुभ्यं सुहुतमस्तु ॥

**उ॒त स्म्मा॑स्य॒ द्रव॑तस्तुरण्य॒तः प॒र्ण्णन्न वेरनु॑वाति प्प्रग॒र्द्धिन॑ः ।**
**श्ये॒नस्ये॑व॒ द्ध्रज॑तोऽअ॒ङ्कसम्परि॑ दधि॒क्क्राव्ण्ण॑ः स॒होर्ज्जा तरि॑त्रतः स्वाहा॑ ॥१५॥**

**पदपाठः-** उ॒त । स्म॒ । अ॒स्य॒ । द्रव॑तः । तु॒र॒ण्य॒तः । प॒र्ण्णम् । न । व्वेः । अनु॑ । व्वा॒ति॒ । प्र॒ग॒र्द्धि॒न॒ऽइति॑प्र ग॒र्द्धिन॑ः ॥ श्ये॒नस्ये॒वेति॑श्श्ये॒नस्य॑ इव । ध्रज॑तः । अ॒ङ्कसम् । परि॑ । द॒धि॒क्राव्ण॒ऽइति॑दधि॒ काव्ण्ण॑ः। स॒ह । ऊर्ज्जा । तरि॑त्रतः । स्वाहा॑ ।

**सरलार्थः-** अश्वस्य श्रृङ्गारचिह्नं वस्त्रचामरादिकं सर्वस्मिन्नपि दृश्यमानं गच्छति । किंभूतस्य अश्वस्य ? द्रवनः प्रगर्धिनः, ध्रजनः, दधिक्राव्णः । इदं हविः तुभ्यं सुहुतमस्तु ॥

**शन्नो॑ भवन्तु व्वा॒जिनो॒ हवे॑षु दे॒वता॑ता मि॒तद्र॑वः स्व॒र्क्काः ।**
**ज॒म्भय॒न्तोहि॒व्वृक॒ꣳ रक्क्षा॑ꣳसि॒ सने॑म्म्यस्मद्यु॑यव॒न्नमी॑वाः ॥१६॥**

**पदपाठः-** शम् । नः । भ॒व॒न्तु॒ । व्वा॒जिन॑ः । हवे॑षु । दे॒वत॒तिति॑देव ता॑ता । मि॒तद्र॑व॒ऽइति॑मि॒त द्र॑वः । स्व॒र्क्का॒ऽइति॑सु अ॒र्क्काः ॥ ज॒म्भय॑न्तः । अहि॑म् । व्वृक॑म् । रक्क्षाक्सि । सने॑मि । अ॒स्म॒त् । यु॒य॒व॒न् । अमी॑वाः॥

**सरलार्थः-** यज्ञेषु आवाहनेषु सत्सु अश्वाः अस्मांक सुखकराः भवन्तु । किं भूताः अश्वाः ! मितद्रवः, स्वर्काः तथा च सर्वम् आरण्यं राक्षसान् नाशयन्तः ॥

**ते नो॑ऽअर्व्व॑न्तो हवन॒श्श्रुतो॒ हव॑व्विश्श्वे॑ शृण्ण्व॑न्तु व्वा॒जिनो॑ मि॒तद्र॑वः ।**
**स॒ह॒स्र॒सा मे॒धसा॑ता सनि॒ष्य्यवो॑ म॒हो ये धन॑ꣳ समि॒थेषु॑ जभ्रि॒रे ॥१७॥**

**पदपाठः-** ते । नः । अर्व्व॑न्त । ह॒व॒न॒श्श्रु॒त॒ऽइति॑हवन श्रु॒त॑ । हव॑म् । विश्श्वे॑ । शृ॒ण्व॒न्तु॒ । व्वा॒जिन॑ । मि॒तद्र॑व॒ऽइति॑मि॒त द्र॑व ॥ स॒ह॒स्र॒सा॒ऽइति॑सहस्र सा । मे॒धसा॒तेति॑मे॒ध सा॑ता । स॒नि॒ष्य्यव॑ । म॒ह । ये । धन॑म् । स॒मि॒थे॒ष्वि॒ति॑स॒म् इ॒थेषु॑ । ज॒भ्रि॒रे ॥

**सरलार्थः-** सर्वे वाजिनः अश्वाः अस्माकम् आह्वानं श्रृण्वन्तु । किंभूताः ? अर्वन्तः, वनश्रुतः, मितद्रवः, सहस्रसाः मेधसाता, सनिष्यवः । ते अश्वाः संग्रामेषु महत्पूज्यं वा धानं आहुतवन्तः ॥

**व्वाजेवाजेवत व्वाजिनो नो धनेषु व्विप्प्राऽअमृताऽऋतज्ज्ञाः ।**

**अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्ता यात पथिभिर्द्देवयानैः ॥१८॥**

**पदपाठः-** व्वाजेवाजऽइतिवाजे व्वाजे । अवत । व्वाजिनः । नः । धनेषु । व्विप्राः । अमृताः । ऋतज्ज्ञाऽइत्यृत ज्ञाः ॥ अस्य । मद्ध्वः । पिबत । मादयद्ध्वम् । तृप्ताः । यात । पथिभिरितिपथि भिः । देवयानैरितिदेव यानैः ॥

**सरलार्थः-** हे वाजिनः अश्वाः ! सर्वस्मिन् अन्ने उपस्थिते सति धनेषु च उपस्थितेषु सत्सु अस्मान् पाठयत । किं भूताः यूयम् ? मेधाविनः अमरधर्माणः, सत्यज्ञाः । इदं मधु धावनात्पूर्वं पश्चात् च अवघ्रायमाणं मधुरं हविः पिबत । हविः पीत्वा तृप्ताः भवत । यूय तृप्ताः सन्त देवाधिष्ठितैः पथिभिः गच्छत ॥

**आ मा व्वाजस्य प्प्रसवो जगम्म्यादेमे द्यावापृथिवी व्विश्वरूपे ।**
**आ मा गन्ताम्पितरा मातरा चा मा सोमोऽअमृतत्त्वेन गम्म्यात् ।**
**व्वाजिनो व्वाजजितो व्वाजꣳ ससृवाꣳसो बृहस्प्पतेर्ब्भागमवजिग्घ्रत**
**निमृजानाः ॥१९॥**

**पदपाठः-** आ । मा । व्वाजस्य । प्रसवऽइतिप्र सवः । जगम्म्यात् । आ । इमेऽइतीमे । द्यावापृथिवीऽइतिद्यावापृथिवी ॥ व्विश्वरूपेऽइतिविश्व रूपे ॥ आ । मा । गन्ताम् । पितरा । मातरा । च । आ । मा । सोमः । अमृतत्त्वेनेत्यमृत त्त्वेन । गम्म्यात् ॥ ससृवाꣳसऽइतिससृव्वानꣳसः । निमृजानाइतिनि मृजानाः ॥

**सरलार्थः-** अन्नस्य उत्पतिः माम् आगच्छतु । इमे विश्वरूपे धावापृथिव्यौ मां प्रत्यागच्छेताम् । अस्मदीयः पिता माता च मां प्रति आगच्छताम् । सोमः अमृतत्वेन सहितंः मां प्रत्यागम्यात् । हे वाजिनः अश्वाः ! यूयं बृहस्पतेः सबन्धिनं मागं आध्राणं कुरुत । किं भूताः अश्वाः ! अन्नस्य जेतारः, ससृवांसः निमृजानाः॥

**आपये स्वाहा स्वापये स्वाहापिजाय स्वाहा क्क्रतवे स्वाहा व्वसवे**
**स्वाहाहर्प्पतये स्वाहाह्ने मुग्ग्धाय स्वाहा मुग्ग्धाय व्वैनꣳशिनाय स्वाहा**
**व्विनꣳशिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य**
**पतये स्वाहाधिपतये स्वाहा ॥२०॥**

**पदपाठः-** आपये । स्वाहा । स्वापयऽइतिसु आपये । अपिजायेत्यपि जाय । क्रतवे । व्वसवे । अहर्प्पतये । अहःपतयऽइत्यहः पतये । अह्ने । मुग्ग्धाय । मुग्ग्धाय । व्वैनꣳशिनाय । व्विनꣳशिनऽइतिवि नꣳशिने । आन्त्यायननयेत्यान्त्य [3] आयनाय । अन्त्याय । भौवनाय । भुवनस्य । पतये । [4] अधिपतयऽइत्यधि पतये॥

**सरलार्थः-** आपये, स्वापये, अपिजाय, क्रतवे, वसवे, अहर्पतये, अह्नेमुग्धाय, वैनंशिनाय, विनंशिने, आन्त्यायनाय, भौवनाय, भुवनस्य पतये, अधिपतये, च सुहुतमस्तु । अर्थात् सुखोत्तमप्राप्तर्थं, पुनःपुनः देवत्वोदयप्राप्त्यर्थं, यज्ञरूपपरमात्मप्रजापत्यर्थं, जगदुत्पत्तिस्थितिकारणरूपदिनस्वाम्यर्थं, विनाशशीलनामार्थं, मानवानाम् उत्पतिस्थितिविनाशार्थं, परम सत्ताधृतपरमेश्वरार्थम् इदं सुहुतमस्तु । इदं हविः तुभ्यमस्तु ॥

## शब्दार्थः

**भगाय** - भजनीयाय यज्ञफलाय, **केतपूः** - अन्नस्थ पावयिता, **ऊर्जम्** - अन्नम्, **वाजसाः** - अन्नं ददाती ति, **भूमिम्** - जगन्निर्मात्रीम्, **अप्सु** - उदकेषु, **वाजिन्** - अश्व, **सरिष्यन्तः** - गमिष्यन्तः, **नाकम्** - स्वर्गम्, **वाजजितः** - अन्नस्य जेतारः, **अध्वनः** - मार्गान्, **पथाम्** - मार्गाणाम्, **स्वाहा** - हुतमस्तु, **व्रवतः** - गच्छतः,

**शं भवन्तु** – सुखकरा:भवन्तु, **जम्भयन्तः** – नाशयन्त, **समिथेषु** – संग्रामेषु, **ऋतसाः** – सत्यज्ञाः, **मादयध्वम्** – तृप्ता भवत, **अधिपते** – सर्वलोकानां स्वामिते ॥

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) अस्मिन् यागे ........................ यागस्य वर्णनं कृतमस्ति । (सूर्य, राजसूय, सोम)

(२) पाठेऽस्मिन् ....................... वेदस्य कण्डिका संगृहीताः सन्ति । (ऋग्, यजुः, साम)

(३) राजसूययागस्य वर्णनं यजुर्वेदस्य ........................ अध्याये कृतमस्ति । (नवमे, दशमे, एकादशे)

(४) राजसूययागे ........................ अधिकारः वर्तते । (ब्राह्मणस्य, वैश्यस्य, क्षत्रियस्य)

(५) ........................ मासे राजसूययागस्य आरम्भः क्रियते । (फाल्गुन, चैत्र, वैशाख)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) राजसूययागस्य प्रारम्भः कस्मिन् पक्षे करणीयः ?

(२) राजसूययागस्य समापनं कस्यां तिथौ करणीयम् ?

(३) राजसूययागे कस्य अधिकारः न वर्तते ?

(४) "शम्" इत्यस्य कः अर्थः ?

(५) अनुष्ठानरूपाय ऐश्वर्याय यजमानं कः प्रेरयति ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) व्वात॑रꣳहा भव व्वाजिन्यु॒ज्ज्यमा॑न॒ऽइन्द्र॑स्येव॒ दक्षि॑णꣳ श्रि॒यैधि॑ ।

युञ्जन्तु॑ त्त्वा म॒रुतो॑ व्वि॒श्श्ववे॑दस॒ऽआ ते॒ त्त्वष्टा॑ प॒त्सु ज॒वन्द॑धातु ॥

(२) बृह॑स्प्पते॒ व्वाज॑ञ्जय॒ बृह॒स्प्पत॑ये व्वाचँव्वदत् बृह॒स्प्पतिँ॒व्वाज॑ञ्जापयत ।

इन्द्र॒ व्वाज॑ञ्जय॒येन्द्रा॑य॒ व्वाचँव्वद॒तेन्द्रँ॒व्वाज॑ञ्जापयत ॥

(३) ए॒ष स्य व्वा॒जी क्षि॑प॒णिन्तु॑रण्ण्यति ग्ग्री॒वाया॑म्ब॒द्धोऽअ॑पिक॒क्क्षऽआ॒सनि॑ ।

क्रतु॑न्दधि॒क्क्राऽअनु॑ स॒ꣳसनि॑ष्ष्यदत्प॒थामङ्का॑ꣳस्य॒न्वा॒पनी॑फण॒त्स्वाहा॑ ॥

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) देव सवितः ।

(२) व्वातोवा ।

(३) आपयेस्वाहा ।

**४. टिप्पणी लेख्या ।**

(१) राजसूययागस्य महत्वम् ।

(२) प्रथमतः पञ्चपर्यन्त-कण्डिकानां विषयवस्तु निरूपयत ।

**५. शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) भगाय
(२) यज्ञम्
(३) तेषाम्
(४) भद्रेण
(५) व्वचसा

**६. क्रियापदानां परिचयं लिखत ।**

(१) पुनातु
(२) गृह्णामि
(३) करामहे
(४) भवत
(५) गम्यात्

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) व्वाचस्पतिम्
(२) रसस्तम्
(३) गृहणाम्येबते
(४) वोऽहम्
(५) वज्रोसि

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) दिव्यः + गन्धर्वः
(२) नः + पुनातु
(३) इषम् + ऊर्जम्
(४) तेन + अयम्
(५) ते + अस्मिन्

**छात्र-प्रवृत्तिः**

- छात्राः राजसूययागस्य हविर्द्रव्याणां सूचिनिर्माणं कुर्युः ।

**विशिष्टज्ञानम्**

- विद्यया विन्दतेऽमृतम् । (केन. २/४)
  विद्यया अमतं प्राप्यते

●

# १३ शुक्लयजुर्वेदे नवमोऽध्यायः २

**प्रस्तावना**

प्रस्तुतेऽस्मिन् पाठे शुक्लयजुर्वेदस्य माध्यन्दिनीशाखायाः नवमाध्यायस्य एकविंशतितः चत्वारिशत् पर्यन्ताः मन्त्राः संगृहीताः सन्ति । अस्मिन् पाठेऽपि राजसूययागस्य वर्णनं कृतमस्ति ।




**आयु॑र्य्य॒ज्ञेन॑कल्प्पताम्प्रा॒णो य॒ज्ञेन कल्प्पता॒ञ्चक्षु॑र्य्य॒ज्ञेन॑ कल्प्पता॒ꣳ॒**
**श्रोत्रँ॑य्य॒ज्ञेन॑ कल्प्पताम्पृ॒ष्ठँय्य॒ज्ञेन॑ कल्प्पताँय्य॒ज्ञो य॒ज्ञेन॑ कल्प्पताम्।**
**प्रजाप॑तेः प्प्र॒जाऽअ॑भूम॒ स्व॒र्द्देवाऽअगन्मा॒मृता॑ऽअभूम ॥२१॥**

**पदपाठः-** आयु॑÷ । य॒ज्ञेन॑ । क॒ल्प्प॒ता॒म् । प्रा॒णः । चक्क्षु॑÷ । श्रोत्र॑म् । पृ॒ष्ठम् । य॒ज्ञः । य॒ज्ञेन॑ । क॒ल्प्प॒ता॒म्।
प्र॒जाप॑तेरिति॑प्प्र॒जा प॑तेः । प्र॒जाऽइति॑प्प्र॒ जाः । अ॒भू॒म । स्व॑÷ । दे॒वाः । अ॒ग॒न्म॒ । अ॒मृता॑ः ऽ। अ॒भू॒म॥

**सरलार्थः-** मदीयम् आयुः वाजपेयाख्येन यज्ञेन क्लृप्तं भवतु । मुखनासिकाप्रभवः पञ्चवृत्तिकः प्राणवायुः अपि अनेन यज्ञेन क्लृप्तः भवतु । चक्षुरिन्द्रियं, श्रोत्रेन्द्रियं, पृष्ठं च यज्ञेन कल्पताम् । मदीयेन वाजपेयाख्येन यज्ञेन यज्ञाधिष्ठाता विष्णुः कल्पताम् । वयं प्रजाप्रतेः सम्बिधन्यः प्रजाः अभूम । हे देवाः ! वयं स्वर्गं प्राप्ताः। वयं मरणधर्मरहिताः अभूम ॥

**अ॒स्म्मे वो॑ऽअस्त्त्विन्द्रि॒यम॒स्म्मे नृम्म्णमुत क्क्रतु॒र॒स्म्मे व्वर्च्चा॑ꣳसि**
**सन्तु वः । नमो॑ मा॒त्रे पृ॑थि॒व्व्यै नमो॑ मा॒त्रे पृ॑थि॒व्व्याऽइ॒यन्ते॒**
**राड्ड॒यन्ता॒सि॒ यम॑नो ध्ध्रु॒वो॑सि ध॒रुण॑÷ । कृ॒ष्ष्यै त्त्वा॒ क्क्षेमा॑य त्त्वा**
**र॒य्यै त्त्वा॒ पोषा॑य त्त्वा ॥२२॥**

**पदपाठः-** अ॒स्मेऽइत्य॒स्मे । व्वः॑ । अ॒स्तु॒ऽइ॒न्द्रि॒यम् । अ॒स्मेऽइत्य॒स्मे । नृ॒म्म्णम् । उ॒त । क्रतुः॑ । अ॒स्मेऽइत्य॒स्मे। व्वर्च्चाँ॑ᳪंसि । स॒न्तु॒ । व्वः॑ ॥ नमः॑ । मा॒त्रे । पृ॒थि॒व्व्यै । नमः॑ । मा॒त्रे । पृ॒थि॒व्व्यै । इ॒यम् । ते॒ राट् । य॒न्ता । अ॒सि॒ । यम॑नः । ध्रु॒वः । ध॒रुणः॑ ॥ कृ॒ष्ष्यै । त्वा॒ । क्षेमा॑य । र॒य्यै । पोषा॑य॥

**सरलार्थः-** हे दिशः ! युष्मत्संबन्धे वीर्यम् अस्मासु अस्तु । युष्मत्संबन्धि धनं च अस्मासु अस्तु । युष्मत्संबन्धि कर्म तेजांसि च अस्मासु अस्तु । अस्माकं संबन्धि युष्ममाकं सामर्थ्यम् अस्तु । मातृरूपायै पृथिव्यै नमस्कारोऽस्तु। हे आसन्दि ! तव इदं राज्यं वर्तते । हे यजमान ! त्वं सर्वस्य नियन्तासि । तथा त्वं ध्रुवः धारकः च असि । कर्षणाय कृषिसिद्ध्यर्थं त्वाम् उपवेशयामि । लब्धपरिपालनाय उपवेशयामि । धनाय पशुपुत्रादिपुष्ट्यै च उपवेशयामि ॥

**व्वाज॑स्ये॒मम्प्र॑स॒वः सु॑षुवेग्ग्रे॒ सोम॒ᳪं राजा॑न॒मोष॑धीष्व॒प्प्सु ।**

**ताऽअ॒स्म्मभ्य॒म्मधु॑मतीर्ब्भवन्तु व्व॒यᳪं रा॒ष्ट्रे जा॑गृयाम पु॒रोहि॑ताः॒ स्वाहा॑ ॥२३॥**

**पदपाठः-** व्वाज॑स्य । इ॒मम् । प्र॒स॒वऽइति॑प्र स॒वः । सु॒षु॒वे । सु॒सु॒व॒ऽइति॑सुसुवे । अग्ग्रे॑ । सोम॑म् । राजा॑नम् । ओष॑धीषु । अ॒प्प्स्वित्त्य॒प् सु ॥ ताः । अ॒स्म्मभ्य॑म् । मधु॑मती॒रिति॒मधु॑ मतीः । भ॒व॒न्तु॒ । व्व॒यम् । रा॒ष्ट्रे। जा॒गृ॒या॒म॒ । पु॒रोहि॑ता॒ऽइति॑पुरः हि॑ताः । स्वाहा॑ ॥

**सरलार्थः-** अन्नस्य उत्पादकः प्रजापतिः सृष्ट्यादौ ओषधीषु अप्सु च वर्तमानं इमं सोमं वल्लीरूपं राजानं दीप्तिमस्तं पदार्थम् उत्पादयामास । इत्थंभूताः सोमस्य जनयित्र्यः ओषधयः आपश्च अस्मभ्यं मधुमत्यः रसवत्यः भोगयोग्या भवन्तु । वयं पुरोहिताः स्वकार्ये देशे जागृयाम (अप्रमत्ता भवाम) । इदं हविः तुभ्यं सुहुतमस्तु॥

**व्वाज॑स्ये॒माम्प्र॑स॒वः शि॑श्रिये॒ दिव॑मि॒मा च॒ व्विश्श्वा॒ भुव॑नानि स॒म्म्राट् ।**

**अदि॑त्सन्तन्दापयति प्प्रजा॒नन्त्स नो॑ र॒यिᳪं सर्व्वी॑र॒न्नियच्छतु॒ स्वाहा॑ ॥२४॥**

**पदपाठः-** व्वाज॑स्य । इ॒माम् । प्र॒सव॒ऽइति॑प्र स॒वः । शि॒श्रि॒ये । दिव॑म् । इ॒मा । च॒ । व्विश्श्वा॑ । भुव॑नानि। स॒म्म्राडिति॑स॒म् । राट् ॥ अदि॑त्सन्तम् । दा॒प॒य॒ति॒ । प्र॒जा॒नन्निति॑प्र जा॒नन् । सः । नः॑ । र॒यिम् । सर्व्वी॑र॒मिति॒सर्व्वं॑ व्वीरम् । नि । य॒च्छ॒तु॒ । स्वाहा॑ ॥

**सरलार्थः-** अन्नस्य उत्पादकः ईश्वरः पृथिवीं द्युलोकं सर्वाणि भुवनानि च आश्रितवान् । सः सर्वेषां भुवनानां राजा भूत्वा हविर्दातुम् अनिच्छन्तं माम् अवगच्छन्मदीयबुद्धिप्रेरणेन हविः दापयति । अस्मभ्यं पुत्रभृत्यादिभिः युक्तं धनं नियमनेन ददातु । इदं हविः तुभ्यं सुहुतमस्तु ॥

**वाज॑स्य॒ नु प्प्र॑स॒वऽआव॑भूवे॒मा च॒ व्विश्श्वा॒ भुव॑नानि स॒र्व्वतः॑ ।**

**सने॑मि॒ राजा॒ परि॑याति व्वि॒द्वान्प्र॒जाम्पुष्टिं॑व्व॒र्द्धय॑मानोऽअ॒स्मे स्वाहा॑ ॥२५॥**

**पदपाठः-** व्वाज॑स्य । नु । प्र॒स॒वऽइति॑प्र स॒वः । आ । व॒भू॒व॒ । इ॒मा । च॒ । व्विश्श्वा॑ । भुव॑नानि । स॒र्व्वतः॑॥ सने॑मि । राजा॑ । परि॑ । या॒ति । व्वि॒द्द्वान् । प्र॒जामिति॑प्र जाम् । पुष्टि॑म् । व्व॒र्द्धय॑मानः । अ॒स्मेऽइत्य॒स्मे। स्वाहा॑ ॥

**सरलार्थः-** अन्नस्य उत्पादकः प्रजापतिः इमानि सर्वाणि भुवनानि सर्वतः उपस्थितानि हिरव्यगर्भादिस्तम्बपर्यन्तानि संभावितानि । चिरंतनः राजा दीप्तः सन् सर्वतः स्वेच्छया गच्छति । तथा अस्मासु पुत्रादिसन्ततिं धनपोषं च वर्धयतु । इदं हविः तुभ्यं सुहुतमस्तु ॥

**सोम॒ᳪं राजा॑न॒मव॑से॒ग्ग्निम॒न्वार॑भामहे ।**

**आ॒दि॒त्त्यान्व्विष्ष्णु॒ᳪं सूर्य्य॑म्ब्र॒ह्माणं॑ञ्च॒ बृह॒स्प्पति॒ᳪं स्वाहा॑ ॥२६॥**

**पदपाठः-** सोम॑म् । राजा॑नम् । अव॑से । अ॒ग्निम् । अ॒न्वार॑भामह॒ऽइत्य॑नु आर॑भामहे ॥ आ॒दि॒त्यान् । व्विष्णु॑म्। सूर्य्य॑म् । ब्र॒ह्माण॑म् । च॒ । बृह॒स्पति॑म् । स्वाहा॑ ॥

**सरलार्थः-** सोमम्, राजानम्, अग्निं, द्वादशादित्यान्, विष्णुं, सूर्यं, ब्रह्माणं, बृहस्पतिं च रक्षणार्थं तर्पणाय वा आहवयामहे। इदं हविः तुभ्यं सुहुतमस्तु ॥

**अ॒र्य्य॒मण॒म्बृह॒स्पति॒मिन्द्र॒न्दाना॑य चोदय ।**

**व्वाचँ॒व्विष्णु॒ꣳ सर॑स्वतीꣳ सवि॒तार॑ञ्च व्वा॒जिन॒ꣳ स्वाहा॑ ॥२७॥**

**पदपाठः-** अ॒र्य्य॒मण॑म् । बृह॒स्पति॑म् । इन्द्र॑म् । दाना॑य । चो॒द॒य ॥ व्वाच॑म् । व्विष्णु॑म् । सर॑स्वतीम् । स॒वि॒तार॑म्। च॒ । व्वा॒जिन॑म् । स्वाहा॑ ॥

**सरलार्थः-** हे ईश्वर ! त्वम् अर्यमादीन् देवान् धनप्रदानार्थं प्रेरय । बृहस्पतिं, इन्द्रं, देवेशं, वाचं, वागधिष्ठात्रीं सरस्वतीं, विष्णुं सवितारं च धनप्रदानार्थं प्रेरय । अत्र 'वाजिनम्' इति सवेषां विशेषणं वर्तते । इदं हविः तुभ्यं सुहुतमस्तु ॥

**अग्ने॒ऽअच्छा॑ व्वदे॒ह न॒ः प्रति॑ नः सु॒मना॑ भव ।**

**प्र नो॑ यच्छ सहस्रजि॒त्त्वꣳ हि ध॑न॒दाऽअसि॒ स्वाहा॑ ॥२८॥**

**पदपाठः-** अग्ने॑ । अच्छ॑ । व्व॒द॒ । इ॒ह । न॒ः । प्रति॑ । न॒ः । सुमना॒ऽइति॑सु मना॑ः । भ॒व॒ ॥ प्र । न॒ः । य॒च्छ॒ । स॒ह॒स्र॒जि॒दिति॑सहस्र जित् । त्वम् । हि । ध॒न॒दाऽइति॑धन॒ दाः । असि॑ । स्वाहा॑ ॥

**सरलार्थः-** हे अग्ने ! अस्मिन् कर्मणि अस्माकं कृते आभिमुख्येन हितं ब्रूहि । हे सहस्रजिन् अग्ने ! त्वं धनस्य दाताऽसि अतः त्वम् अस्मभ्यं धनं प्रयच्छ । इदं हविः तुभ्यं सुहुतमस्तु ॥

**प्र नो॑ यच्छ॑न्त्वर्य्य॒मा प्र पू॒षा प्र बृह॒स्पति॑ः ।**

**प्र वाग्दे॒वी द॑दातु न॒ः स्वाहा॑ ॥२९॥**

**पदपाठः-** प्र । न॒ः । य॒च्छ॒तु॒ । अ॒र्य्य॒मा । पू॒षा । बृह॒स्पति॑ः ॥ व्वाक् । दे॒वी । द॒दा॒तु॒ । न॒ः । स्वाहा॑॥

**सरलार्थः-** अर्यमा देवः, पूषा देवः, बृहस्पतिः, दानादिगुणयुक्तावाग्देवी अस्मभ्यम् अभीष्टं प्रयछतु । इदं हविः तुभ्यं सुहुतमस्तु ॥

**दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुब्भ्या॑म्पू॒ष्णो हस्ता॑ब्भ्याम् ।**
**सर॑स्वत्त्यै व्वा॒चो य॒न्तुर्य्य॒न्त्रिये॑ दधामि॒ बृह॒स्पते॑ष्ट्वा**
**साम्म्रा॑ज्ज्येना॒भिषि॑ञ्चाम्म्यसौ ॥३०॥**

**पदपाठः-** सर॑स्वत्त्यै । व्वा॒चः । य॒न्तुः । य॒न्त्रिये॑ । द॒धा॒भि॒ । बृह॒स्पते॑ः । त्वा॒ । साम्म्रा॑ज्ज्ये॒नेति॒साम् रा॑ज्ज्येन। अ॒भि । सि॒ञ्चा॒मि॒ । अ॒सौ ॥

**सरलार्थः-** सवितुर्देवस्य वर्तमानोऽहं अश्विनो र्बाहुभ्यां पूष्णोहस्ताभ्यां सरस्वत्याः वाचः ऐश्वर्ये स्थापयामि । बृहस्पतिः साम्राज्येन त्वाम् अभिषिञ्चामि ॥

**अ॒ग्निरेका॑क्षरेण प्प्रा॒णमुद॑जयत्तमु॒ज्जे॑षमश्श्विनौ॒ द्व्य॒क्षरेण द्विपदो॑**
**मनु॒ष्ष्या॒नुद॑जयता॒न्तानु॒ज्जे॑षँ व्विष्णु॒स्त्र्य॒क्षरेण॒**
**त्रीँल्लो॒कानुद॑जय॒त्तानु॒ज्जे॑षꣳ सोम॒श्श्चतु॑रक्षरेण॒ चतु॑ष्प्पदः**
**प॒शूनुद॑जय॒त्ताज्जे॑षम्पू॒षा पञ्चा॑क्षरेण ॥३१॥**

**पदपठः**:- अग्निः । एकाक्षरेणेत्येक अक्षरेण । प्राणम् । उत् । अजयत् । तम् । उत् । जेषम् । अश्विनौ। द्व्यक्षरेणेतिद्वि अक्षरेण । द्विपदइतिद्वि पदः । मनुष्यान् । उत् । अजयताम् । तान् । विष्णुः। त्र्यक्षरेणेतित्रि अक्षरेण । त्रीन् । लोकान् । सोमः । चतुरक्षरेणेतिचतुः अक्षरेण । चतुष्पदः। चतुःपदऽइतिचतुः पदः । पशून् ॥

**सरलार्थः**:- अग्निः एकाक्षरेण छन्दसा पञ्चवृतिकं प्राणम् उत्कृष्टं जितवान् । तथा अहमपि तादृशं प्राणम् उत्कृष्टं जयेयम्। अश्विनौ देवौ अक्षरोद्भयात्मकेन छन्दसा पादद्वयोपेतान् मनुष्यात् जितवन्तौ तथा अहमपि तैनैव अक्षरेण तादृशान् मनुष्यान् जयेयम् । विष्णुः अक्षरत्रयात्मकेन छन्दसा भूरादीन् त्रीन् लोकान् जितवान् तथा अहमपि तान् लोकान् जयेयम् । सोमः अक्षरचतुष्टयात्मकेन छन्दसा पादचतुष्टयोपेतान् पशून् जितवान् तथैव अहमपि तेन छन्दसा तान् पशून् जयेयम् ॥

**पूषा पञ्चाक्षरेण पञ्च दिशऽउदजयत्ताऽउज्जेषꣳ सविता षडक्षरेण षडृतूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेण सप्त ग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम्मित्रो नवाक्षरेण ॥३२॥**

**पदपाठः**:- पूषा । पञ्चाक्षरेणेतिपञ्च अक्षरेण । पञ्च । दिशः । ताः । सविता । षडक्षरेणेतिषट् अक्षरेण। षट् । ऋतून् । मरुतः । सप्ताक्षरेणेतिसप्त अक्षरेण । सप्त । ग्राम्यान् । अजयन् । बृहस्पतिः। अष्टाक्षरेणेत्यष्ट अक्षरेण । गायत्रीम् । ताम् ॥

**सरलार्थः**:- पूषादेवः पञ्चाक्षरेण छन्दसा पञ्चदिशः जितवान् । तथैव अहमपि ताः दिशः जयेयम् । सवितादेवः षडक्षरेण छन्दसा षट् ऋतून् जितवान् । तथैव अहमपि तान् ऋतून् जयेयम् । मरुतो देवाः सप्ताक्षरेण छन्दसा ग्राम्यान् पशून् जितवन्तः । तथा अहमपि ग्राम्यान् पशून् जयेयम् । बृहस्पतिः अष्टाक्षरेण छन्दसा गायत्रीछन्दोऽभिमानिनी देवता जितवान् । तथैव अहमपि तादृशीं गायत्रीं जयेयम् ॥

**मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषँवरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषँविश्वे देवा द्वादशाक्षरेण जगतीमुदजयँस्तामुज्जेषँवसवस्त्रयोदशाक्षरेण ॥३३॥**

**पदपाठः**:- विराजमितिवि राजम् । इन्द्रः । एकादशाक्षरेणेत्येकादश अक्षरेण । त्रिष्टुभम् । त्रिस्तुभमितित्रि स्तुभम्। विश्वे । देवाः । द्वादशाक्षरेणेतिद्वादश अक्षरेण । जगतीम् ॥

**सरलार्थः**:- मित्रो देवः नवाक्षरेण छन्दसा त्रिवृत्तं स्तोमं जितवान् । तथैव अहमपि तादृशं स्तोमं जयेयम् । वरुणो देवः दशाक्षरेण छन्दसा विराजं जितवान् । अहमपि विराजं जयेयम् । इन्द्रो देवः एकादशाक्षरेण छन्दसा त्रिष्टुपछंन्दोऽभिमानिनीं देवतां जितवान् । अहमपि त्रिष्टुभं जयेयम् । विश्वेदेवाः द्वादशाक्षरेण छन्दसा जगतीं जितवन्तः । अहमपि जगतीं जयेयम् ॥

**वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयँस्तमुज्जेषꣳ रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयँस्तमुज्जेषमादित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयँस्तमुज्जेषमदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषम्प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ॥३४॥**

**पदपाठः-** व्वसवः । त्रयोदशाक्षरेणेतित्त्रयोदश अक्क्षरेण । त्रयोदशमितित्त्रयः दशम् । रुद्राः । चतुर्द्दशाक्क्षरेणेतिचतुर्दश अक्क्षरेण । चतुर्दशमितिचतुः दशम् । आदित्याः । पञ्चदशाक्क्षरेणेतिपञ्चदश अक्क्षरेण । पञ्चदशमितिपञ्च दशम् । अदितिः । षोडशाक्क्षरेणेतिषोडश अक्क्षरेण । षोडशम् । प्रजापतिरितिप्प्रजा पतिः । सप्तदशाक्क्षरेणेतिसप्तदश अक्क्षरेण । सप्तदशमितिसप्त दशम् ॥

**सरलार्थः-** वसवो देवा: त्रयोदशाक्षरेण छन्दसा त्रयोदशं स्तोमं जितवन्त: । तथैव अहमपि स्तोमं जयेयम् । रुद्रा: चतुर्दशाक्षरेण छन्दसा चतुर्दशस्तोमं जितवन्त: । अहमपि तं स्तोमं जयेयम् । आदित्या: पञ्चदशाक्षरेण छन्दसा पञ्चदशं स्तोमं जितवन्त: । अहमपि तं स्तोमं जयेयम् । देवमाता अदिति: षोडशाक्षरेण छन्दसा षोडशं स्तोमं जितवती । अहमपि तं स्तोमं जयेयम् । प्रजापति: सप्तादशाक्षरेण छन्दसा सप्तदशाख्यं स्तोमं जितवान्। अहमपि तं स्तोमं जयेयम् ॥

**एष ते निर्ऋते भागस्तञ्जुषस्व स्वाहाग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्क्षिणासद्भ्यः स्वाहा व्विश्वदेवनेत्रेभ्यो देवेभ्यः पश्श्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्यऽउत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यऽउपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥३५॥**

**पदपाठः-** एषः । ते । निर्ऋतऽइतिनिः ऋते । भागः । नम् । जुषस्व । स्वाहा । अग्निनेत्त्रेभ्यऽइत्यग्नि नेत्त्रेभ्यः। देवेभ्यः । पुरःसद्भ्यऽइतिपुरःसत् भ्यः । स्वाहा ॥ यमनेत्त्रेभ्यऽइतियम नेत्त्रेभ्यः । दक्क्षिणासद्भ्यऽइतिदक्क्षिणासत् भ्यः । व्विश्वदेवनेत्तेभ्यऽइतिविश्वदेव नेत्त्रेभ्य । पश्श्चात्सद्भ्यऽइतिपश्श्चात्सत भ्यः । मित्त्रावरुणनेत्त्रेभ्यऽइतिमित्त्रावरुण नेत्त्रेभ्य । व्वा । मरुन्नेत्त्रेभ्यऽइतिमरुत् नेत्त्रेभ्य । व्वा । उत्तरासद्भ्यऽइत्युत्तरासत् भ्यः । सोमनेत्त्रेभ्यऽइतिसोम नेत्त्रेभ्य । उपरिसद्भ्यऽइत्युपरिसत् भ्यः । दुवस्वद्भ्यऽइतिदुवस्वत् भ्यः ।

**सरलार्थः-** हे पृथिवि ! एष: पितृरूप: तव भाग: वर्तते, अत: एनं भागं सेवस्व । इदं हवि: तुभ्यं सुहुतमस्तु। पूर्वस्यां सीदन्ति ये अग्निनेत्राणि तेभ्य: देवेभ्य: इदं हवि: सुहुतमस्तु । दक्षिणस्यां सीदन्ति ये यमनेत्रेभ्य: तेभ्य: इदं हवि: सुहुतमस्तु । पश्चात्सीदन्ति ये विश्वदेवनेत्रेभ्य: तेभ्य: इदं हवि: सुहुतमस्तु । अत्तरस्यां सीदत: यौ मित्रावरूणौ ताभ्यां इदं हवि: सुहुतमस्तु । तथा ऊर्ध्वभागे सीदन्ति, परिचर्यावद्भ्य: सोमनेत्रेभ्य: इदं हवि: सुहुतमस्तु ॥

**ये देवाऽअग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्क्षिणासदस्तेभ्यः स्वाहा ये देवा व्विश्वदेवनेत्राः पश्श्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्राऽउपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥३६॥**

**पदपाठः-** ये । देवाः । अग्निनेत्त्राऽइत्यग्नि नेत्त्राः । पुरसदऽइतिपुरः सदः । तेभ्यः । यमनेत्त्राऽइतियम नेत्त्राः। दक्क्षिणासदऽइतिदक्क्षिणा सदः । व्विश्वदेवनेत्त्राऽइतिविश्वदेव नेत्त्राः । पश्श्चात्सदऽइतिपश्श्चात् सदः। मित्त्रावरुणनेत्त्राऽइतिमित्त्रावरुण नेत्त्राः । मरुन्नेत्त्राऽइतिमरुत् नेत्त्राः । उत्तरासदऽइत्युत्तरा सदः । सोमनेत्त्राऽइतिसोम नेत्त्राः। उपरिसदऽइत्युपरि सदः । दुवस्वन्तः ॥

**सरलार्थः-** ये देवा: अग्निनेत्राणि पुर: सद: तेभ्य: देवेभ्य: स्वाहा । ये देवा: यमनेत्राणि दक्षिणासद: तेभ्य: देवेभ्य: स्वाहा । ये देवा: विश्वनेत्राणि पश्चात्सद: तेभ्य: देवेभ्य: स्वाहा । ये देवा: मित्रावरुणनेत्राणि वा मरुन्नेत्रा:

उतरासदः तेभ्यः देवेभ्यः स्वाहा । ये देवाः सोमनेत्राणि उपरिसदः दुवस्वन्तः तेभ्यः देवेभ्यः स्वाहा ॥

**अग्ने सहस्व पृतनाऽअभिमातीरपास्य । दुष्टरस्तरन्नरातीर्व्वर्च्चोधा यज्ञवाहसि ॥३७॥**

**पदपाठः-** अग्ने । सहस्व । पृतनाः । अभिमातीरित्यभि मातीः । अप । अस्य ॥ दुष्टरः । दुस्तरऽइतिदुस्तरः । तरन् । अरातीः । व्वर्च्चः । धाः । यज्ञवाहसीतियज्ञ व्वाहसि ॥

**सरलार्थः-** हे अग्ने ! त्वं शत्रुसेनाः अभिभव । तथा च समग्रशत्रून् निवर्तय । किं भूतस्त्वम् ? दुष्तरः (केनापि तर्तुम् अशक्यः) अरातीः (शत्रुसेनाः विनाशयन्) हे अग्ने ! त्वं यज्ञनिर्वाहके यजमाने अन्नं देहि ॥

**देवस्य त्त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम्।**
**उपाᳲशोर्व्वीर्य्येण जुहोमि हतᳬ रक्षः स्वाहा रक्षसान्त्वा**
**व्वधायावधिष्म्म रक्षोवधिष्म्मामुमसौ हतः ॥३८॥**

**पदपाठः-** उपाᳲशोरित्युप अᳲशोः । व्वीर्य्येण । जुहोमि । हतम् । रक्षः । स्वाहा । रक्षसाम् । त्वा । व्वधाय । अवधिष्म्म । रक्षः । अवधिष्म्म । अमुम् । असौ । हतः ॥

**सरलार्थः-** उपांशुः नाम प्रथमः ग्रहः तस्य वीर्येण सह जुहोमि अतः राक्षसजातिः हत । सुहुतमस्तु । राक्षसानां नाशार्थं त्वां प्रास्यामि । वयं राक्षसजातिं हतवन्तः ॥

**सविता त्त्वा सवानाᳲ सुवतामग्निर्गृहपतीनाᳲ सोमो व्वनस्प्पतीनाम्।**
**बृहस्प्पतिर्व्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुब्भ्यो मित्रः सत्त्यो व्वरुणो**
**धर्म्मपतीनाम् ॥३९॥**

**पदपाठः-** सविता । त्वा । सवानाम् । सुवताम् । अग्निः । गृहपतीनामितिगृह पतीनाम् । सोमः । व्वनस्प्पतीनाम्॥ बृहस्प्पतिः । व्वाचे । इन्द्रः । ज्यैष्ठ्याय । रुद्र । पशुब्भ्यऽइतिपशु भ्यः । मित्रः । सत्त्यः । व्वरुणः । धर्म्मपतीनामितिधर्म्म पतीनाम् ॥

**सरलार्थः-** हे यजमान ! त्वां सुवतां प्रेरयतु । सर्वेषां गृहपतीनाम् आधिपत्ये आज्ञा-आदाने अधिकारी भव । सोमः वृक्षाणामाधिपत्ये सुवताम् । हे यजमान ! सर्वे वृक्षाः तपोपकारकाः भवन्तु । बृहस्पतिः वागर्थं त्वां पाण्डित्याय प्रेरयतु । इन्द्रः ज्येष्ठभावाय त्वां सुवताम् । रुद्रः पश्वाधिपत्ये त्वां सुवताम् । मित्रो देवः सत्यवाक्याय सुवताम् । वरुणः धर्मशीलानामाधिपत्ये सुवताम् ॥

**इमन्देवाऽअसपत्नᳬ सुवद्ध्वम्महते क्षत्त्राय महते ज्यैष्ठ्याय महते**
**जानराज्यायेन्द्रस्येन्द्रियाय । इममनुष्ष्य पुत्रममुष्यै पुत्रमस्यै व्विशऽएष**
**वोमी राजा सोमोस्माकम्ब्राह्मणानाᳲ राजा ॥४०॥**

**पदपाठः-** इमम् । देवाः । असपत्नम् । सुवद्ध्वम् । महते । क्षत्राय । ज्यैष्ठ्याय । जानराज्ययेतिजान राज्याय। इन्द्रस्य । इन्द्रियाय ॥ इमम् । अमुष्य । पुत्रम् । अमुष्यै । पुत्रम् । अस्यै । व्विशे । एषः । व्वः । अमीऽइत्यमी । राजा । सोमः । अस्माकम् । ब्राह्मणानाम् । राजा ॥

**सरलार्थः-** हे सवित्रादयः देवाः ! इमं यजमानं सपत्नरहितं कृत्वा प्रेरयद्ध्वम् । किमर्थम् ? महत्यै क्षत्रपदव्वै ज्येष्ठभावाय जनानामाधिपत्याय आत्मातानसामर्थ्याय इमं यजमानं प्रेरद्ध्यम् । किं भूतमिमम् । 'अमुष्येति' यजमानपितुर्नाम ग्राह्यम् । 'अमुष्यै' इति यजमानमातुर्नाम ग्राह्यम् । 'अस्यै' इति जातिनाम ग्राह्यम् । 'अमी' इति देशनाम ग्राह्यम् । हे कुरवः पञ्चालाः ? युष्माकम् एषः खदिरवर्मा राजा अस्तु । अस्माकं ब्राह्मणानां तु चन्द्रः, वल्लीरूपः सोमः राजा अस्तु ॥

## शब्दार्थाः

**क्रतुः** - यज्ञः, **क्षेमाय** - लब्धपरिपालनाय, **रय्यै** - धनाय, **प्रसवः** - उत्पादकः, **स्वाहा** - सुहुतमस्तु, **सम्राट्** - सर्वेषां भुवनानां राजा, **सनेमि** - पुराणनाम्, **अवसे** - तर्पणाय, **अन्वारभामहे** - आह्वानं कुर्महे, **चोदय** - प्रेश्य, **प्रयच्छ** - देहि, **यन्त्रिये** - नियमने, **अभिमातीन्** - शत्रून् ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) अस्मिन् पाठे ........................ यागस्य वर्णनं कृतमस्ति । (विष्णु, रुद्र, राजसूय)

(२) अन्नस्य उत्पादकः ....................... अस्ति । (वरुणः, प्रजापतिः, अश्विनीकुमारौ)

(३) सर्वस्य नियन्ता ........................ वर्तते । (यजमानः, ऋत्विक्, आचार्यः)

(४) वयं ........................ जागृयाम पुरोहिताः । (राष्ट्रे, ग्रामे, नगरे)

(५) ........................ अस्मभ्यं धनं प्रयच्छति । (ब्रह्मा, अग्निः, सोमः)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) दानादिगुणयुक्ता वाग्देवी अस्मभ्यं किं प्रयच्छति?

(२) एकाक्षरेण छन्दसा प्राणं कः जितवान्?

(३) पञ्चाक्षरेण छन्दसा पञ्चदिशः कः जितवान्?

(४) षडक्षरेण छन्दसा षडर्तून कः जितवान्?

(५) द्वादशाक्षरेण छन्दसा जगतीं के जितवन्तः?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) सोम॒ꣳ राजा॑नमव॑से॒ग्ग्निम॒न्वार॑भामहे ।
आ॒दि॒त्त्यान्विष्ष्णु॒ꣳ सूर्य्यं॑ब्र॒ह्माणं॑ञ्च॒ बृह॒स्प्पति॒ꣳ स्वाहा॑ ॥

(२) प्र नो॑ यच्छ॒त्त्वर्य्य॒मा प्प्र पू॒षा प्प्र बृह॒स्प्पति॑ः ।
प्र वाग्दे॒वी द॑दातु न॒ꣳ स्वाहा॑ ॥

(३) अग्ग्ने॒ सह॑स्व॒ पृत॑नाऽअ॒भिमा॑ती॒रपा॑स्य ।
दु॒ष्ट्टर॒स्त्तर॒न्नरा॑ती॒र्व्वर्च्चो॑धा य॒ज्ञवा॑हसि ॥

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) व्वाज॑स्ये॒मम्प्र॑स॒वꣳ ।

(२) अ॒र्य्य॒मण॒म् ।

(३) स॒वि॒ता त्त्वा॑ ।

**४. टिप्पणी लेख्या ।**

(१) अस्य पाठस्य अन्तिमपञ्च मन्त्राणां विषयं निरूपयत ।

(२) राजसूययागस्य विस्तारेण निरूपणं कुरुत ।

**५. शब्दानां विभक्ति परिचयं यच्छत ।**

(१) छन्दसा

(२) ऋतून्

(३) देवताम्

(४) अस्मिन्

(५) हे अग्ने

**६. क्रियापदानां परिचयं लिखत ।**

(१) जयेयम्

(२) स्थापयामि

(३) अस्तु

(४) जागृयाम्

(५) कुर्महे

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) मर्दायमायुः

(२) वाजयेयाय्ज्येन

(३) सिद्ध्यर्थम्

(४) अन्नस्योत्त्पादकः

(५) आपश्च

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) नियन्ता + असि

(२) धारकः + च

(३) अस्मासु + अस्तु

(४) हविः + इदम्

(५) स्व + इच्छया

**छात्र-प्रवृत्तिः**

- राजसूययागस्य दर्शनं कृत्वा कथं विधिः भवतीति ज्ञानम् प्राप्तव्यम् ।

**विशिष्टज्ञानम्**

- यान्ति प्रमादमन्द्राः । (अथर्वः २०/१८/०३)
  प्रमादादिगुणाः गच्छन्ति ।

# १४ सामवेदीयरुद्राभिषेकमन्त्राः १

**प्रस्तावना**

भारतीयसांस्कृतिकपरम्परायां वेदनां स्थानं गौरवास्पदमस्ति । वेदशब्दोऽयं विद् ज्ञाने, विद् लाभे, विद् सत्तायाम्, विद् विचारणे इति चतुर्भिर्धातुभिर्व्युत्याद्यते । सायणाचार्यादयो हि भाष्यकृतः वेद्यन्ते ज्ञाप्यन्ते धर्मादिपुरुषार्थचतुष्ट्योपाया अनेनेति ज्ञापनार्थकात् वेद्यन्ते लभ्यन्तेऽनेन पुरुषार्था इति निर्ब्रुवते । आधुनिकभाष्यकारेण स्वामिना दयानन्देनापि स्वकीयऋग्वेदादिभाष्यभूमिकायाम् – "**विन्दन्ति जानन्ति विद्यन्ते भवन्ति विन्दन्ति सर्वाः सत्यविद्या यैर्येषु वा स वेद**" इति व्युत्पत्तिः कृता ।

प्रधानतया वेदो द्विविधः मन्त्ररूपो ब्राह्मणरूपश्च । मन्त्रसमुदाय एव संहिता शब्देन व्यवहृतः । ब्राह्मणभागोऽपि ब्राह्मणारण्यकोपनिषद भेदात् त्रिविधः । वेदः ईश्वरीयं ज्ञानम्, वेदो ह्यशेषज्ञानविज्ञानराशिः । सर्वेषु वेदेषु चोपनिषत्सु सामवेदस्य गौरवमयं स्थानं महन्महत्त्वञ्च दरीदृश्यते । तद्यथा बृहद्देवतायाम् – सामानि यो वेत्ति स वेद तत्त्वम् । ऋग्वेदेऽपि यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति । अथर्ववेदे तु सामस्य लक्षणम् प्रदत्तम् उक्तञ्च – अमोऽहमस्मि सा त्वम् । सामहमस्मि ऋक् त्वम् । सा अर्थात् ऋच अमः अर्थात् तया सह सम्बद्धः स्वः यत्र वर्तते तत् साम । बृहदारण्यकोपनिषदि – सा च अमश्च इति तस्य साम्यः सामत्वम् । जैमिनिसूत्रे – गीतिषु सामाख्या अर्थात् साम शब्दः गीतिवाचक इति दर्शितोऽस्ति । भगवद्गीतायाम् – प्रणवः सर्वभूतेषु ओङ्कारः सर्ववेदानाम् इत्युक्त्वा श्रीकृष्णः सामवेदं स्वस्यैव स्वरूपं जगाद–यथा–वेदानां समवेदोऽस्मि इति । अतः सुस्पष्टं यत् साममन्त्राः वेदवाटिकायाः सुमनोहराणि पुष्पाणीव राराजन्ते । वेदमूर्तिः श्रीपाददामोदर सातवलेकरमहोदयः सामवेदस्य महत्तां दर्शयति यत् गद्यापेक्षया छन्दसः, छन्दोऽपेक्षया काव्यस्य, काव्यापेक्षया च गानस्य विशेषो प्रभावः वरीवर्तते ।

महाभाष्यकारानुसारेण सहस्रवर्त्मा सामवेदः अर्थात् सामवेदस्य सहस्रशाखाः आसन् । अद्यत्वे तु पुनः कौथुम–राणायणीय–जैमिनीया तिस्र एव शाखाः उपलभ्यन्ते । सामवेदस्योपवेदः गन्धर्ववेदः मन्यते । उपवेदोऽयं सामगानस्य संगीतविद्यायाश्च व्यावस्थापकः रागरागिणीनां सप्त–स्वर–താललयादीनां परिचायकश्चास्ति ।

वेदत्रय्याम् रुद्रदेवता अप्रधानदेवता इति मन्यते यतो हि परवर्तिवाङ्मये परमात्मनः अग्निरूपा–संहारकशक्तिरूपेण संस्तूयते । रुद्रः नियन्तारूपेणास्माकं देहे निवसति यथा अग्निः । सामवेदस्यारम्भे अग्निरूपरुद्रस्यामिषेको भवति । प्रस्तुतोऽयं पाठः सामवेदस्याग्नेयकाण्डात् तृतीयखण्डाद् अवतारितोऽस्ति । अग्निदेवतासम्बन्धिन एते मन्त्राः सन्ति । अग्निदेवतामुद्दिश्य परमेश्वरस्य स्तुतिप्रार्थनोपासना ऋषिभिः कृता । एतेषां मन्ताणां विनियोगः रुद्राभिषेके कृतो वर्तते ।

---

**अग्निं वो वृधन्तामध्वराणां पुरुतमम् ।**

**अच्छा नप्त्रे सहस्वते ॥१॥**

**सामगानम्ः-** (२१-१) अग्निवोवृधान्ताम् । आध्वराणाम् । पुरूतामौ । होवाऽ३हाइ ॥ ओच्छाऽ२नाप्त्रेऽ२३ ॥ सडोऽ२३४ वो । स्वाऽ५तोऽ६हाई ॥

**सरलार्थः-** हे ऋत्विजः यूयम् अध्वराणाम् अहिंस्यानां बलिनां बलवन्तं ज्वालाभिर्वर्द्धमानं पुरुतमम् अतिशयेन बहुमग्निम् अभिगच्छत ॥

**अग्निस्तिग्मेन शोचिषायꣳसद्विश्वं न्या३त्रिणम् ।**

**अग्निर्नो वꣳसते रयिम् ॥२॥**

**सामगानम्ः-** (२२-१) आग्नाओऽ२३४वो ॥ तिग्मेनऽ३शो । चाइषाओऽ२३४वो ॥ याꣳसाओऽ२४वो ॥ वाइश्रान्निया। त्राइणाओऽ२३४वो ॥ अग्निर्नोऽ२वꣳसतेरयीऽ१म् ॥

**सरलार्थः**:- अयम् अग्निः तिग्मेन शोचिषा तीक्ष्णेन तेजसा विश्वम् सर्वम् अत्रिणम् अत्तारम् राक्षसादिकम् नियंसत् निहन्तु अपि च न अस्मभ्यम् अग्निः रयिं धनं वसंते ददातु ॥

**अग्ने मृड महाँ असि य ईमा देवयुं जनम् ।**
**इयेथ बर्हिरासदम् ॥३॥**

**सामगानम्**:- (२३-१) अग्नाइमृडाऽ२ । महाँऽओऽ२३४सी ॥ अयआदाऽ२इ । वयुञ्जाऽ२३४नाम् ॥ इयेथबाऽ२३ ॥ हिराऽ३साऽ५दाऽ६५६म् ॥

**सरलार्थः**:- हे अग्ने ! त्वम् अस्मान् सुखय । सः त्वं महान् प्रभूतो भवसि । यः त्वम् गन्ता देवानां कामयितारं यजमानं दर्भम् यज्ञ आगच्छसि ।

**अग्ने रक्षाणो अंहसः प्रति स्म देव रीषतः ।**
**तपिष्ठैरजरो दह ॥४॥**

**सामगानम्**:- (२४-१) अग्नेराऽ३क्षाणोअंऽहसाः ॥ प्रतिष्मदेवरिषाऽ२३ताः ॥ तपाइष्ठाऽ२३इरा ॥ जरोदाऽ२३हाऽ३४३ । ओऽ२३४५इ ॥ डा ॥

**सरलार्थः**:- हे अग्ने ! त्वं अस्मान् पापात् पाहि । हे देव द्योतमानाग्ने जराहितस्त्वं हिंसतः शत्रून् तपिष्ठैरतिशयेन भस्मीकुरु ।

**अग्ने युंक्ष्वा हि ये तवाश्वासो देवसाधवः ।**
**अरं वहन्त्याशवः ॥५॥**

**सामगानम्**:- (२५-१) अग्नेयूऽ३ङ्क्ष्वाहियेतवा ॥ अश्वासोदेवसाधाऽ२३वाः ॥ अरंबाऽ२३हा ॥ तियाशाऽ२३वाऽ३४३ः॥ ओऽ२३४५इ ॥ डा ॥

**सरलार्थः**:- हे द्योतमान अग्ने ! तान् अश्वान् आत्मीये रथे योजय । ये त्वदीयाः अश्वाः क्षिप्रगामिनः सन्ति ते - पर्य्याप्तं त्वदीयं रथं वहन्ति॥

**नित्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।**
**सुवीरमग्न आहुतः ॥६॥**

**सामगानम्**:- (२६-१) नित्वा । होऽ२इ । न । क्षिया ॥ वाइश्पताइ । द्युमन्तम् । धाइ । माहेवाऽ२३४याम् ॥ सुवोहाइ॥ रामग्नाओऽ२३४वा । होऽ५तोऽ६हाइ ॥

**सरलार्थः**:- आहुत सर्वैर्यजमानैरभिहुताग्निदेव! द्युमन्तं दीप्तिमन्तं सुवीरं कल्याणस्तोतृकं त्वां वयम् निरन्तरं ध्यायमः ॥

**अग्निर्मूर्ध्वा दिवः ककुत्पतिःपृथिव्या अयम् ।**
**अपाꣳरेताꣳसि जिन्वति ॥७॥**

**सामगानम्**:- (२७-१) अग्निर्मूर्द्धादीऽ६वैःककूत् ॥ पातीऽ२पार्थीऽ२ । वियोअयाम् ॥ अपाऽ२ꣳरोइताऽ२ ॥ सिजिन्वाऽ२३ताऽ३४३इ । ओऽ२३४५इ ॥ डा ॥

**सरलार्थः**:- अयं मूर्ध्वा देवानां श्रेष्ठः द्युलोकस्य उच्छ्रितः पृथिव्याः पतिः अग्निदेवोऽपां वीर्यरूपाणि स्थावरजंगमात्मकानि भूतानि प्रीणयति ।

**इममूषु त्वमस्माकꣳसनिं गायत्रं नव्याꣳसम् ।**

**अग्ने देवेषु प्र वोचः ॥८॥**

**सामगानम्:-** (२८-१) इममूषू ॥ त्वमास्माऽ२३४काम् । सानीऽ२ऽहोइ । गायाऽ२हौ । त्रन्नाव्याऽ२३ऽसाम् ॥ आग्नेऽ२होइ। दाइवाऽ२हौ ॥ पुप्रावोऽ२३चाऽ३४३: । ओऽ२३४५इ ॥ डा ॥

**सरलार्थ:-** हे अग्निदेव ! त्वमस्माकम् पुरोदेशेऽनुष्ठीयमानम् हविर्दानं नव्यांसं नवतरं गायत्रं स्तुतिरूपं वचोऽपि देवानाम् अग्रे प्रब्रूहि ॥

**तं त्वा गोपावनो गिरा जनिष्ठदग्ने अङ्गिरः ।**

**स पावक श्रुधी हवम् ॥९॥**

**सामगानम्:-** (२९-१) तंत्वागोपा ॥ वानोऽ२गाऽ२३४इरा । जनाइष्ठदा । ग्नयाऽ२ङ्गाऽ२३४इरा: ॥ सपौवाओऽ२३४वा। कौवाओऽ२३४वा ॥ श्रुधीऽ५हवाम् । होऽ५इ ॥ डा ॥

**सरलार्थ:-** हे अग्ने त्वां गोपवन: ऋषि: स्तुत्या जनयति वर्द्धयति स: तादृशाग्नि अङ्गिरस: पुत्र ! पावक शोधक! हवं गोपवनस्याह्वानं श्रुणु ॥

**परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।**

**दधद्रत्नानि दाशुषे ॥१०॥**

**सामगानम्:-** (३०-१) पर्यो । होइवाजा ॥ पताइ:काऽ१वीऽ२: । आग्निर्हव्या । नायक्रमीऽ२त् ॥ दधाऽ२३त् ॥ राऽ२त्नाऽ२३४औहोवा ॥ निदाशुषेऽ२३४५ ॥

**सरलार्थ:-** वाजपति: क्रान्तदर्शी मेधावी दाशुषे हविर्दत्तवते यजमानाय रत्नानि धनानि प्रयच्छन् अग्नि: हव्यानि परिक्रामति॥

**उदु त्यं जातवेदसं देवं वहन्ति केतवः ।**

**दृशे विश्वाय सूर्य्यम् ॥११॥**

**सामगानम्:-** (३१-१) उदुत्यम् । ओहाइ ॥ जा । तवेऽ२दाऽ२३४साम् । देवंवहा । तीकेताऽ२३४वा: ॥ दाऽ२३४शेहाइ॥ वाइश्वायसू । र्याम् । औऽ२३होवा । होऽ५इ ॥ डा ॥

**सरलार्थ:-** सूर्यरश्मय: सर्वस्मै भुवनाय द्रष्टुम् तं प्रसिद्धम् जातवेदसं वेदितारं देवं सूर्य्यम् सर्वस्य प्रेरकमादित्यम् ऊर्ध्वम् वहन्ति ॥ (उ इति पादपूरण:)॥

**कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।**

**देवममीवचातनम् ॥१२॥**

**सामगानम्:-** (३२-१) कविमग्निम् ॥ उपाऽ२३ । स्तूऽ२हाऽ२३४औहोवा । सत्यधर्माणमध्वरे ॥ देवाम् ॥ अमीवचाताऽ२३नाऽ३४३म् । ओऽ२३४५इ ॥ डा ॥

**सरलार्थ:-** हे स्तोतृसंघ ! अध्वरे क्रतौ कविं मेधाविनं सत्यधर्माणम् सत्यवचनरूपेण धर्मेणोपेतं देवं द्योतमानम् अमीवचानतम् अमीवानां हिंसकानां शत्रूणां वा घातकम् अग्निम् उपस्तुहि उपेत्य स्तुतिं कुरु ॥

**शं नो देवीरभिष्टये शं नो भवन्तु पीतये ।**

**शं योरभिस्त्रवन्तु नः ॥१३॥**

**सामगानम्:-** (३३-१) शन्नोदेवीः । अभिष्टाऽ२३याऽ३४३इ ॥ शन्नोभवा ॥ तुपीताऽ२४याऽ३४इ ॥ शंयोरभी ।। स्त्रव। तूऽ२ । नोऽ२३४ । औहोवा ॥ ऊऽ२३४पा ॥

**सरलार्थः-** दिव्यगुणयुक्ता आपः अस्माकं अभिष्टये सुखं भवन्तु । अपि अस्मत्सम्बन्धिने पानाय सुखं भवन्तु । उत्पन्नानां रोगाणां शमनाय अनुत्पन्नानां च पृथक्करणाय भवन्तु । तथा एताः नः अस्माकम् उपरि सिञ्चन्तु वा ॥

**कस्य नूनं परीणसि धियो जिन्वसि सत्पते ।**

**गोषाता यस्य ते गिरः ॥१४॥**

**सामगानम्:-** (३४-१) कस्यानूऽ१नाऽ२म् । परीणाऽ२३४सी ॥ धियोजिन्वाऽ२ । सिसत्पाऽ२३४तोइ । गोषातायोऽ२३॥ स्योऽ२तोऽ२३४औहोवा ॥ उप् । गीऽ२३४रोः ॥

**सरलार्थः-** अग्ने ! नूनम् इदानीं, कस्य जनस्य परीणसि ब्रह्मणि, धियः कर्माणि जिन्वसि । यस्य सम्बन्धिन्यः स्तुतयः गवां लाभे भवन्तु । तस्मात्त्वं कुत्र तिष्ठसि ? अस्माकमिदानीं गवेच्छा प्रवर्त्तते । यद्वा, हे अग्ने ! त्वमिदानीं कस्य कर्माणि प्रीणयसि ? न कस्यापीत्यर्थः । अस्माकमेव कर्माणि प्रीणयेति भावः ॥

## शब्दार्थः

**अध्वराणाम्** - अहिंस्यानाम् बलिनाम्, **नप्त्रे** - बन्धुम्, **सहस्वते** - बलवन्तम्, **तिग्मेन** - तीक्ष्णेन, **शोचिषा** - तेजसा, **अत्रिणम्** - अत्तारम्, **देवयुम्** - देवानां कामयितारम्, **विश्यते** - हे धनपते ! **ककुत् उच्छ्रितः** - महोत्यः, **जिन्वति** - प्रीणयति, श्रृणु, **जातवेदसम्** - जातानां प्राणिनां वेदितारम्, **कविम्** - मेधाविनम्, **अभिष्टये** - अस्मद् यज्ञाय, **पीतये** - पानाय, **गिरः** - स्तुतयः **गोसाता** - गोसातौ गवां लाभे ॥

## स्वाध्यायः

१. **निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) अयम् अग्निः ........................ निहन्तु । (राक्षसादिकम्, यक्षादिकम्, गंधर्वादिकम्)

(२) हिंसतः शत्रून् ........................ भस्मीकुरु । (पयोभिः, तेजोभिः, पृथ्विभिः)

(३) रथे प्रयुज्यमानाः अश्वाः ........................ सन्ति । (क्षिप्रधामिनः, क्षिप्रवामिनः, क्षिप्रगामिनः)

(४) सूर्यं सर्वस्य ........................ वहन्ति । (उर्ध्वं, मध्यमं, नीचं)

(५) आपः अस्माकम् ........................ स्त्रवन्तु । (परि, अभि, प्रति)

२. **निम्नाङ्कितानां प्रश्नानां एकैकवाक्येनोत्तराणि लिखत ।**

(१) सामवेदपरंपरायां सामगानम् इति किम् ?

(२) प्रथमे मन्त्रे के कमभिगच्छन्ति ?

(३) अग्निरस्मान् कुत्र योजयति ?

(४) सूर्यरश्मयः कमुद्वहन्ति ?

(५) आपः केषां शमनाय भवन्तु ?

३. **पञ्चभि:वाक्यैरुत्तरं दीयताम् ।**

(१) रुद्राभिषेकस्य महत्त्वम् निरूपयत ।

(२) अस्मिन् पाठ्यांशे अग्ने: स्वरूपम् कीदृशम्?

(३) अग्ने: गुणा: कीदृशा: ?

(४) पाठ्यांशेऽस्मिन् वैदिकप्रयोगा: सन्ति तान् दर्शयत ।

(५) अग्ने: रुद्रस्वरूपम् ।

४. **मन्त्रद्वयस्य सरलार्थं लिखत ।**

(१) अग्ने मृड महाँ अस्य आ देवयुं जनम् । इयेथ बर्हिरासदम् ॥

(२) परि वाजपति: कविरग्निर्हव्यान्यक्रमीत । दधद्रत्नानि दाशुषे ॥

५. **मन्त्रद्वयस्य पूर्तिं कुरुत ।**

(१) नित्वा नक्ष्य ......................... सुवीरमग्न आहुत: ॥

(२) शं नो देवी: ......................... अभिस्रवन्तु न: ॥

६. **शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) नप्त्रे

(२) रीषत:

(३) सनिम्

(४) दाशुषे

(५) परीणसि

७. **क्रियापदानां परिचयं लिखत ।**

(१) इयेथ

(२) युङ्क्ष्व

(३) जिन्वति

(४) श्रुधि

(५) स्रवन्तु

८. **सन्धिविच्छेदं कुरुत ।**

(१) वहन्त्याशव:

(२) हव्यान्यक्रमीत्

(३) देवममीवचातनम्

९. **सन्धिमेलनं कुरुत ।**

(१) तपिष्ठै: + अजर:

(२) दधत् + रत्नानि

(३) यो: + अभि

**छात्र-प्रवृत्ति:**

- षड्जादिसप्तस्वरा अङ्गीकार्या सामगायनाभ्यासश्च करणीय: ।

सामवेदीयवाङ्मयरूपसाहित्यानां संग्रह: कार्य: ।

**विशिष्टज्ञानम्**

- नित्वा नक्ष्य विश्यते द्युमन्तं धीमहे वयम् ।

  वयं दीप्तिमन्तं यशस्मन्तं च धीमहे स्तुतिं कुर्म:

●

# १५ सामवेदीयरुद्राभिषेकमन्त्राः २

**प्रस्तावना**

सर्वसम्मतं प्रायः इदं तथ्यम् अस्ति यत् ऋग्वेदः विश्वस्य उपलब्धं प्राचीनतमं वाङ्मयम् अस्ति । समनन्तरम् एव इदमण्येकं तथ्यम् अस्ति यत् विश्वस्य प्राचीनतमं गेयस्वरूपं सामवेदे निहितमस्ति । संगीतविद्याया आदिमस्रोतः सामवेद एव ।

सामवेदाधारितगीतिरूपप्रणवतत्त्वम् परवर्तिसाहित्ये ॐकारस्वरूपे नादब्रह्मस्वरूपे वा अनवरतं प्रणीतमस्ति । गीत नृत्यं वाद्यञ्च एतानि त्रीणि प्रस्थानानि सामवेदस्योवपेदभूतगन्धर्ववेदात् समुद्भूतानि । एतैः त्रिभिः प्रस्थानैः देवताराधनादिकं भवति समानरूपेण च निर्विकल्पसमाधिप्रयोजनम् अपि सिद्धं भवति ।

सामवेदस्य बहूनि ब्राह्मणानि सन्ति–यथा पञ्चविंश ब्राह्मणम् षड्विंश ब्राह्मणम्, ताण्ड्य ब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम् च । सामवेदस्य द्वे उपनिषदौ मुख्ये स्तः केनोपनिषद छान्दोग्योपनिषच्च । सामवेदस्य आरण्यकम् एकमपि नास्ति । सामवेदस्य एकमार्षेयकल्पसूत्रमस्ति । अस्मिन् सामगीतीनां तत्तद्विशिष्टानुष्ठानेषु विनियोगानां विवरणमस्ति। सामवेदस्य कौथुमशाखायाः लाट्यायनश्रौतसूत्रम्, राणायणीयशाखायाः द्राह्यायणश्रौतसूत्रम् एकञ्च जैमिनीयशाखायाः जैमिनीयश्रौतसूत्रं सुरक्षितमुपलभ्यते । सामवेदस्य गृह्यसूत्रं तु कौथुमीयं गोभलगृह्यसूत्रं, राणायनीयखादिरं गृहसूत्रम् एवञ जैमिनीयं गृह्यसूत्रम् समुपलभ्यते ।

प्राधान्येन सामवेदः द्विधा विभक्तः प्रथमो भाग आर्चिकः द्वितीयो गीतिभागश्च । आर्चिक अर्थात् ऋचां समूहः। छन्दसः प्रयुज्यमानानि वाक्यानि ऋचः भवन्ति । आर्चिकस्याधारेण यद् गानं भवति तत्सामगानमेव । आर्चिकस्य अपि द्वौ भागौ पूर्वार्चिकः उत्तरार्चिकश्च । पूर्वार्चिके षट् प्रपाठका अध्यायाः वा सन्ति । पूर्वार्चिकस्य प्रथमे प्रपाठके द्वौ खण्डौ स्तः । प्रत्येकेऽस्मिन् खण्डे एका दशतिः, प्रत्येकस्यां दशत्यामनियता ऋचः विद्यन्ते । प्रथमप्रपाठकः आग्नेयकाण्ड नाम्ना प्रसिद्धः । अस्मिन् आग्नेयकाण्डे अग्नेः स्तुतिः कृता वर्तते ।

सामवेदे सर्वमाहत्य १८७५ ऋचः सन्ति । सामवेदे १५०४ ऋचः ऋग्वेदस्य सन्ति, आसु २६७ ऋचः पुनरावर्तनानि सन्ति । सामवेदे नवीना ऋचः ९९ सन्ति, आसु पञ्च पुनरावर्तनानि सन्ति । इत्थं संयुक्ताः सर्वाः ऋचः १८७५ भवन्ति ।

सामवेदस्य गीतिभागे चतुर्विधा मन्त्रा उपलभ्यन्ते–ग्रामगाना मन्त्राः आरण्यकगानमन्त्रा ऊहगानमन्त्राः ऊह्यगानमन्त्राश्चेति। भारतीयसंगीतशास्त्रस्य मूलमेते एव मन्त्राः । एतेषां मौलिकसिद्धान्ताः दुष्कराः दुरुहाः भवन्ति । सामगायकाः संगीतानुकूलं शाब्दिकं परिवर्तनं कुर्वन्ति तत् सामविकार इति कथ्यते । सामविकारस्यापि षट्भेदाः वर्तन्ते ते यथा १, विकारः २, विश्लेषणम् ३, विकर्षणम् ४,अभ्यासः ५, विरामः ६,स्तोमः इति ..नारदीय शिक्षानुसारं सामशिक्षायाम् सप्त स्वराः, त्रयः ग्रामाः एकविंशतिः मूर्च्छना एवञ्च एकोनपञ्चाशत् तानानि सन्ति । अस्मिन् पाठे प्रदत्तानां मन्त्राणां प्रयोजनम् सामवेदीयपद्धत्यां रुद्राभिषेकविधानम् अस्ति ।

---

**यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।**

**प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ।।१॥**

**सामगानम्:-** (३५-१) यज्ञायज्ञा ॥ वोअग्नयाऽ३इ । गिराऽ२गिराऽ३४ । हाहोऽ३ऽ। चादक्षाऽ२३४साइ । प्रप्राऽ२वयममृतंजा। तावेंऽ१दासाऽ२म् ॥ प्रियम्मित्राम् । नशंसिषाम् ॥ एहिया । औहौहोऽ२३४५इ । डा॥

**सरलार्थः-** हे स्तोतारः ! यूयं सर्वेषु यागेषु प्रवृद्धाय अग्नये स्तुतिरूपया वाचा स्तोत्रं कुरुत । वयमपि तं अमृतं जातवदेसम् मरणरहितं जातानां वेदितारं जातप्रज्ञानम् अग्निं मित्रं न सखीभूतमिव प्रियम् अनुकूलम् अग्निम् पुनः पुनः शंसामः ॥

**पाहि नो अग्न एकया पाह्यु३त द्वितीयया ।**
**पाहि गीर्भिस्तिसृभिरूर्जांपते पाहिचतसृभिर्वसो ॥२॥**

**सामगानम्:-** (३६-१) पाहिनोऽ३अग्नएकया ॥ पाहियुत । द्वितीयोऽ१याऽ२ । पाहिगीर्भिस्तिसृभिः । ऊर्जाम्पोऽ१ताऽ२इ। पाहिचतौऽ३ । होऽ३वा ॥ सृभिर्वाऽ२३साऽ३४३उ । ओऽ२३४५इ ॥ डा ॥

**सरलार्थः-** हे अग्ने ! अस्मान् एकया ऋचा गिरा रक्ष । अपि च द्वितीयया ऋचा पालय । ऊर्जांयते अन्नानां बलानांवा हे स्वामिन् ! तिसृभिरस्तुतिभिः अस्मान् पाहि । हे वसो ! वासक ! अग्ने ! चतसृभिः स्तुतिभिः पाहि॥

**बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।**
**भरद्वाजे समिधानो यविष्ठयरेवत्पावक दीदिहि ॥३॥**

**सामगानम्:-** (३७-१) बृहाद्भीऽ२३रग्नेअर्चिभिहाउ ॥ शुक्राइणदेवशोचिषा । भराद्वाऽ१जेऽ२३ । होवाऽ३हाइ । समिधानः। योविष्ठियाऽ२३ । होवाऽ३हाइ ॥ रेवांत्पोऽ१वाऽ२३ । होवाऽ३हाइ ॥ कादीदिहि । इडाऽ२३भाऽ३४३ । ओऽ२३४५इ ।। डा ॥

**सरलार्थः-** हे अग्ने ! शुक्रेण निर्मलेन शोचिषा तेजसा भरद्वाजे अस्मद्भ्रातरि समिधानः त्वं बृहद्भिः तेजोभिः, अस्मदर्थे धनयुक्तं यथा भवति तथा दीप्यस्व ।

**त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।**
**यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥४॥**

**सामगानम्:-** (३८-१) त्वाआऽ२३ग्नेस्वाहुतहाउ ॥ प्रियासस्सन्तुसूरयः । यन्तारोऽ१याऽ२३४इ । मघवानोजना । नोऽ३म्॥ ऊर्वन्दयाऽ२३हो ॥ तगोनाऽ२म् । इडाऽ२३भाऽ३४३ । ओऽ२३४इ ॥ डा ॥

**सरलार्थः-** हे स्वाहुत अग्ने तव स्तोतारः, प्रियाः सन्तु किञ्च ये मधवानः अस्मदीयानाम् समूहम् गवां च समूह प्रयच्छन्ति, ते च तव प्रियाः भवन्तु इति ॥

**अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः । अप्रोषिवान्**
**गृहपते महाॅंअसि दिवस्पायुर्दुरोणयुः ॥५॥**

**सामगानम्:-** (३९-१) अग्नेजरितर्विश्पतिः । औहोवा । एहियां । हाउ ॥ तपानोदेऽ२वरक्षसः । अप्रोषोऽ१इवाऽ२न्। गार्हपताऽ३इ । माहाॅंऔऽ२३४सी ॥ दिवाः । पायोवाओऽ२३४वो ॥ हाऽ३हाइ । दुरोऽ५णयूः । होऽ५इ ॥ डा ॥

**सरलार्थः-** हे अग्निदेव ! स्तोतः प्रजानां पालकः राक्षसानां सन्तापकः असि । हे गृहपते ! त्वम् अप्रोषिवान् यजमानस्य गृहमत्यजन् महान् अतिशयेन पूज्योऽसि । द्युलोकस्य पाता मिश्रयित्वा । तादृशस्त्वं महान असि।

**अग्ने विवस्वदुषसश्चित्रॅं राधो अमर्त्य । आ**
**दाशुषे जातवेदो वहा त्वमद्या देवाॅंउषर्बुधः ॥६॥**

**सामगानम्:-** (४०-१) अग्नेविवाहाउ ॥ स्वाऽ३दूषाऽ३साः । चाइत्राऽ३ॅहाइ । राधोऽ३होऽ३इ । अमाऽ२र्ताऽ२३४या। आदोऽ१शुषेऽ२ । जातवेदः । बहोतूऽ१वाऽ२म् ॥ अद्याहोइ । दाऽ२३वाॅं ॥ उषः । बूऽ२धाऽ२३४औहोवा॥ हुवेवसूऽ२३४५ ॥

**सरलार्थः-** हे अग्ने ! त्वम् उषोदेवतायाः सकाशात् धनं यजमानाय आनीय । सोऽग्निर्विशिष्यते । अमर्त्य मरणसहित! हे जातवेदः कीदृशं राधः विवस्वत् विशिष्टनिवासोपतम् । चित्र नानाविधम् । किञ्च । अद्य अस्मिन् उषःकाले प्रबुद्धान् देवान् आवह ।

**त्वं नश्चित्र ऊत्या वसो राधाᳬंसि चोदय ।**
**अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥७॥**

**सामगानम्:-** (४१-१) त्वन्नाऽ२३श्चित्रऊत्या । वसोराधा । सिचोदाऽ१याऽ२३ । अस्यारोऽ२३४याः । त्वमग्ने । स्थाइरासाऽ३इ ॥ वीदागाऽ२३४धाम् । तुचाऽ२३हाइ ॥ तुना । औऽ३होवा । होऽ५इ ॥ डा ॥

**सरलार्थः-** हे वासक ! अग्ने चित्रः दर्शनीयस्त्वम् रक्षया सह धनानि अस्मभ्यं प्रेरय। अस्मिन् लोके परिदृश्यमानस्य धनस्य त्वं नेता भवसि । तस्मात् कारणात् अस्मभ्यं धनानि प्रेरय । अपि च अस्माकं पुत्राय गाधं प्रतिष्ठां तु क्षिप्रं विदाःलंभय ।

**त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः । त्वां**
**विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥८॥**

**सामगानम्:-** (४२-१) हाउत्वमीत्सप्रथाअसिहाउ ॥ आग्नेत्रातः । ऋताःकवाऽ२३४इः । हाहोइ । त्वांविप्रासःसमिधा । नादीदिवाऽ३४ः । हाहोइ ॥ आविवासाऽ३४ । हाहोऽ३ ॥ तिवोऽ२३४वा । धाऽ५सोऽ६हाइ ॥

**सरलार्थः-** हे अग्ने ! रक्षक सत्यभूतः कविः त्वमेव सर्वतः पृथुः असि । हे समिधान ! त्वां विप्राः मेधाविनः स्तोतारः विचरन्ति ।

**आ नो अग्ने वयोवृधᳬंरयिं पावक शᳬंस्यम् ।**
**रास्वा च न उपमाते पुरुस्पृहᳬंसुनीती सुयशस्तरम् ॥९॥**

**सामगानम्:-** (४३-१) आनोअग्नेवयोवृधम् । एऽ३४ । रयाऽ३४५इम् । पावऽ३काशंसाऽ२३याम् । रास्वाचनउपमाते। पूरुस्पृहाऽ२म् ॥ सुनाइताइसूऽ३हाइ ॥ यशस्तराम् । औऽ२३होवा । होऽ५इ ॥ डा ॥

**सरलार्थः-** हे अग्ने ! वयोवृधम् अन्नस्य वर्द्धकं स्तुतिवन्तं धनं अस्मभ्यम् आभरेति शेषः आहृत्य च हे उपास्मात्समीपे मातिर्धृतमित्युपमातिः, हे तादृश अग्ने अस्मभ्यं शोभननयेन बहुभिः सुयशस्तरम् किर्तिं धनं देहि ॥

**यो विश्वादय ते वसु होता मन्द्रो जनानाम् ।**
**मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यंत्वग्नये ॥१०॥**

**सामगानम्:-** (४४-१) योविश्वाऽ३दायतेवसू ॥ होताऽ२मान्द्रोऽ२ । जनानाम् । माधोऽ२नीपाऽ२ । त्राप्रथमान्यस्मै ॥ प्रास्तोऽ२मायाऽ२३ ॥ तुवोऽ२३४वा । ग्नाऽ५योऽ६हाइ ॥

**सरलार्थः-** होता मोदमानः यः अग्निः सर्वाणि धनानि जनेभ्यः प्रयच्छति । तस्मै अग्नये मधोः न मदकरस्य सोमस्येव प्रथमानि मुख्यानि पात्राणि स्तोत्राणि गच्छन्ति॥

## शब्दार्थः

**दक्षसे** प्रवृद्धाय अग्नये, **ऋचा** - गिरा, **शुक्रेण** - निर्मलेन, **गोनां** - गवाम्, **विश्पतिः** - प्रजानां पालकः, **राधः** - धनम्, **पावक** - शोधक, **स्तोमः** - स्तोत्रम् ॥

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) सामवेदस्य गीतिभागे ........................ मन्त्राः उपलभ्यन्ते । (पञ्चविधाः, षड्विधाः, चतुर्विधाः)

(२) ........................ अग्निं पुनः पुनः शंशामः । (सखीभूतम्, शत्रुभूतम्, इतभूतम्)

(३) बलानां हे स्वामिन् अग्निः ........................ अस्मान् पाहि ।

(त्रिभिरस्तुतिभिः, द्विभिस्स्तुभिः, पञ्चभिस्स्तुभिः)

(४) राक्षसानां संतापकः ........................ अस्ति । (वायुः, सूर्यः, अग्निः)

(५) उषादेवतातः अग्निः ........................ यच्छति । (दानं, भोगं, धनम्)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) संहिता अर्थात् किम्?

(२) ब्राह्मणग्रन्थस्य वर्ण्यविषयो कः?

(३) ऋषि कस्य कीदृशी च समृद्धिरभिकांक्षति?

(४) अग्निः कस्य पालकः कुत्र च वासकर्ता अस्ति?

**३. पञ्चभिःवाक्यैरुत्तरं दीयताम् ।**

(१) शिक्षाग्रन्थानां वर्ण्यविषयाः ।

(२) सामगाने कोऽधिकारी भवितुमर्हति?

(३) अस्मिन् पाठ्यांशे अग्नेर्विशेषणानि कीदृशानि?

(४) सामवेदस्य स्वरूपं वर्णयत ।

**४. मन्त्रद्वयस्य सरलार्थं लिखत ।**

(१) त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मधवानो जनानामूर्वं दयन्त गोनाम् ॥

(२) त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥

**५. मन्त्रद्वयस्य पूर्तिः कुरुत ।**

(१) पाहि नो ........................ चतसृभिर्वसो ॥

(२) त्वं नश्चित्र ........................ तुचे तु नः ॥

६. **शब्दानां परिचयं दत्त ।**

| | |
|---|---|
| (१) भरद्वजे | (४) तुचे |
| (२) जरितः | (५) मधोः |
| (३) दुरोणयुः | |

७. **क्रियापदानां परिचयः दत्त ।**

| | |
|---|---|
| (१) शंसिषम् | (४) विदाः |
| (२) दीदिहि | (५) रास्वा |
| (३) दयन्त | |

८. **सन्धिविच्छेदं कुरुत ।**

| | |
|---|---|
| (१) बृहद्भिरग्ने | (३) पाह्युत |
| (२) विवस्वदुषसश्चित्रम् | (४) यन्त्वग्नये |

९. **सन्धिमेलनं कुरुत ।**

| | |
|---|---|
| (१) नः + चित्र | (३) रायः + त्वम् + अग्ने |
| (२) त्वम् + इत् + सप्रथा | (४) मधोः + न |

**छात्र-प्रवृत्तिः**

- ब्राह्मणग्रन्थानाम् आरण्यकग्रन्थानां परिचयः कर्तव्यः ।
- वैदिकसंस्कृतलौकिकसंस्कृतयोः भेदः ज्ञातव्यः ।

**विशिष्टज्ञानम्**

- अङ्गुष्ठमात्रपुरुषः ज्योतिरूपेण अस्माकं हृदये स्थितः ।
- परमात्मा अस्माकं हृदये तेज रूपेण निवसति ।

●

# १६ अथर्ववेदीयरूद्राभिषेकमन्त्राः

**प्रस्तावना**

चतुर्वेदेषु ज्ञानविज्ञानरूपोऽयम् अथर्ववेदः विद्यते । एकस्मिन् श्लोके ऋषिःअथर्ववेदस्य यः ज्ञाता तस्य वा अथर्ववेदस्य महत्वं प्रतिपादयति-

यथा -

**यस्य राज्ञो जनपदे अथर्वा शांतिपारागः ।**
**निसत्यादि तद्राष्ट्रं वर्धते निरुपद्रवम् ॥**

(अ.सा.भा.भू.परि. ४/४/६)

यस्य राष्ट्रे वा राज्ये अथर्ववेदस्य ज्ञाता तस्य शक्तिविधानज्ञाता विद्वान् निवसति, सः विद्वान् तस्य राष्ट्रस्य वा राज्यस्य सर्वोपद्रवात् रक्षां करोति, वृद्धिं च करोति, इदं हि अथर्ववेदस्य महत्त्वमस्ति ।

रुद्रशब्दस्य का व्याख्या ? रुत् नाम दुःखं द्रावतीति ''रुद्रः'' अर्थात् दुःखस्य नाशं करोति सः रुद्रः वर्तते । वायुपुराणे एकस्मिन् श्लोके लिखितमस्ति, प्रतिदिनं यः रुद्राभिषेकं करोति सः सशरीरेण रुद्र एव जायते ।

यथा -

**यश्च रुद्रांजपेन्नित्यं ध्यायमानो महेश्वरम् ।**
**स तेनैव च देहेन रुद्रः संजायते ध्रुवम् ॥**

शिवपुराणे भगवतः रुद्रस्य महत्वं प्रतिपाद्य भिन्न-भिन्नद्रव्यद्वारा रुद्राभिषेकः कर्तव्यः । मानवानाम् ऐहिकाष्मुमिका इच्छापूर्त्यर्थम् अवश्यमेव रुद्राभिषेकः कर्तव्यः । अष्ट-अभिषेकद्रव्यस्य प्राधान्यं प्रतिपादितमस्ति ।

जलेन, ईक्षुरसेन, गोदुग्धेन, शर्करामिश्रितदुग्धेन, मधुना, घृतेन, सर्षपतैलेन, तीर्थजलेन, च रुद्राऽभिषेकः कार्यः, भिन्न-भिन्नकामनया भिन्न-भिन्नद्रव्येण रुद्राऽभिषेकः कर्तव्यः । जलेन प्रीतिः, ईक्षुरसेनलक्ष्मीः, गोदुग्धेनसंततिः, शर्करामिश्रितदुग्धेनतीव्रमेधा, मधुना पापनाशः, घृतेनारोग्यप्राप्तिः, सर्षपतैलेनशत्रुनाशः, तीर्थजलेनमोक्षस्य प्राप्तिर्भवति । अतः मानवैः मोक्षप्राप्त्यर्थं शिवस्य च कृपाप्राप्त्यर्थम् अवश्यमेव रुद्राभिषेकः कर्तव्यः ।

प्रस्तुतपाठे भिन्न-भिन्नकाण्डात् सूक्तात् अथर्ववेदीयरुद्राभिषेकमन्त्राः उद्धृताः सन्ति, सायणाचार्यस्य भाष्यसहिताःपदपाठयुक्ताः मन्त्राः सन्ति, अतः छात्रेभ्यः अथर्ववेदीयरुद्राभिषेकस्य ज्ञानम् अवश्यमेव भविष्यति । ऐहिकम् आमुष्मिकं च उभयकारकं फलं प्राप्तं भविष्यति ।



**ॐ सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।**

**अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥१॥**

(अ.वे.का. ३ सू. ३० मं. १)

**पदपाठः-** सऽहृदयम् । साम्ऽमनस्यम् । आविंऽद्वेषम् । कृणोमि । वः । अन्यः । अन्यम् । अभि । हर्यत । वत्सम् । जातम्ऽइव । अघ्न्या ।

**सरलार्थः-** हे रुद्र ! भवतः कृते विद्वेषभावस्य नाशं कृत्वा प्रीतियुक्तः तव पूजनादिसाम्मनस्य कर्म अहं करोमि। यथा गावः स्ववत्सं प्रति स्नेहं कुर्वन्ति, तथैव परस्परं वयं स्नेहयुक्ताः भवामः ।

**अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।**

**जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥**

(अ.वे.का. ३ सू. ३० मं. २)

**पदपाठः-** अनुव्रतः । पितुः । पुत्रः । मात्रा । भवतु । सम्ऽमनाः । जाया । पत्त्य । मधुऽमतीम् । वाचम् । वदतु । शान्तिऽवाम् ।

**सरलार्थः-** पुत्रः पितुः अनुगमनं करोतु । माताऽपि पुत्रानुकूला भवतु । पत्नीरपि पतिं प्रति मधुरयुक्ता वाणी तेनाऽस्माकं गृहस्य वातावरणं शुद्धं सात्विकं च भवतु । सपरिवारेण सह वयं उन्नतिं, रुद्रकृपां च प्राप्नुयामः ।

**ग्रैष्मावेनं मासौ दक्षिणाया दिशो गोपायता ।**

**यज्ञायज्ञियं च वामदेव्यं चानु तिष्ठतो य एवं वेद ॥**

**पदपाठः-** ग्रैष्मौ । एनम् । मासौ । दक्षिणायाः । दिशः । गोपायतः । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च। अनु । तिष्ठतः । यः । एवं । वेद ।

**सरलार्थः-** यज्ञायज्ञियभगवान् रुद्रः सर्वज्ञः अस्ति । स एव रुद्रः दक्षिणदिशः एवं ग्रीष्मऋतोः मासद्वयस्य रक्षां करोति, सर्वेषां यज्ञे नियुक्तानामपि रक्षां करोति, रुद्रेण सह वामदेवताः अनुकूलाः भवन्ति ।

**तस्मै प्रतीच्यां दिशः ।**

**वार्षिकौ मासौ गोप्तारावकुर्वन् वैरूपं च वैराज चानुष्ठातारौ ॥**

(अ.वे.का. १५ सू. ४ मं. ७-८)

**पदपाठः-** तस्मै । प्रतीच्याः । दिशः । वार्षिकौ । मासौ । गोप्तारौ । अकुर्वन् । वैरूपम् । च । वैराजम् । च । अनुऽस्थातारौ ॥

**सरलार्थः-** रुद्रेण पश्चिमदिशः एवं वर्षाऋतोः रक्षाकरणार्थं देवतायाः नियुक्तिः कृताऽस्ति । यज्ञानुष्ठानस्य अनुष्ठातृत्त्वेन वैरूपवैराजोः विशेषरूपेण नियुक्तिः कृताऽस्ति ।

**वार्षिकावेनं मासौ प्रतीच्यां दिशो गोपायतो वैरूपं च वैराजं चानु तिष्ठतो य एवं वेद ॥**

(अ.वे.का. १५ सू. ४ मं. ९)

**पदपाठः-** वार्षिकौ । एनम् । मासौ । प्रतिच्याः । दिशः । गोपायतः । वैरूपम् । च । वैराजम् । च । अनु। तिष्ठतः । यः । एवम् । वेद ।

**सरलार्थः-** यज्ञानुष्ठानकर्तारौ वैरूपवैराजौ उत्तरदायित्वं वर्तते यत् निर्विघ्नेन यज्ञसमाप्तिर्भवतु । यज्ञस्य रक्षां करोतु। विशेषरूपेणाज्ञा दत्ता वैराजं प्रति यत् यज्ञानुकूलवातावरणं वर्तनं विधिविधानं च करोतु ।

**तस्मा उदीच्या दिशः ॥ शारदौ मासौ ।**

**गोप्तारावकुर्वञ्छ्यैतं च नौधसं चानुष्ठातारौ ॥**

(अ.वे.का. १५ सू. ४ मं. १०-११)

**पदपाठः-** तस्मै । उदीच्याः । दिशः । शारदौ । मासौ । गोप्तारौ । अकुर्वन् । श्वैतम् । च । नौधसम् । च। अनुऽस्थातारौ ॥

**सरलार्थः-** यज्ञानुष्ठानस्य रक्षार्थं रुद्रेण उत्तरदिशः एवं शरद् ऋतोः मासद्वयं रक्षितं, वा रुद्रेण रक्षार्थं देवतायाः नियुक्तिः कृता । अस्य यज्ञस्यानुष्ठानरूपेण नौधसः एवं श्वेतस्य च (यज्ञानुष्ठातृरूपेण) नियुक्तिः कृता । तौ द्वौ नौधसश्वेतौ यज्ञानुष्ठातृरूपौ भवेताम् ।

**शारदावेनं मासावुदीच्या दिशो गोपायतः श्यैतं च ।**

**नौधसं चानु तिष्ठतो य एवं वेद ॥**

(अ.वे.का. १५ सू. ४ मं. १२)

**पदपाठः-** शारदौ । एनम् । मासौ । उदीच्याः । दिशः । गोपायतः । श्यैतम् । च । नौधसम् । च । अनु। तिष्ठतः । यः । एवम् । वेद ।

**सरलार्थः-** पुनः रुद्रेण सर्वज्ञेन उत्तरदिशः एवं शरद्ऋतोः मासद्वयं रक्षितं यज्ञस्य रक्षाकार्ये गोधसश्यैतौ नियुक्तौ, तौ द्वौ रुद्रस्य सहायकौ अनुकूलौ च भवेताम् ।

**तस्मै ध्रुवाया दिशः । हेमनौ मासौ गोप्तारावकुर्वन् ।**

**भूमिं चाग्निं चाननुष्ठातारौ ॥**

(अ.वे.का. १५ सू. ४ मं. १३-१४)

**पदपाठः-** तस्मै । ध्रुवायाः । दिशः । हेमनौ । मासौ । गोप्तारौ । अकुर्वन् । भूमिम् । च । अग्निम् । च। अनुष्ठातारौ ॥

**सरलार्थः-** रुद्रेण यज्ञानुष्ठानसिद्ध्यर्थं ध्रुवदिशः एवं हेमन्तऋतोः मासद्वयं रक्षितं, रक्षकरूपेण रुद्रदेवस्य नियुक्तिः जाता, अस्य यज्ञानुष्ठानसिद्ध्यर्थम् यज्ञानुष्ठातृरूपेण पृथ्विः एवं अग्नेः नियुक्तिः कृता । अग्निपृथ्व्यौ यज्ञानुकुले भवेताम् ।

**हेमनावेनं मासौ ध्रुवाया दिशो गोपायतो ।**

**भूमिंश्चाग्निश्चानु तिष्ठतो य एवं वेद ॥**

(अ.वे.का. १५ सू. ४ मं. १५)

**पदपाठः-** हेमनौ । एनम् । मासौ । ध्रुवयाः । दिशः । गोपायतः । भूमिः । च । अग्निः । च । अनु । तिष्ठतः । यः । एवं । वेद ॥

**सरलार्थः-** सर्वज्ञेन रुद्रेण यज्ञानुष्ठानसिद्ध्यर्थम् ध्रुवदिशः हेमन्तादिमासद्वयं रक्षितं, रक्षकरूपेण रुद्रः समागतः अस्य यज्ञानुष्ठानसिद्ध्यर्थं यज्ञानुंष्ठातृरूपौ अग्निपृथ्व्यौ तौ द्वौ सञ्जातौ । तौ द्वौ अग्निपृथ्व्यौ यज्ञानुकुलौ भवेताम्।

**तस्मा उर्ध्वाया दिशः ।**

**शैशिरौ मासौ गोप्तारावकुर्वन् दिवं चादित्यं चानुष्ठातारौ ॥**

(अ.वे.का. १५ सू. ४ मं. १६-१७)

**पदपाठः-** तस्मै । ऊर्ध्वायाः । दिशः । शैशिरौ । मासौ । गोप्तारौ । अकुर्वन् । दिवम् । च । आदित्यम् । च । अनुऽस्थातारौ ।

**सरलार्थः-** रुद्रदेवेन शिशिरऋतोः मासद्वयम् ऊर्ध्वदिग्चरक्षिता, अन्यदेवानामपि रक्षार्थं नियुक्तिः कृता, यज्ञानुष्ठातृरूपौ आकाशसूर्यौ प्रस्थापितौ । तौ द्वौ आकाशसूर्यौ यज्ञानुष्ठानानुकूलौ भवेताम् ।

**शैशिरावेनं मासं वूर्ध्वाया दिशो गोपायतो ।**

**द्यो श्चादित्यश्चानु तिष्ठतो य एवं वेद ॥**

(अ.वे.का. १५ सू. ४ मं. १८)

**पदपाठः-** शैशिरौ । एनम् । मासौ । ऊर्ध्वायाः । दिशः । गोपायतः । द्यौः । च । आदित्यः । च । अनु । तिष्ठतः । य । एवं । वेद ।

**सरलार्थः-** सर्वज्ञेन रुद्रेण शिशिरऋतोः मासद्वयं रक्षितं । यज्ञानुष्ठानरक्षकः स्वयं रुद्रोऽस्ति । अतः यज्ञः सुरक्षितः अस्ति । यज्ञानुष्ठातृरूपौ ''आदित्याकाशौ'' स्तः । तौ द्वौ ''आदित्याकाशौ'' यज्ञानुकूलौ भवेताम् ।

**तस्मै प्राच्या दिशो अन्तर्देशाद्**

**भवमिष्वासमनुष्ठातारमकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. १)

**पदपाठः-** तस्मै । प्राच्याः । दिशः । अन्तःऽदेशात् । भवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ।

**सरलार्थः-** रुद्रस्य द्वितीयनाम 'भवः' अर्थात् संसारस्योत्पत्तिकर्ताऽस्ति । हे रुद्र ! यज्ञपूर्त्यर्थं पूर्वदिशः एकस्मात् कोणात् बाणानुसन्धानकर्ता त्वं यज्ञानुष्ठानरूपेण नियुक्तः असि । कारणं हे रुद्र ! त्वं क्रतुफलविधानव्यसनयुक्तोऽसि। अत एव यज्ञानुष्ठातृरूपेण देवैः त्वं नियुक्तः ।

**भव एनमिष्वासः प्राच्या दिशो**

**अन्तर्देशादनुष्ठातानुतिष्ठति नैनं शर्वो न भवो नेशानः ।**

**नाश्य पशून् न समानान् हिंनस्ति य एवं वेद ॥**

(अ.वे.का. १५ सू. ५ मं. २-३)

**पदपाठः-** भवः । एनम् । ईषुऽआसः । प्राच्याः । दिशः । अन्तऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून । न । समानान् । हिनस्ति। यः । एवम् । वेद ।

**सरलार्थः-** हे भव एकस्मात् कोणात् बाणानुसन्धानेन सर्वेऽपि कोणाः सुरक्षिताः जाताः, अत एव तव नाम ''भवः'' संसारोत्पत्तिकर्ता, ''शर्वः'' ''शः'' अर्थात् विनाशकर्ता ''वः'' युष्माकम् अर्थात् दुःखविनाशकः रुद्रः, ''ईशानः'' अर्थात् ईशानकोणात् बाणानुसन्धानकर्ता त्वं शासकः असि । अतः त्वम् अस्मान् पशून् च मा हिंसिः । सर्वथा अस्मान् च पशून् रक्ष ।

**तस्मै दक्षिणाया दिशो**

**अन्तर्देशाच्छर्वमिष्वासमनुष्ठातारमकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. ४)

**पदपाठः-** तस्मै॑ । दक्षि॑णायाः । दि॒शः । अ॒न्तः॒ऽदे॒शात् । श॒र्वम् । इ॒षु॒ऽआसम् । अ॒नु॒ऽस्था॒तार॑म् । अ॒कु॒र्व॒न ।

**सरलार्थः-** हे रुद्र ! त्वयादक्षिणदिशः कोणात् अपि बाणानुसन्धानं कृतमस्ति, अतः देवैः ''शर्वः'' दुःखविनाशकः तव स्वरूपम् यज्ञानुष्ठातृरूपेण नियुक्तमस्ति । त्वं देवतानामपि दुःखविनाशको भव ।

**श॒र्वए॑नमिष्वा॒सो दक्षि॑णया दि॒शो अ॑न्त॒र्दे॒शादे॒नुष्ठा॒ता॒नु॑तिष्ठति॒**
**नैनं॑ श॒र्वो न भ॒वो नेशाननः ।**

**नास्य॑ प॒शून् न स॑मा॒नान् हिं॑नस्ति॒ य ए॒वं वेदे ॥**

(अ.वे.का. १५ सू. ५ मं. ६)

**पदपाठः-** श॒र्वः । ए॒न॒म् । इ॒षु॒ऽआ॒सः । दक्षि॑णायाः । दि॒शः । अ॒न्तः॒ऽदे॒शात् । अ॒नु॒ऽस्था॒ता । अनु॑ । ति॒ष्ठ॒ति॒। न ए॒न॒म् । श॒र्वः । न । भ॒वः । न । ईशानः । न । अ॒स्य॒ । प॒शुन् । न । स॒मा॒नान् । हि॒न॒स्ति॒। यः । ए॒वम् । वेद॑ ।

**सरलार्थः-** तव दुःखनाशकः ''शर्वः'' स्वरूपं ये जानन्ति, तेषां कृते त्वं दक्षिणकोणानुकूलो भवसि ।''शर्वः'' दुःखनाशको भूत्वा हे रुद्र ! त्वम् अस्मान् पशून् च मा हिंसिः । पुनः देवैः पशुपतिरूपेण यज्ञानुष्ठातृरूपेण तव नियुक्तिः कृता, कारणं त्वया पश्चिमदिशः बाणानुसन्धानम् आरब्धम् । अतः देवैः यज्ञानुष्ठातृरूपेण तव नियुक्तिः कृताऽस्ति ।

**तस्मै॑ प्र॒तीच्या॑ दि॒शो अ॑न्त॒र्दे॒शात्**

**प॑शु॒पति॑मिष्वा॒सम॑नुष्ठा॒तार॑मकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. ७)

**पदपाठः-** तस्मै॑ । प्र॒तीच्याः॑ । दि॒शः । अ॑न्तः॒ऽद॒शात् । प॒शु॒पति॑म् । इ॒षु॒ऽआ॒सम् । अ॒नु॒ऽस्था॒तार॑म् । अ॒कु॒र्व॒न् ।

**सरलार्थः-** तस्मै रुद्राय पशुपतये यज्ञानुष्ठातृरूपेण पशुपतिस्वरूपरुद्रस्य देवैः नियुक्तिः कृता, कारणम् अनेन पशुपत्या रुद्रेण पश्चिमदिशः कोणात् शरानुसन्धानं कृतमस्ति । अतः हे पशुपते ! त्वं पशोः मानवानाम् च रक्षां कुरु ।

**प॒शु॒पति॑रेनमिष्वा॒सः प्र॒तीच्या॑ दि॒शो**

**अ॑न्त॒र्दे॒शाद॑नुष्ठा॒ता॒नु॑तिष्ठति॒ नैनं॑ श॒र्वो न भ॒वो नेशा॑नः ॥**

**नास्य॑ प॒शुन् न स॑मा॒नान् हिं॑नस्ति॒ य ए॒वं वेद॑ ॥**

(अ.वे.का. १५ सू. ५ मं. ८-९)

**पदपाठः-** प॒शु॒ऽपतिः॑ । ए॒न॒म् । इ॒षु॒ऽआ॒सः । प्र॒तीच्याः॑ । दि॒शः । अ॒न्तः॒देशात् । अ॒नु॒ऽस्था॒ता । अनु॑ । ति॒ष्ठ॒ति॒। न । ए॒न॒म् । श॒र्वः । न । भ॒वः । न । ईशा॑नः । न । अ॒स्य॒ । प॒शून् । न । स॒मा॒नान् । हि॒न॒स्ति॒। यः । ए॒वम् । वेद॑ ।

**सरलार्थः-** भगवतः रुद्रस्य नामत्रयं ''शर्वः'', ''भवः'', ''ईशानः'' सार्थकं जातम्, एवं भवान् पशुपतिरूपेणाऽपि प्रसिद्धोऽस्ति । पश्चिमदिशः कोणतः पशुपतिरूपेण यज्ञानुकूलो त्वम् असि । अतः पशून् पुरुषान् अस्मान् च मा हिंसिः ।

**तस्मा॒ उदी॑च्या दि॒शो अ॑न्त॒र्दे॒शादु॒ग्रं**

**दे॒वमि॑ष्वा॒सम॑नुष्ठा॒तार॑मकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. १०)

**पदपाठः-** तस्मै । उदींच्याः । दिशः । अन्तःऽदेशात् । उग्रम् । देवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन्।

**सरलार्थः-** हे रुद्र ! उत्तरदिशः कोणतः बाणानुसन्धानानुकूल्यत्वात् उग्रदेवस्वरूपत्वं तव विग्रहः कल्याणकारकं भवतु, तादृशं तव उग्रस्वरूपं पशून् पुरुषान् च मा हिंस्यात् ।

**उग्र एनं देव इष्वास उदींच्या दिशो अन्तर्देशानुष्ठातानुतिष्ठति**
**नैनं शर्वो न भवो नेशानः ।**

**नास्य पशून् न समानान् हिंनस्ति य एवं वेद ॥**

(अ.वे.का. १५ सू. ५ मं. ११-१२)

**पदपाठः-** उग्रः । एनम् । देवः । इषुऽआसः । उदींच्याः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति। न एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान् ।

**सरलार्थः-** यद् रुद्रस्य उग्रस्वरूपम् अस्ति, तत् स्वरूपमपि उत्तरदिशः कोणात् देवतायाः कृते बाणप्रक्षेपार्थं प्रार्थितं, अतः देवैः तव उग्रदेवस्वरूपस्य यज्ञानुष्ठातृरूपेण नियुक्तिःकृता । यज्ञकर्मणि यज्ञानुष्ठातृरूपेण अस्य रुद्रस्य नियुक्तिः कृता ।

**तस्मै ध्रुवायां दिशो अन्तर्देशाद् ।**

**रुद्रमिष्वासमनुष्ठातारमकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. १३)

**पदपाठः-** तस्मै । ध्रुवायां । दिशः । अन्तःऽदेशात् । रुद्रम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ।

**सरलार्थः-** ध्रुवदिशः अन्तर्देशात् बाणप्रक्षेप-कर्तुः रुद्रस्य सर्वैः देवैः मिलित्त्वा यज्ञानुष्ठातृरूपेण नियुक्तिः कृता । यज्ञानुष्ठानस्योत्तरदायित्वं रुद्रेभ्यः प्रदत्तम् ।

**रुद्र एनमिष्वासो ध्रुवायां दिशोअन्तर्देशादनुष्ठातानुतिष्ठति नैनं**
**शर्वो न भवो नेशानः ।**

**नास्य पशून् न समानान् हिंनस्ति य एवं वेद ॥**

(अ.वे.का. १५ सू. ५ मं. १४-१५)

**पदपाठः-** रुद्रः । एनम् । इषुऽआसः । ध्रुवायाः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति न। एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान् । हिनस्ति । यः । एवम् । वेद ।

**सरलार्थः-** सर्वदिशः सर्वकोणतः बाणप्रक्षेपकर्ता रुद्रः अस्ति । अतः सर्वैः देवैः अस्य रुद्रस्य ईशानस्य च यज्ञानुष्ठातृरूपेण नियुक्तिः कृता वर्तते । हे रुद्र ! त्वं सर्वदिशः ज्ञाता सर्वकोणज्ञाता असि, सर्वेषां अनुकूलोऽसि । अनुकूलत्वात् कृपालुत्वात् हे रुद्र ! त्वं दयालुःभूत्वा युवापुरूषान् युवापशून् च मा हिंसिः । हिंसितो मा भूत् ।

**तस्मा उर्ध्वाया दिशो**

**अन्तर्देशान्महादेवमिष्वासमनुष्ठातारमकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. १६)

**पदपाठः-** तस्मै । उर्ध्वायाः । दिशः । अन्तऽदेशात् । महाऽदेवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ।

**सरलार्थः-** हे रुद्र ! त्वम् उर्ध्वदिशः कोणतः बाणप्रक्षेपकत्वात् देवैः सर्वैः महादेवरूपेण यज्ञानुष्ठातृरूपेण तव नियुक्तिः कृता । देवाधिदेवमहादेवः त्वम् असि तादृशी उपाधि देवैः प्रदत्ताऽस्ति ।

**महादेव एनमिष्वास उर्ध्वायां दिशो अन्तर्देशादनुष्ठातानु**
**तिष्ठति नैनं शर्वो न भवो नेशानः ।**

**नास्य पशून् समानान् हिंनस्ति य एवं वेद ॥**

(अ.वे.का. १५ सू. ५ मं. १७-१८)

**पदपाठः-** महाऽदेव । एनम् । इषुऽआसः । उर्ध्वायाः । दिशः । अन्तःऽदेशात् । अनुस्थाता । अनु । तिष्ठति। न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान् । हिनस्ति। यः । एवम् । वेद ।

**सरलार्थः-** रुद्र एव महादेवः अस्ति, सर्वे जनाः जानन्ति । कारणम् ऊर्ध्वकोणतः बाण-क्षेपकः त्वमेवासि, ऊर्ध्वकोणे ''अनुष्टुप्'' प्रशंसायुक्तवाणीरूपया त्वमेव निवससि, अतः हे रुद्र ! त्वं पुरुषान् पशून् च मा हिंसिः । हिंसां मा कुरु ।

**तस्मै सर्वेभ्यो अन्तर्देशेभ्य ईशानमिष्वासमनुष्ठातारमकुर्वन् ॥**

(अ.वे.का. १५ सू. ५ मं. १९)

**पदपाठः-** तस्मै । सर्वेभ्यः । अन्तःऽदेशेभ्यः । ईशानम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ।

**सरलार्थः-** रुद्रस्यैकनाम ''ईशानः'' अर्थात् शासकः सर्वलोकस्योऽपरि शासनकर्ता रुद्रः, सर्वासु दिक्षु बाणानुसन्धानं कृत्वा क्षेप्तुं समर्थः अस्ति । अत एव दैवैः सर्वैः मिलित्वा यज्ञानुष्ठातृरुपेण नियुक्तिः तव कृताऽस्ति ।

**ईशान एनमिष्वासः सर्वेभ्यो अन्तर्देशेभ्योऽनुष्ठातानुतिष्ठति**
**नैनं शर्वो न भवो नेशानः ।**

**नास्य पशून् न समानान् हिंनस्ति य एवं वेद ॥**

(अ.वे.का. १५ सू. ५ मं. २०-२१)

**पदपाठः-** ईशानः । एनम् । इषुऽआसः । सर्वेभ्यः । अन्तःऽदेशेभ्यः । अनुऽष्ठाना । अनु । तिष्ठति न । एनम्। शर्वः । न । भवः । न । ईशानः ॥ न । अस्य । पशून् । न । समानान् । हिनस्ति । यः। एवम् । वेद ।

**सरलार्थः-** सर्वदिशातः कोणतः बाणक्षेपकर्ता ईशानेभ्यः रुद्रेभ्यः देवैः यज्ञानुष्ठातृरूपोऽयम् इति प्रतिपादितम् अस्ति । ईशानः अस्माकम् उपरि तादृश्यः सर्वदिशतः अनूकुलो भवति यत् स एव पुरुषान् पशून् च न हिनस्ति । अतः ''भवः'' संसारोत्पत्तिकर्ता एव ''शर्वः'' सर्वदुखनाशकर्ता नाम सार्थकं कृतमस्ति ।

**सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने ।**

**येना संगच्छा उप मा स शिक्षाच्चारु वदानि पितरः संगतेषु ॥**

(अ.वे.का. ७ सू. १३ मं. १)

**पदपाठः-** सभा । च । सम्ऽइति । च । अवताम् । प्रजाऽपते । दुहितरौ । संविदाने । इति । सम्ऽविदाने। येन । सम्ऽगच्छै । उप । मा । सः । शिक्षात् । चारु । वदानि । पितरः । सम्ऽगतेषु ॥

**सरलार्थः-** प्रजापतिरुपरुद्रः राजा अस्ति, तस्य प्रजापतेः सभायां समित्यां ये जनाः सन्ति, ते सर्वे पुत्रवत् पोषिताः सन्ति । ते सर्वे जनाः राजानं प्रति (रुद्रप्रजापतिं प्रति) प्रणामं कुर्वन्ति । पूजयन्ति च, प्रजापतिरुद्रेण सह यस्य मेलनं भवति, तस्य उचितकल्याणं भवति, सन्मार्गे तस्य गमनं भवति । हे पितृगणाः मां सद्बुद्धियुक्तं कुर्वन्तु सभायाम् अहं विवेकपूर्वकं नम्रतायुक्तं वचनं वक्तुं समर्थो भवामि ।

**वि॒द्म तै सभे॒ नाम॑ न॒रिष्टा॒ नाम॒ वा अ॑सि ।**

**ये ते॒ के च॑ सभा॒सद॒स्ते मे॑ सन्तु॒ सवा॑चसः ॥**

(अ.वे.का. ७ सू. १३ मं. २)

**पदपाठः-** वि॒द्म । तै । स॒भे॒ । नाम॑ । न॒रिष्टा॑ । नाम॑ । वा । अ॒सि॒ । ये । ते॒ । के । च॒ । स॒भा॒ऽसद॑ः । ते । मे॒ । स॒न्तु॒ । सवा॑चसः ।

**सरलार्थः-** हे सभे ! वयं तव नाम जानीमः । तव नाम ''नरिष्ठा'' रूपेणप्रसिद्धमस्ति । तव ये सभासदः ते सर्वे अस्माभिः सह समतायुक्त-भाषणकर्तारः भवन्तु । वयमपि सभायां सभ्याः भवामः ।

**ए॒षाम॒ह स॒मासी॑नानां॒ वर्चो॑ वि॒ज्ञान॒मा द॑दे ।**

**अ॒स्याः स॑र्वस्याः सं॒सदो॒ मामि॑न्द्र भ॒गिनं कृणु ॥**

(अ.वे.का. ७ सू. १३ मं. ३)

**पदपाठः-** ए॒षाम् । अ॒हम् । स॒म्ऽआसी॑नानाम् । वर्चः॑ । वि॒ऽज्ञान॑म् । आ॒ । द॒दे॒ । अ॒स्याः । सर्व॑स्याः । स॒म्ऽसद॑ः । माम् । इ॒न्द्र॒ । भ॒गिन॑म् । कृ॒णु॒ ।

**सरलार्थः-** ये सभायां समुपविष्टाः तेषां सर्वेषां तेजः विशेषज्ञानं तत् सर्वं वयं ग्रहणं कुर्मः । इन्द्रदेवः स्वर्गादि राज्यशासकः यज्ञानुष्ठाने सहभागिनं त्वां कुर्याद्, सः इन्द्रदेवशासनसम्बन्धितज्ञानम् अस्मभ्यं यच्छेत् ।

**यद् वो॒ मनः॒ परा॑गतं॒ यद ब॒द्धमि॒ह वेह वा॑ ।**

**तद् व॒ आ व॑र्तयामसि॒ मयि॑ वो रमतां॒ मन॑ः ॥**

(अ.वे.का. ७ सू. १३ मं. ४)

**पदपाठः-** यद् । व॑ः । मन॑ः । परा॑ऽगतम् । यत् । ब॒द्धम् । इ॒ह । वा॒ । इ॒ह । वा॒ । तत् । व॒ः । आ। व॒र्त॒या॒म॒सि॒ । मयि॑ । व॒ः । र॒म॒ता॒म् । मन॑ः ।

**सरलार्थः-** हे सभासद्गणाः । युष्माकं मनः रुद्रात् च्युतं भूत्वा अन्यत्र भिन्न-भिन्नविषयेषु विभक्तं जातमस्ति । तस्मात् कारणात् भवतां मनः रुद्रं प्रति पुनः आकर्षितं क्रियते । सर्वेऽपि सभासदः अस्माकम् इमाम् वार्तां श्रृण्वन्तु, तस्योपरि विचारादिकं कुर्वन्तु ।

**शि॒वा न॒ः शंत॑मा भव सुमृडी॒का स॑रस्वति ।**

**मा ते॑ युयोम सं॒दृशः॑ ॥**

(अ.वे.का. ७ सू. ७१ मं. ३)

**पदपाठः-** शि॒वा । न॒ः । शम्ऽतेमा । भ॒व॒ । सु॒ऽमृडी॒का । स॒र॒स्व॒ति॒ । मा । ते॒ । यु॒यो॒म॒ । स॒म्ऽदृश॑ः ।

**सरलार्थः-** हे वाण्याधिष्ठातृदेवीसरस्वति । वयं भवत्याः दर्शनेन कदापि वञ्चिताः न भवामः । भवती अस्मभ्यं सुन्दरसुखदात्री भवतु । भवती अस्माकं रोगाणां दोषाणां पापानां च शमनकर्त्री भवतु । वेदादिज्ञानोपासनायां भवती अस्मभ्यं बुद्धिदात्रीभवतु ।

**स्तुता मया॑ व॒र॒दा वे॑दमा॒ता प्र चो॑दयन्तां पावमा॒नी द्विजाना॑म् ।**

**आ॒युः प्रा॒णं प्र॒जां प॒शूं की॒र्तिं द्रवि॑णं ब्रह्मवर्च॒सम् । मह्यं॑ द॒त्त्वा व्र॑जत ब्रह्मलो॒कम् ॥**

(अ.वे.का. ७ सू. ७१ मं. १)

**पदपाठः-** स्तुता । मया । वरदा । वेदऽमाता । प्र । चोदयन्ताम् । पावमानी । द्विजानाम् । आयुः । प्राणम्। प्रजाम् । पशुम् । कीर्तिम् । द्रविणम् । ब्रह्मऽवर्चसम् । मह्यम् । दत्त्वा । व्रजत । ब्रह्मलोकम् ।

**सरलार्थः-** मन्त्रेऽस्मिन् गायत्र्याः जगज्जनन्याः देव्याः वर्णनमस्ति, ऋषिः कथयति मया प्रतिदिनं ''वेदमाता'' वेदानां मातरं मन्यते सा वेदमातृगायत्रीदेव्याः स्तवनं क्रियते । सा कीदृशी अस्ति, तर्हि वरदा वरं ददाति इति वरदा अर्थात् यत्-यत् वृणीते तत्-तत् ददातीति वरदा साधकानां मनोकामनापूर्त्यर्थं वरं ददातीति सा वरदाऽस्ति। पावनी द्विजानां ब्राह्मणानां पावनकर्त्री सा कल्पवृक्षोऽस्ति, कल्पवृक्षवत् सा किं किं यच्छति, तर्हि ''आयुः'' दीर्घायुष्यम् ''प्राणम्'' प्रणविद्या ''प्रजाम्'' उत्तमपुत्रपौत्रादि, ''पशुम्'' गौरश्वादिपशुपालनं, ''कीर्तिं'' पुण्यरूपं यशः, ''द्रविणं'' धनोपार्जनविद्या, ''ब्रह्मवर्चसम्'' ब्रह्मतेजः वा ब्रह्मज्ञानम् मह्यं दत्त्वा व्रजतः ब्रह्मलोकम्।

## शब्दार्थः

**अध्न्या** - हननायोग्या गौ, **जाया** - पत्नी, **दिशा** - आशा, **गोपायतः** - रक्षितः, **ध्रुवायाः** - ध्रुवदिशः, **भवम्** - रुद्रम्, **शर्वः** - विनाशकः दुखनाशकः रुद्रः, **ईशानः** - शासनकर्तारुद्रः, **पशुपतिः** - प्राणिनां पतिः, **इषुः** - बाणः, **प्रजापति** - प्रजानां पतिः भगवान् शिवः, रुद्रवा, **इन्द्रः** - स्वर्गशासकः देवः, **वेदमाता** - गायत्री, **द्रविणम्** - धनम्, **प्राची** - पूर्वा, **अनुष्ठाता** - सेवकः, **प्रतीची** - पश्चिमा, **व्रात्य** - व्रती, **उदीची** - उत्तरा, **गोप्ता** - संरक्षकः, **समानान्** - भ्रात्तादीन् समानान्, **शरः**- बाणम्, **हिनस्ति** - मारयति, **समानान्** - भातृन् मित्राणि च, **पशुपतिः** - जीवानां भर्ता शिवः ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) वयं परस्परं ........................ भवामः । (स्नेहयुक्ताः, करुणायुक्ताः, सत्ययुक्ताः)

(२) पुत्रेण ........................ अनुगमनं करणीयम् । (भ्रातुः, पितुः, मातुः)

(३) यज्ञानुकूलवातावरणं वर्तनं ........................ करोति । (भूराजः, गौराजः, वैराजः)

(४) यज्ञानुष्ठानस्य रक्षकः ........................ अस्ति । (विष्णुः, रुद्रः, ब्रह्मा)

(५) वेदस्य माता ........................ अस्ति । (सावित्री, गायत्री, सरस्वती)

**२. निम्नाङ्कितानां प्रश्नानाम् एकैकवाक्येनोत्तराणि लिखत ।**

(१) ''भवः'' शब्दस्य कोऽर्थः ?

(२) ''शर्वः'' शब्दस्य कोऽर्थः ?

(३) रुद्रेण बाणानुसंधानं कस्मात् कोणात् कृतमस्ति ?

(४) रुद्रस्य पशुपतिस्वरुपं कस्य रक्षणं करोति ?

(५) देवैः रुद्रस्य उग्रस्वरूपं कुत्र नियुक्तम् ?

**३. (अ) निम्नाङ्कितमन्त्राणां भावार्थं लिखत ।**

(१) तस्मै उर्ध्वाया दिशः ।
शैशिरौ मासौ गोप्तारावकुर्वन् दिवं चादित्यं चानुष्ठातारौ ॥

(२) तस्मै प्राच्या दिशो अन्तर्देशाद् भवमिष्वासमनुष्ठात्तारमकुर्वन् ॥

(३) स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम् ।
आयुः प्राणं प्रजां पशूं कीर्तिं द्रविणं ब्रह्मवर्चसम् । मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ॥

३. **(ब) मन्त्रपूर्तिः विधेया ।**

(१) सहृदयं ................................ इवाधन्या ॥

(२) ग्रैष्मावनं ................................ एवं वेद ॥

(३) तस्मा उदिच्या ................................ चानुष्ठातारौ ॥

४. **टिप्पणी लेख्या ।**

(१) रक्षकरुद्रस्य वर्णनम् ।

(२) सभायां सभ्यानाम् स्वरूपवर्णनम् ।

५. **शब्दानां विभक्तिपरिचयं यच्छत ।**

(१) पितुः

(२) वाचं

(३) दिशः

(४) यज्ञाय

(५) अनुष्ठातारौ

६. **क्रियापदानां परिचयं लिखत ।**

(१) वदतु

(२) अकुर्वन्

(३) तिष्ठति

(४) वदानि

(५) व्रजत

७. **(अ) सन्धिविच्छेदं कुरुत ।**

(१) अन्यमभि

(२) जातमिव

(३) चानु

(४) अन्तर्देशात्

(५) भूमिश्चाग्निश्चानु

७. **(ब) सन्धिमेलनं कुरुत ।**

(१) भवम् + इक्ष्वासम्

(२) न + एनम्

(३) ईशान + इषुऽआसम्

(४) न + अस्य

(५) अन्तर्देशात् + अनुष्ठाता + अनु

**छात्र-प्रवृत्तिः**

- गुर्जरप्रदेशस्थानां अथर्ववेदपण्डितानां सूचीः सज्जीकुर्वन्तु ।

**विशिष्टज्ञानम्**

- श्रिया देयम् ह्रिया देयम् । (तै. १/११/३)
  सर्वप्रकारकं धनं लक्ष्मीं च देहि ।

●

# १७ अष्टविकृतयः

**प्रस्तावना**

वेदानां ज्ञानं वयं पवित्रतमं स्वीकुर्मः । वेदाः परमात्मनः नारायणस्वरूपाः सन्ति । तेषां ज्ञानं परमात्मसम्बन्धितज्ञानम् अस्माभिः स्वीक्रियते । वेदमन्त्राणां संरक्षणार्थं भारतीयऋषयः असाधरणाऽद्वितीयाः कृतयत्नाः आसन् । मूलवैदिकमन्त्राः वंशपरम्परायां वा गुरुशिष्यपदम्परायां केवलं श्रृत्वा ते ऋषयः कण्ठस्थम् अकुर्वन्, स्मृतिपथे अस्थापयन् अत एव आदिकालादारभ्य अद्यावधि यथावत् यथास्वरूपं वेदमन्त्राणां श्रवणं, ग्रन्थस्थं दर्शनम् अस्माभिः कर्तुं शक्यते कारणं ऋषिभिः ते मन्त्राः यथास्वरूपाः दृष्टाः तथैव ते मन्त्राः रक्षिताः, यथा स्वरूपं मनसि प्रस्थापिताः सन्ति । तेषु मन्त्रेषु प्रतिपादितशब्दानां परिवर्तनम् वा शुद्धिकरणस्यावकाशः एव न अस्ति न केवलमिदं तेषां मन्त्राणाम् एकशब्दस्य एकमक्षराणाम् उदात्तादि स्वरेष्वपि न कुत्रापि परिवर्तनं वा न विकृतं कर्तुं शक्यते । शताब्द्ध्यावधिब्राह्मणैः अक्षुण्णवेदमन्त्रं स्मृतिबद्धम् कण्ठस्थं कृत्वा वेदसंहितारक्षणार्थम् अनुपमपुरुषार्थः कृतोऽस्ति । ब्राह्मणनां वेदमन्त्ररक्षणार्थं हृदय-भावुकाः भवामः ।

इमे वेदाः तेषां मूलस्वरूपे रक्षणार्थं ऋषिभिः ये उपायाः प्रदर्शिताः वा ये विधयः प्रदर्शिताः, ते उपायाः वा ते सर्वे विधयः अधोप्रदर्शिताः सन्ति । चतुर्वेदाः सस्वरकण्ठस्थाः करणीयाः एवं कारयितव्याः । **''ब्राह्मणेन निष्कारणेन षडङ्गोवेदोध्येयो ज्ञेयश्च''** अर्थात् ब्राह्मणैः वेदसंहिताः अध्येतव्याः ज्ञातव्याश्च सार्थाः वेदाः पठनीयाः पाठनीयाश्च। आदिकालात् वंशपरम्परायाम् वा गुरुशिष्यपरम्परायाम् वेदसंहितापठनपाठनप्रवृतिः प्रचलति, अधुनाऽपि सा परम्पराजीविताऽस्ति। अत एव विभिन्नवेदानां विभिन्नानां शाखानां प्राप्तिः अस्माभिः कर्तुं शक्यते, अक्षुण्णावेदमन्त्राः रक्षिताः सन्ति ।

व्याकरणमहाभाष्ये ऋग्वेदस्य एकविंशतिशाखाः आसन् । यजुर्वेदस्य शतशाखाः आसन्, सामवेदस्य सहस्त्रशाखाः आसन्, अथर्ववेदस्य नवशाखाः आसन्, तादृशं प्रतिपादितमस्ति, अन्यच्च चरणव्यूहानुसारे सूत्रसमयपरिशिष्टग्रन्थे (१) शाकलः (२) बाष्कलः (३) आश्वलायनः (४) शांखायनः (५) माण्डूकेयः तादृश्यः ऋग्वेदस्य पंचशाखाः गण्यन्ते । तासु केवलशाकलऋषेः शाखायां सुरक्षिताऋग्वेदसंहितोद्योपलब्धाऽस्ति । वेदानां संहितापाठमूलमन्त्राणां प्राकृतिकरूपेण प्रामाणिकतया रक्षार्थं ऋषिभिः भिन्नाः भिन्नाः अष्टविकृतयः क्रालक्रमे विकासिताः । ताः यथा

**जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।**

**अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥**

सर्वप्रथमं शाकल्यऋषिणा पदपाठः सज्जीकृतः, संहितायाः सन्धिविच्छेदं कृत्वा परस्परप्रत्येकपदं विभाजितं । वेदसंहितासस्वरकण्ठस्थं कृत्वा ब्राह्मणाः प्रत्येकवेदमन्त्राणां पदपाठमपिकण्ठस्थं कुर्वन्ति । तेन सन्धिजन्य ध्वनिविकासमुक्तपद स्वतन्त्ररूपेण ज्ञातुं शक्यते । तस्य पदस्य परिचयोऽपि शक्यते । अनेन प्रकारेण वेदमन्त्राणां रक्षार्थम् अष्टविकृतीनां विकासो जातः ।

प्रस्तुतपाठे अष्टविकृतीनामुल्लेखपुरस्सरं प्रत्येकविकृतीनाम् एकमेकम् लक्षणम् उदाहरणं प्रदत्तमस्ति । पाठाधारेण छात्राः अवगच्छेयुः यत् वेदमन्त्राणाम् अक्षुण्णरक्षार्थम् अष्टविकृतीनां प्रयोगो भवति । प्रत्येकविकृतीनां लक्षणोदाहरणैः अन्येषां मन्त्राणामपि छात्राः स्वतन्त्ररूपेण विकृतिपाठकर्तुं समर्थाः भवेयुः । उक्तञ्च - वराहपुराणे यथा -

**संहितापाठतः पुण्यं द्विगुणं पदपाठतः ।**

**त्रिगुणं क्रमपाठेन जटापाठेन षड्गुणम् ॥**

**जटादिविकृतीनां ये पारायणपरायणाः ॥**

**महात्मानो द्विजश्रेष्ठास्ते ज्ञेया पङ्क्तिपावनाः ॥**

जटापाठलक्षणम् -

**द्विपदादिक्रमाः पञ्च प्रक्रमाद्युत्क्रमात्ततः ।**

**पुन्नः क्रमादुह्यदिता जटात्वं प्रापिता बुधैः ॥**

**सरलार्थः-** जटाविकृतिपाठे पदद्वयस्यानुक्रमः, व्युत्क्रमः, तथा संक्रमः अनेनप्रकारेण वारत्रयं सन्धिपूर्वकम् अवसानरहितं पठ्यते । जटापाठः पञ्चसन्धिपूर्वकमपि भवति । अस्मिन् अनुक्रमः, उत्क्रमः, व्युत्क्रमः, अभिक्रमः, तथा संक्रमः ये पञ्चक्रमाः भवन्ति । पदानि संख्यया सह संयोज्यापि पाठो भवति ।

जटापाठस्योदाहरणम् -

**त्र्यम्बकँय्यजामहेयजामहेत्र्यम्बकंत्र्यम्बकँय्यजामहे । त्र्यम्बकमिति त्रिऽअम्बकम् । यजामहेसुगन्धिꣳसुगन्धिंयजा महेयजामहेसुगन्धिम् । सुगन्धिम्पुष्टिवर्द्धनम्पुष्टिवर्द्धनꣳ सुगन्धिꣳसुगन्धिम्पुष्टिवर्द्धनम्। सुगन्धिमिति सुऽगन्धिम् । पुष्टि वर्द्धनमिति पुष्टिऽव्वर्द्धनम्॥ उर्व्वारुकमिवबन्धनाद्द्बन्धना दुर्व्वारुकमिवोर्व्वारुकमिवबन्धनात् । उर्व्वारुकमिवेत्त्युर्व्वारुकम्ऽइवं। बन्धनान्मृत्त्योर्म्मृत्त्योर्व्वन्धनादन्धनान्मृत्त्योः । मृत्त्योर्म्मुक्षीयमुक्षीयमृत्त्योर्म्मृत्त्योमुक्षीय । मुक्षीयमा मामामुक्षीयमुक्षीयमा। मामृतांदमृतान्मामामृतांत् ।अमृतादित्त्यमृतांत् ॥ पतिवेदंनमितऽइतःपतिवेदंनम्पतिवे दंनमितः। पतिवेदंनमितिंपतिऽव्वेदंनम्। इतोमुक्षीयमु क्षीयेतऽइतोमुक्षीय । मुक्षीयमामामुक्षीयमुक्षीयमा । मामुतोमुतोमामामुतंः । अमुतऽइत्त्युमुतंः ॥१॥**

**पुनंस्त्वात्त्वापुनः पुनंस्त्वा । पुनरितिपुनंः । त्वादित्त्याऽ आंदित्त्यास्त्वात्त्वांदित्त्याः । आदित्त्यारुद्राऽआंदि त्त्याऽआंदित्त्यारुद्राः॥ रुद्राव्वसंवोव्वसंवोरुद्रारुद्राव्वसंवः। व्वसंवःसꣳसंव्वसंवोव्वसंवःसम् । समिंन्धतामिन्धताꣳसꣳ समिंन्धताम् । इन्धताम्पुनःपुनंरिन्धतामिन्धताम्पुनंः । पुनंर्ब्ब्रह्माणोंव्व्रह्माणःपुनःपुनंर्व्व्रह्माणं ः। ब्रह्माणोंव्वसुनीथव्व सुनीथव्व्रह्माणोंव्व्रह्माणोंव्वसुनीथ ।व्वसुनीथयज्ज्ञैर्य्यज्ज्ञैर्व्वसुनी थव्वसुनीथ यज्ज्ञैः । व्वसुनीथेतिंवसुऽनीथ । यज्ज्ञैरितिंयज्ज्ञैः॥ घृतेनत्त्वंत्वङ्घृतेनंघृतेनत्त्वम् । त्वन्तन्तन्वन्त्तन्वम्। तन्वंव्वर्द्धयस्वव्वर्द्धयस्वतन्वन्तन्वंव्वर्द्धयस्व । व्वर्द्धयस्वसत्त्याः सत्त्याव्वंर्द्धयस्वव्वर्द्धयस्वसत्त्याः । सत्त्यासंन्तुसन्तुसत्त्याः सत्त्याःसंन्तु । सन्तुयजंमानस्ययजंमानस्यसन्तुसन्तुयजंमानस्य । यजंमानस्यकामाःकामायजंमानस्ययजंमानस्यकामांः । कामाऽइतिकामांः ॥ २॥**

**सनोंनःससनंः । नःपितेवंपितेवंनोनःपितेवं। पितेवंसूनवेंसूनवेंपितेवंपितेवंसूनवें । पितेवेतिंपिताऽइंव । सूनवेग्ग्रेंसूनवेंसूनवेग्ग्रें । अग्ग्रेंसूपायनः सूंपायनोग्ग्रेग्ग्रेंसूपायनः । सूपायनोभंवभवसूपायनःसूंपायनोभंव । सूपायनइतिंसूऽउपायनः । भवेतिंभव । सचंस्वा नोनःसचंस्वासचंस्वानः । नःस्वस्त्तयेंस्वस्त्तयेंनोनःस्वस्त्तयें । स्वस्त्तयऽइतिंस्वस्त्तयें ॥**

मालापाठलक्षणम् -

**ब्रूयात्क्रमविपर्यासानर्धर्चस्यादितोऽन्ततः ।**

**अन्तश्चादि नये देवं क्रममालेति गीयते ॥१॥**

**मालामालेव-पुष्पाणां पदानां ग्रथिनी हि सा ।**

**आवर्तते त्रयस्तस्यां क्रमव्युत्त्क्रमसंक्रमाः ॥**

**सरलार्थः-** मालापाठस्य भेदद्वयमस्ति क्रममाला एवं पुष्पमाला अधिकप्रचलितपुष्पमालापाठे जटासदृशक्रमत्रयं पठ्यते। परं प्रत्येकस्मिन् स्वरमध्ये विरामो भवति ।

**मालापाठस्योदाहरणम् - क्रममालापाठ :-**

**ॐ ॥ य॒ज्ञेन॑य॒ज्ञम् । आ॒स॒न्नित्या॑ सन् । य॒ज्ञम॑यजन्त । आ॒स॒न्प्र॒थ॒मानि॑ । अ॒य॒ज॒न्त॒दे॒वाः । प्र॒थ॒मानि॒धर्म्मा॑णि। दे॒वास्ता॒नि॑ । धर्म्मा॑णि॒तानि॑ । तानि॒ धर्म्मा॑णि । तानि॑दे॒वाः। धर्म्मा॑णि॒प्प्र॒थ॒मानि॑ । दे॒वाऽअ॑य जन्त । प्र॒थ॒मान्या॑सन् । अ॒य॒ज॒न्त॒य॒ज्ञम् । आ॒स॒न्नि॒त्त्या॑सन् । य॒ज्ञँय॒ज्ञेन॑ ॥ तेह॑ । दे॒वाऽइति॑दे॒वाः । ह॒नाक॑म् । दे॒वाः सन्ति । नाक॑म्महि॒मानः॑। सन्ति॑सा॒द्धयाः । म॒हि॒मानः॑ सचन्त । सा॒द्धयाःपूर्व्वे । स॒च॒न्त॒यत्रे॑ । पूर्व्वे॒य त्रं॑ । यत्र॒पूर्व्वे॑ । यत्रं॑सचन्त । पूर्व्वे॑सा॒द्धयाः। स॒च॒न्त॒म॒हि॒मानः॑ । सा॒द्धयाः सन्ति । म॒हि॒मानो॒नाक॑म् । सन्ति॒दे॒वाः । नाक॑ꣳह । दे॒वाऽइति॑दे॒वाः । ह॒ते ॥१॥**

**पुष्पमालालक्षणम् -**

माला मालेव पुष्पाणां पदानां ग्रंन्थिनी हि सा । आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः॥

**सरलार्थः-** अथा पुष्पमालाः पुष्पना ग्रंन्थिनी भवति तथेव पदानां आवर्तन्ते कर्तव्यं त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः । जटातः पुष्पमाला भवति । तत्र प्रतिपदं विरामः इतिकारश्चेति विशेषः । केचिच्च पुष्पमालायामितिकांर पदसन्धिस्थानेऽपि वदन्ति ।

॥ अथपुष्पमालाविकृतिः ॥

**प॒रीत्त्यभू॒तानि॑ । भू॒तानि॑ प॒रीत्त्य । प॒रीत्त्य॑भू॒तानि॑ । प॒रीत्त्येति॑परी॒ऽइत्त्य॑ । भू॒तानि॑ प॒रीत्त्य॑। प॒रीत्त्य॑भू॒तानि॑ । भू॒तानि॑प॒रीत्त्य॑ । प॒रीत्त्य॑लो॒कान् । लो॒कान्प॒रीत्त्य॑ । प॒रीत्त्य॑लो॒कान् । प॒रीत्त्येति॑परी॒ऽइत्त्य॑। लो॒कान्प॒रीत्त्य॑। प॒रीत्त्य॑लो॒कान् । लो॒कान्प॒रीत्त्य॑ । प॒रीत्त्य॒ सर्व्वाः॑। सर्व्वाः॒प॒रीत्त्य॑ । प॒रीत्त्य॒सर्व्वाः॑ । प॒रीत्त्येति॑परी॒ऽइत्त्य॑ । सर्व्वाः॑प्प्र॒दिशः॑। प्र॒दि॒श॒सर्व्वाः॑ । सर्व्वाः॒प्प्र॒दिशः॑ । प्र॒दिशो॒दिशः॑ । दिशः॒प्प्र॒दिशः॑ । प्र॒दिशो॒दिशः॑ । प्र॒दि॒शऽइति॒प्प्र॒दिशः॑। दिश॑श्च । च॒दिशः॒दिश॑श्च । चेति॑च ॥ उ॒प॒स्त्था॒य॑प्प्र॒थ॒म॒जाम् । प्र॒थ॒म॒जामु॑प॒स्त्थाय॑ । उ॒प॒स्त्थाय॑ प्प्र॒थ॒म॒जाम् । उ॒प॒स्त्थायेत्त्यु॑प॒ऽस्थाय॑ । प्र॒थ॒म॒जामृ॒तस्य॑ । ऋ॒तस्य॑प्प्र॒थ॒म॒जाम् । प्र॒थ॒म॒जामृ॒तस्य॑ । प्र॒थ॒म॒जामिति॑प्प्र॒थ॒म॒ऽजाम् । ऋ॒तस्या॒त्त्मना॑ । आ॒त्त्मन॑ऽऋ॒तस्य॑ । ऋ॒तस्या॒त्त्मना॑ । आ॒त्त्मना॒त्त्मान॑म्। आ॒त्त्मान॑मा॒त्त्मना॑ । आ॒त्त्मना॒त्त्मान॑म् । आ॒त्त्मान॑म॒भि। अ॒भ्य्या॒त्त्मान॑म् । आ॒त्त्मान॑म॒भि । अ॒भिसम् । सम॒भि। अ॒भिसम् । संव्वि॑ वेश । व्वि॒वे॒श॒सम्। संव्वि॑वेश । व्वि॒वे॒शेति॑व्विवेश ॥१॥**

**प॒रि॒द्यावा॑पृथि॒वी । द्यावा॑पृथि॒वीपरि॑ । प॒रि॒द्यावा॑पृथि॒वी । द्यावा॑पृथि॒वीस॒द्यः । स॒द्योद्यावा॑पृथि॒वी । द्यावा॑पृथि॒वीस॒द्यः। द्यावा॑पृथि॒वीऽइति॒द्यावा॑पृथि॒वी । स॒द्यऽइ॒त्त्वा । इ॒त्त्वास॒द्यः । स॒द्यऽइ॒त्त्वा । इ॒त्त्वापरि॑ । परी॒त्त्वा । इ॒त्त्वापरि॑ । परि॑लो॒कान्। लो॒कान्परि॑। परि॑लो॒कान् । लो॒कान्परि॑ । परि॑लो॒कान् । लो॒कान्परि॑ । प॒रि॒दिशः॑ । दिशः॒परि॑ । प॒रि॒दिशः॑।**

दिशः॒परि॑। परि॑दिशः॑ । दिशः॒परि॑ । परि॒स्व॑ः । स्व॒ःपरि॑ । परि॒स्व॑ः । स्व॒रि॒ति॒स्व॑ः ॥ ऋ॒तस्य॒तन्तु॑म्। तन्तु॑मृ॒तस्य॑ । ऋ॒तस्य॒तन्तु॑म्। तन्तु॒व्वित॑तम् । वित॑त॒न्तन्तु॑म् । तन्तु॒व्वित॑तम्। वित॑तंव्वि॒चृत्य॑ । वि॒चृत्य॒वित॑तम्। वित॑तंव्वि॒चृत्य॑ । वित॑त मिति॒वीऽत॑तम्। वि॒चृत्य॒तत्। तद्वि॒चृत्य॑ । वि॒चृत्य॒तत् । वि॒चृत्येति॑वी॒ऽचृत्य॑ । तद॑पश्श्यत्। अ॒पश्श्य॒त्तत् । तद॑पश्श्यत्। अ॒प॒श्श्य॒त्तत्। तद॑पश्श्यत् । अ॒प॒श्श्य॒त्तत् । तद॑ भवत् । अ॒भ॒व॒त्तत् । तद॑भवत् । अ॒भ॒व॒त्तत्। तद॑भवत् । अ॒भ॒व॒त्तत् । तदा॑सीत् । आ॒सी॒त्तत् । तदा॑सीत् । आ॒सी॒दित्त्या॑सीत् ॥२॥ इति पुष्पमालाविकृतिः ॥

शिखापाठलक्षणम् -

पदोत्तरां शिखामेव जटायामः प्रचक्षते ।

आर्याः पदोत्तरसंक्रमा जटां शिखां प्रवदन्ति ॥ यथा ॥

सरलार्थः- जटापाठस्य त्रिविधक्रमानन्तरम् एकम् अग्रिमपदग्रहणं क्रियते, तदा शिखापाठो भवति ।

शिखापाठस्योदाहरणम् -

श्रीश्श्च॑च॒श्श्रीः॒श्रीश्च॑ते । च॒ते॒ते॒च॒च॒ते॒लक्ष्मीः॒ । ते॒लक्ष्मील्ल॒क्ष्मीस्त्ते॑ते॒लक्ष्मीश्श्च॑ । ल॒क्ष्मीश्च॑चल॒क्ष्मील्ल॒क्ष्मीश्च॒पत्क्न्यौ । च॒पत्क्न्यौ॒पत्क्न्यौ॑चच॒पत्क्न्या॑वहो॒रा॒त्रे । पत्क्न्या॑वहो॒रा॒त्रेऽअ॑होरा॒त्रेपत्क्न्यौ॒ पत्क्न्या॑वहोरा॒त्रेपा॒र्श्वे । अ॒हो॒रा॒त्रेपा॒र्श्वेऽअ॑होरा॒त्रेऽपा॒र्श्वेन क्क्ष॑त्राणि। अ॒हो॒रा॒त्रेऽइत्त्य॑होरा॒त्रे । पा॒र्श्वेनक्क्ष॑त्रा॒णि॒नक्क्ष॑ त्रा॒णिपा॒र्श्वेपा॒र्श्वेनक्ष॑त्राणिरू॒पम् । पा॒र्श्वेऽइति॑पा॒र्श्वे। नक्क्ष॑ त्राणिरू॒पः॒रू॒प॒न्नक्क्ष॑त्रा॒णि॒नक्क्ष॑त्राणिरू॒प॒म॒श्विनौ॑ । रू॒प॒म॒श्विना॑व॒श्विनौ॑रू॒पः॒ रू॒प॒म॒श्विनौ॒घ्यात्त॑म् । अ॒श्विनौ॒घ्यात्तं॑ व्यात्त॑म॒श्विना॒नव॒श्विनौ॒व्यात्त॑म् । व्यात्त॒मिति॑वी॒ऽआत्त॑म्॥ इ॒ष्ण॒न्नि॑षाणे॒षाणे॒ष्ण॒न्नि॒ष्ण॒न्नि॑षाणा॒मु॒म् । इ॒षा॒णा॒मु॒म॒मु मि॑षाणे॒षाणा॒मु॒म्मे॑। अ॒मु॒म्मे॑मे॒मु॒म॒मु॒म्म॑ऽइषाण । म॒ऽइ॒षा॒णे॒ पा॒णा॒मे॒म॒ऽइ॒पा॒ण॒स॒र्व्व॒लो॒क॒म् । इ॒पा॒ण॒स॒र्व्व॒लो॒कः॒सं॑र्व्वलो॒कमि॑षाण॑षाण । स॒र्व्व॒लो॒कम्मे॑सर्व्वलो॒कः॒ सं॑र्व्वलोकम्म॑ऽइषाण । स॒र्व्व॒लो॒कमिति॑सर्व्व॒ऽलो॒कम् । म॒इ॒षा॒णे॒षा॒ण॒मे॒म॒ऽइ॒षा॒ण । इ॒षा॒णेती॑षाण ॥१॥

धा॒ता॒रा॒ती॒रा॒तिर्धा॑ताधा॒ता॒रा॒तिः॒स॑वि॒ता । रा॒तिः॒स॑वि॒तास॑वि॒ता॒रा॒ती॒रा॒तिः॒ स॑वि॒तेदम् । स॒वि॒तेद॒मि॒दः॒स॑वि॒तास॑वि॒तेद॒ज्जु॑षन्ताम् । इ॒दज्जु॑षन्ताज्जु॑षन्ता॒मि॒द॒मि॒दज्जु॑षन्ताम्प्र॒जाप॑तिः। जु॒ष॒न्ता॒म॒प्र॒जा॒प॒तिः॒प्र॒जा॒प॒ति॒ज्जु॒॑ष॒न्ता॒ऽजु॒ष॒न्ता॒म्प्र॒जा॒प॒ति॒र्नि॑धि॒पाः॒ प्र॒जाप॑ति॒र्नि॑धि॒पानि॑धि॒पाः॒प्र॒जाप॑तिःप्र॒जाप॑ति॒र्न्नि॑धि॒पादे॒वः॒ । प्र॒जाप॑ति॒रिति॑प्र॒जाऽप॑तिः । नि॒धि॒पादे॒वोदे॒वोनि॑धि॒पादे॒वोऽअ॒ग्ग्निः॒। नि॒धि॒पाऽइ॒ति॒नि॒धि॒ऽपाः॒ । दे॒वोऽअ॒ग्ग्निर॒ग्ग्निर्द्दे॒वोदे॒वोऽअ॒ग्ग्निः॒। अ॒ग्ग्नि॒रि॒त्त्य॒ग्ग्निः॒ ॥ त्वष्ट्टा॒व्विष्ण॑ु॒र्व्वि॒ष्णु॒स्त्त्वष्ट्टा॒त्त्वष्ट्टा॒व्विष्ण॑ुः॒प्प्र॒जया॑। विष्ण॑ुः॒प्प्र॒जाया॒प्प्र॒जया॒व्विष्ण॑ु॒र्व्वि॒ष्णुः॒प्प्र॒जया॒सः॒र॒रा॒णाः॒ । प्र॒जया॒सः॒र॒रा॒णाः॒सं॒र॒रा॒णाः॒प्प्र॒जया॒प्प्र॒जया॒सः॒र॒रा॒णाय॒ज॑ मानाय। प्र॒जयेति॑प्प्र॒ऽजया॑ । सः॒र॒रा॒णाय॒ ज॑मानाय॒यज॑मा नायसः॒र॒रा॒णाः॒सं॒र॒रा॒णाय॒ज॑मानाय॒द्द्रवि॑णम् । सः॒र॒रा॒णाऽइति॑सम्ऽर॒रा॒णाः॒ । यज॑मानाय॒द्द्रवि॑ण॒न्द्रवि॑ण॒ञ्ज्य॒ज॑मानाय॒यज॑मानाय॒द्द्रवि॑ण॒न्दधात । द्रवि॑ण॒न्दधा॒त॒दधा॒त॒द्द्रवि॑ण॒न्द्रवि॑ण॒ न्दधा॒त॒स्वाहा॑ । द॒धा॒त॒स्वाहा॒स्वाहा॑दधात॒दधा॒त॒स्वाहा॑ । स्वाहे ति॒स्वाहा॑ ॥

रेखापाठलक्षणम् -

**क्रमाद्वित्रिचतुः पञ्चपदक्रममुदाहरेत् । पृथक् पृथक् विपर्यस्य रेखा माहुः पुनः क्रमात् ॥१॥ क्रमात्॥ अनुक्रमात् ॥ द्वित्रीचतुः पञ्चपदक्रमम् प्रत्येकं प्रत्येकं विपर्यस्य क्रमादुदाहरेत् ॥ एवमुक्त्वा विकृति न्नाम रेखां प्रचक्षते ॥**

**सरलार्थः-** अस्याम् अर्धऋच् वा संपूर्णऋचः पदद्वयस्य क्रमपाठः पदत्रयस्य क्रमपाठः, पदचतुष्टयस्य क्रमपाठः अनेन प्रकारेण क्रमशः कर्तुं शक्यते । अनेनप्रकारेण व्युत्क्रमेऽपि करणाननारं संक्रमणे द्वे द्वे पदस्यैव पाठो भवति। प्रत्येकक्रमस्यारम्भ एकंः पूर्ववर्तिपदं त्यक्त्वा अवसानपूर्वकं पाठोऽयं भवति ।

रेखापाठस्योदाहरणम् -

**ॐ वृहंस्प्पतेपरिं । परिवृहंस्प्पते । वृहंस्प्पतेपरिं । परिंदीयारथेंन । रथेंनदीयपरिं । परिंदीय। दीयारथेंन । रथेंनरक्षोहा मित्राँ२ऽअपवाधंमानः । अपवाधंमानोमित्रांन्नक्षोहारथेंन। रथेंनरक्षोहा । रक्षोहामित्रांन् । रक्षोहेतिंरक्षःऽहा । अमित्राँ२ऽअपवाधंमानः । अपवाधंमानऽइत्त्यंपऽवाधंमानः ॥ प्रभञ्जन्त्सेनांःप्प्रमृणोयुधाजयंन् । जयंन्युधाप्प्रमृणः। सेनांःप्प्रभञ्जन्। प्रभञ्जन्नितिंप्रऽभञ्जन् । सेनांःप्प्रमृणः । प्रमृणोयुधा । प्रमृणऽइतिंप्प्रऽमृणः। युधाजयंन् । जयंन्न स्म्माकंमेद्ध्यवितारथांनाम्। रथांनामवितैद्ध्यस्म्माकञ्जयंन् । जयंन्स्म्माकंम्। अस्म्माकंमेधि । एद्ध्यविता । अवितारथांनाम् । रथांनामितिरथांनाम्॥१॥**

ध्वजपाठलक्षणम् -

**भूयादादेः क्रमं सम्यगन्तादुच्चारयेदिति ।**

**वर्गे वा ऋचि वा यत्र पठनं स ध्वजः स्मृतः ॥**

वर्गे वा ऋचि वास्थादिः ॥ आदित आरभ्य सम्यक् क्रमं ब्रूयात् ॥ अन्तादेयं क्रमारभ्य सम्यगुत्तारयेत् ॥ एकमेकं पूर्वं पूर्वं पदं अन्तो पान्त्यादिक्रमपूर्वे अनुक्रमेणावार्षयदित्यर्थः । इति ये सादितं स्यात् । स ध्वज इत्यर्थः ।

**सरलार्थः-** अस्यविकृत्या प्रथमपदद्वयस्य क्रमः एवम् अन्तिमपदस्य क्रमः अनेन प्रकारेण सहैव आदितः अन्तः पुनः अन्ततः आदिपर्यन्तं पाठो भवति । तादृशं एकस्मिन् मन्त्रे वा एकवर्गे आदि तः अन्तपर्यन्तं भवितुं शक्यते।

ध्वजपाठस्योदाहरणम् -

**ॐ बृहंस्प्पतेपरिं । रथांनामितिरथांनाम् । परिंदीय । अवितारथांनाम् । दीयपरिं । एद्ध्यविता । रथेंनरक्षोहा। अस्म्माकंमेधि । रक्षोहामित्रांन् । जयंन्स्म्माकंम् । रक्षोहेतिंरक्षःऽहा । युधाजयंन् । अमित्राँ२ऽअपबाधंमानः। प्रमृणोयुधा । प्रभुञ्जन्त्सेनांः। सेनांःप्प्रमृणः । प्रभुञ्जन्नितिंप्प्रऽभन् । सेनांःप्प्रमृणः । प्रभञ्जन्त्सेनांःप्प्रमृणोयुधा । अपबाधंमानऽइत्त्यंपऽबाधंमानः । प्रमृणऽइतिंप्प्रऽमृणः । अमित्राँ२ऽअपबाधंमानः । युधाजयंन् । रक्षोहेतिंरक्षःऽहा । जयंन्स्म्माकंम् । रक्षोहामित्रांन् । अस्म्माकंमेधि । रथेंनरक्षोहा । एद्ध्याविता । दीयारथेंन . अवितारथांनाम् । परिंदीय। रथांनामितिरथांनाम्। बृहंस्प्पते । परीं ॥१॥**

दण्डपाठलक्षणम् -

**क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम् ।**

**अर्धर्चादेवमुक्त्वोक्त्यक्रमदण्डोऽभिधीयते ॥ १॥**

पुनश्च पुनरपि आदितः आरभ्य क्रमुच्चरेत् ।

एवं पूर्वार्धर्चक्रमसम्बन्धत्वेनोतरादर्धर्चं क्रममुक्त्वा ॥

पूर्वादर्धं चादिपदयर्यन्तं वियर्यासेन संहितामुक्त्वा ॥

पुनस्तत्ऽआरभ्योत्तरार्धर्चस्थपर्यन्तं किं कसोवाश्च एवेत्यन्तो नेत्याह ॥ अर्धर्चादिति अर्धर्चपरिसमाप्तिपर्यन्तं एवायं नियमः ॥ तस्योक्ता उच्चारेण दण्डोनाम विकृतिविशेषोऽभिधीयते ।

सरलार्थः- अनुक्रमात् पदद्वयस्य पाठस्य अनन्तरे व्युत्क्रमे क्रमशः एकाम् एकाम् पदवृद्धिं कृत्वा पाठः क्रियते सः दण्डपाठः उच्चते । सः विधिः अर्धर्चपर्यन्तं प्रचलति ।

दण्डपाठस्योदाहरणम् -

ॐताऽउभौ । उभौतौ । ताऽउभौ । उभौचतुरः । चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः। चतुरःपदः । पदश्चतुरऽउभौतौ । ताऽउभौ । उभोचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावपदश्चतुरश्चऽउभौतौ । ताऽउभौ। उभौचतुरः । चतुरःपदः। पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । स्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । लोकेस्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे। सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । स्वर्ग्गेऽइतिस्वःऽगे । लोकेप्प्र । प्रलोकेस्वर्ग्गेसम्प्रसारयावपद श्चतुरऽउभौतौ। ताउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके। स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथाम्प्रलोकेस्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः। चतुरःपदः। पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषा । वृषार्ण्णुवाथाम्प्रलोकेस्वर्ग्गे सम्प्रसारयावपदश्चतुरऽउभौतौ। ताऽउभौ । उभौवतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके। स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृपा । वृपाव्वाजी । व्वाजीवृपोर्ण्णुवाथाम्प्रलोकेस्वर्ग्गेसम्प्रसारयाव पदश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव। स्वर्ग्गेलोके । स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषा । वृषाव्वाजी। व्वाजीरेतोधाः । रेतोधाव्वाजीवृपोर्ण्णुवाथाम्प्रलोकेस्वर्ग्गेसम्प्रसारयावप् दश्चतुरऽउभौतौ । ताऽउभौ । उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव। सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम्। ऊर्ण्णुवाथांवृपा । वृपाव्वाजी । व्वाजीरेतोधाः । रेतोधारेतः ।

रेतोरेतोधाव्वाजीवृषोर्ण्णुवाथाम्प्रलोकेस्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ। ताऽउभौ । उभौचतुरः।
चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे । सम्प्रसारयावेतिसम्ऽप्रसारयाव ।
स्वर्ग्गेलोके। स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम् । ऊर्ण्णुवाथांवृषा । वृषाव्वाजी।
व्वाजीरेतोधाः । रेतोधारेतः । रेतोधऽइतिरेतःऽधाः । रेतोदधातु ।
दधातुरेतोरेतोधाव्वाजीवृषोर्ण्णुवाथाम्प्र लोकेस्वर्ग्गेसम्प्रसारयावपदश्चतुरऽउभौतौ । ताऽउभौ।
उभौचतुरः । चतुरःपदः । पदःसम्प्रसारयाव । सम्प्रसारयावस्वर्ग्गे ।
सम्प्रसारयावेतिसम्ऽप्रसारयाव । स्वर्ग्गेलोके । स्वर्ग्गऽइतिस्वःऽगे । लोकेप्प्र । प्रोर्ण्णुवाथाम्।
ऊर्ण्णुवाथांवृषा । वृषाव्वाजी । व्वाजीरेतोधाः । रेतोधारेतः । रेतोधाऽइतिरेतःऽधाः ।
रेतोदधातु । दधात्त्वितिदधातु ॥१॥

**रथपाठलक्षणम् -**

पादशोर्धर्चशो वापि सहोक्त्वा दण्डवद्रथः ।

ऋचोर्धर्चयोः पदयोर्दण्डवत्संहितापदक्रमैः ॥

सहोक्त्वा रथो विहितो भवतीत्यर्थः ॥ सहोक्तिरेव रथ इति यावत् ।

**सरलार्थः-** रथपाठस्य भेदत्रयमस्ति । द्विचक्रः, त्रिचक्रः एवं चतुष्चक्रः । द्विचक्ररथः अर्धर्चशः वर्तते । त्रिचक्ररथः समानपदसंख्यायुक्तपदत्रयस्य गायत्रीछन्द्रसः ऋचायामेव पादशः भवति । चतुष्चक्ररथमपि पादशः भवति।

**रथपाठस्योदाहरणम् -**

॥चतुष्पाद्रथः॥

ॐ स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । नःस्वस्ति । नःस्वस्ति।
नःस्वस्ति। नःस्वस्ति। स्वस्तिनः। स्वस्तिनः । स्वस्तिनः । स्वस्तिनः । नऽइन्द्रः।
नःपूषा। नस्त्तार्क्क्ष्यः । नोबृहस्प्पतिः। इन्द्रोनः स्वस्ति । पूषानःस्वस्ति । तार्क्क्ष्योनःस्वस्ति।
बृहस्प्पतिर्न्नःस्वस्ति । स्वस्तिनः । स्वस्तिनः । स्वस्तिनः। स्वस्तिनः। नऽइन्द्रः । नःपूषा।
नस्त्तार्क्क्ष्यः । नोबृहस्प्पतिः । इन्द्रोवृद्धश्श्रवाः । पूषाव्विश्श्ववेदाः। तार्क्क्ष्योऽअरिष्ट्टनेमिः।
बृहस्प्पतिर्द्दधातु । वृद्धश्श्रवाऽइन्द्रोनःस्वस्ति। व्विश्श्ववेदाःपूषानःस्वस्ति।
अरिष्ट्टनेमिस्त्तार्क्क्ष्योनःस्वस्ति। दधातुबृहस्प्पतिर्न्नःस्वस्ति । स्वस्तिनः । स्वस्तिनः ।
स्वस्तिनः । स्वस्तिर्नः । नऽइन्द्रः । नःपूषा । नसत्तार्क्क्ष्यः। नोबृहस्प्पतिः ।
इन्द्रोवृद्धश्श्रवाः । पूषाव्विश्श्ववेदाः। तार्क्क्ष्योऽअरिष्ट्टनेमिः। बृहस्प्पतिर्द्दधातु।
वृद्धश्श्रवाऽइतिवृद्धऽश्श्रवाः। व्विश्श्ववेदाऽइतिव्विश्श्वऽवेदाः । अरिष्ट्टनेमिरित्त्यरिष्ट्टऽनेमिः।
दधात्त्वितिदधातु ॥१॥

॥ अथ द्विपाद्रथः ॥

ॐ अनिशितोसि । अनिशितासि । अस्यनिशितः । अस्यनिशिता । अनिशितोसि ।
अनिशितासि । अनिशितऽइत्त्यनिशितः । अनिशितेत्त्यनिऽशिता । असिसपत्क्नक्षित् ।
असिसपत्कानक्षित् । सपत्क्नक्षिदस्यनिशितः । सपत्क्नक्षिदस्यनिशिता । अनिशितोसि ।
अनिशितासि । अनिशितइत्त्यनिऽशितः । अनिशितेत्त्यनिऽशिता । असिसपत्क्नक्षित्।
असिसपत्क्नक्षित् । सपत्क्नक्षिद्वाजिनम् । सपत्क्नक्षिद्वाजिनम् ।
व्वाजिनंसपत्क्नक्षिदस्यनिशितः । व्वाजिनीसपत्क्नक्षिदस्यनिशित । अनिशितोसि ।
अनिशितासि । अनिशितऽइत्त्यनिऽशितः । अनिशितेत्त्यनिऽशिता । असिसपत्क्नक्षित् ।

असिसपत्नक्षित् । सपत्नक्षिद्वाजिनीम् । सपत्नक्षिद्वाजिनम् । सपत्नक्षिदितिसपत्नऽक्षित् । सपत्नक्षिदितिसपत्नऽक्षित् । व्वाजिनन्त्वा । व्वाजिनीन्त्वा । त्वाव्वाजिनꣳ सपत्नक्षिदस्यनिशितः त्वाव्वाजिनीꣳ सपत्नक्षिदस्यनिशिता । अनिशितासि । अनिशितासि । अनिशितऽइत्त्यनिऽशितः । अनिशितेत्त्यनिऽशिता । असिसपत्नक्षित् । असिसपत्नक्षित् । सपत्नक्षिद्वाजिनम् । सपत्नक्षिद्वाजिनीम् । सपत्नक्षिदितिसपत्नऽक्षित् । सपत्नक्षिदितिसपत्नऽक्षित् । व्वाजिनीन्त्वा । व्वाजिनन्त्वा । त्वाव्वाजेद्ध्यायै । त्वाव्वाजेद्ध्यायै । व्वाजेद्ध्यायैत्वाव्वाजिनꣳ सपत्नक्षिदस्यनिशितः । व्वाजेद्ध्यायैत्वाव्वाजिनीꣳ सपत्नक्षिदस्यनिशिता । अनिशितोसि । अनिशितासि । अनिशितऽइत्त्यनिऽशितः । अनिशितऽइत्त्यनीऽशिता । असिसपत्नक्षित् । असिसपत्नक्षित् । सपत्नक्षिद्वाजिनम् । सपत्नक्षिद्वाजिनीम् । सपत्नक्षिदितिसपत्नऽक्षित् । सपत्नक्षिदितिसपत्नऽक्षित् । व्वाजिनन्त्वा । व्वाजिनीन्त्वा । त्वाव्वाजेद्ध्यायै । त्वाव्वाजेद्ध्यायै । व्वाजेद्ध्यायैसम् । व्वाजेद्ध्यायैसम् । संव्वाजेद्ध्यायैत्त्वाव्वाजिनीꣳ सपत्नक्षिदस्यनिशिताः । संव्वाजेद्ध्यायैत्त्वाव्वाजिनीꣳ सपत्नक्षिदस्यनिशिताः । अनिशितोसि । अनिशितोसि । अनिशितऽइत्त्यनिऽशितः । अनिशितऽइत्त्यनिऽशिता । असिसपत्नक्षित् । असिसपत्नक्षित् । सपत्नक्षिद्वाजिनम् । सपत्नक्षिद्वाजिनीम् । सपत्नक्षिदितिसपत्नऽक्षित् । सपत्नक्षिदितिसपत्नऽक्षित् । व्वाजिनन्त्वा । व्वाजिनीन्त्वा । त्वाव्वाजेद्ध्यायै । त्वाव्वाजेद्ध्यायै । व्वाजेद्ध्यायैसम् । व्वाजेद्ध्यायैसम् । व्वाजेद्ध्यायाऽइतिव्वाजऽइद्ध्यायै । व्वाजेद्ध्यायाऽइतिव्वाजऽइद्ध्यायैसम्मार्ज्मि । सम्मार्ज्मि । मार्ज्मिसंव्वाजेद्ध्यायेत्त्वाव्वाजिनꣳ सपत्नक्षिदस्यनिशितः । मार्ज्मिसंव्वाजेद्ध्यायेत्त्वाव्वाजिनीꣳ सपत्नक्षिदस्यनिशिता । अनिशितोसि । अनिशितासि । अनिशितऽइत्त्यनिऽशितः । अनिशितऽइत्त्यनीऽशिता । असिसपत्नक्षित् । असिसपत्नक्षित् । सपत्नक्षिद्वाजिनम् । सपत्नक्षिद्वाजिनीम् । सपत्नक्षिदितिसपत्नऽक्षित् । सपत्नक्षिदितिसपत्नऽक्षित् । व्वाजिनन्त्वा । व्वाजिनीन्त्वा । त्वाव्वाजेद्ध्यायै । त्वाव्वाजेद्ध्यायै । व्वाजेद्ध्यायैसम् व्वाजेद्ध्यायैसम् । व्वाजेद्ध्यायाऽइतिव्वाजऽइद्ध्यायै व्वाजेद्ध्यायाऽइतिव्वाजऽइद्ध्यायै । सम्मार्ज्मि । सम्मार्ज्मि । मार्ज्मीतिमार्ज्मि । मार्ज्मीतिमार्ज्मि ॥२॥ इति

धनपाठलक्षणम् -

**शिखा जटा धनः प्रोक्ता इत्यष्टौ विकृतीः पठेत् ।**

(अथ द्वितीय प्रकारो घनः) अत्रलक्षणम् प्रतिपाद्यते ।

**अन्तक्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् ।**

**आदिक्रमं नयेदन्तं घनमाहुमनीषिणः ॥**

**सरलार्थः-** वैदिकविदुषां सर्वाधिकसमादृतघनपाठस्य प्रकारचतुष्टयम् अस्ति । घनस्य भेदद्वयं यथा घनवल्लभस्याऽपि भेदद्वयम् अस्ति । घनपाठे शिखापाठं कृत्वा तस्य विपर्यासानन्तरं पुनः अस्य पदत्रयस्य पाठः क्रियते । घनवल्लभे पञ्चसन्धियुक्तपाठोपि भवति । अनुक्रमः उत्क्रमः, व्युत्क्रमः, अभिक्रमः, एवं संक्रमः पञ्चसन्धियुक्तेन कारणेन ''पञ्चसन्धियुक्तघनः'' अपि उच्चते । तस्यातिरिक्त अन्येऽयि अवान्तरभेदाः सन्ति। किन्तु अत्र यथाशक्तिघनमन्त्राः प्रदर्शिताः सन्ति ।ट

घनपाठस्योदाहरणम् -

॥हरि ॐ ॥ग॒णाना॑न्त्वात्त्वाग॒णाना॑ङ्ग॒णाना॑न्त्वाग॒णप॑तिङ्ग॒णप॑तिन्त्वाग॒णाना॑ङ्ग॒णाना॑न्त्वाग॒णप॑तिम् ॥ त्वा॒ग॒णप॑तिङ्ग॒णप॑तिन्त्वात्त्वाग॒णप॑ति॒ꣳहवामहेहवा महेग॒णप॑तिन्त्वात्त्वाग॒णप॑ति॒ꣳहवामहे । ग॒णप॑ति॒ꣳहवामहेह वामहेग॒णप॑तिङ्ग॒णप॑ति हवामहप्प्रि॒याणाम्प्रि॒याणा॒ꣳ हवामहेग॒णप॑तिङ्ग॒णपङ्गति॒ꣳहवामहेप्प्रि॒याणा॑म् ।ग॒णप॑ति॒मिति॑ग॒णऽप॑तिम्।ह॒वा॒म॒हे॒प्प्रि॒याणा॑म्प्रि॒याणा॑ ꣳहवामहेहवामहेप्प्रि॒याणा॑म्प्रि॒यप॑तिम् । प्रि॒यप॑तिम्प्रि॒याणा॑ꣳहवामहेहवामहेप्प्रि॒याणा॑म्प्रि॒यप॑तिम्। प्रि॒याणा॑म्प्रि॒यप॑तिम्प्रि॒यप॑तिम्प्रि॒याणा॑म्प्रि॒याणा॑म्प्रि॒यप॑तिन्निधीनाम्। न्नि॑धी॒नाम्प्रि॒यप॑तिम्प्रि॒याणा- 'म्प्रि॒याणा॑म्प्रि॒यप॑तिन्निधीनाम्। प्रि॒यप॑तिन्निधीनान्नि॑धीनाम्प्रि॒यप॑तिम्प्रि॒यप॑तिन्निधी॒नान्नि॑धि॒पति॑- न्निधि॒पति॑न्निधी॒नाम्प्रि॒यप॑तिम्प्रि॒यप॑तिन्निधी॒नान्नि॑धि॒पतिम्। प्रि॒यप॑ति॒मिति॑प्प्रि॒यऽप॑तिम्। नि॒धी॒नान्नि॑धि॒पति॑न्निधि॒पति॑न्निधी॒नान्नि॑धी॒पति॑व्वसोव्वसोनिधी॒पति॑न्निधी॒नान्नि॑धी॒नान्नि॑धि॒पति॑व्वसो । नि॒धी॒नामिति॑नीऽधी॒नाम्। नि॒धि॒पति॑व्वसोव्वसोनिधि॒पति॑न्निधि॒पति॑व्वसोमममव्वसोनिधि॒पति॑ न्निधि॒पति॑नव्वसोमम। नि॒धि॒पति॒मिति॑निधीऽपति॑म् ।व्व॒सो॒मम॒ममव्व॒सो॒मम ।व्व॒सो॒ऽइति॑व्वसो । म॒मेति॑मम॥ आह॒मह॒माह॒म॑जान्यजान्यह॒माह॒म॑जानि। अ॒ह॒म॑जान्यजान्यह॒मह॒म॑जानिगर्ब्भ॒धङ्ग॒र्ब्भ॒ ध॒म॑जान्यह॒मह॒म॑जानिगर्ब्भ॒धम्। अ॒जा॒नि॒ग॒र्ब्भ॒धङ्ग॒र्ब्भ॒ध॒म॑जान्यजानिगर्ब्भ॒धमात्त्वन्त्वमाग॑र्ब्भ॒ - ध॒म॑जान्यजानिर्ब्भ॒धमात्त्वम् ।ग॒र्ब्भ॒धमात्त्वन्त्वमाग॑र्ब्भ॒धङ्ग॒र्ब्भ॒धमात्त्वम॑जास्यजासि॒त्त्वमाग॑र्ब्भ॒घङ्ग॒र्ब्भ॒- धमात्त्वम॑जासि। ग॒र्ब्भ॒धमिति॑गर्ब्भ॒ऽधम्। आत्त्वम् । त्वम॑जास्यजासि॒त्त्वन्त्वम॑जासिगर्ब्भ॒ - धङ्ग॒र्ब्भ॒ध॒म॑जासि॒त्त्व न्त्वम॑जासिगर्ब्भ॒धम् । अ॒जा॒सि॒ग॒र्ब्भ॒धङ्ग॒र्ब्भ॒म॑जास्यजासिगर्ब्भ॒धम्। ग॒र्ब्भ॒धमिति॑गर्ब्भ॒ऽधम् ॥१ ॥

अम्बे॒ऽअम्बि॒के म्बि॒केम्बेम्बे॒ऽअम्बि॒केम्बा॑लि॒केम्बा॑लि॒केम्बि॒केम्बेम्बे॒ऽअम्बि॒केम्बा॑लिके । अम्बि॒केम्बा॑लि॒केम्बा॑लि॒केम्बि॒केम्बि॒केम्बा॑लिके॒न नाम्बा॑लि॒केम्बि॒केम्बि॒केम्बा॑लिके॒न । अम्बा॑लिके॒ननाम्बा॑लि॒केबा॑लिके॒नमा॑मा॒नाम्बा॑लि॒केबा॑लिके॒नमा॑ । नमा॑मा॒ननमा॑नय तिनयतिमा॒ननमा॑नयति। मा॒न॒य॒ति॒न॒य॒ति॒मा॒मा॒न॒य॒ति॒कꣳ कोन॑यतिमामानयति॒कꣳ । न॒य॒ति॒क॒ꣳकोन॑यतिनयति॒कश्श्च॒न चनकोन॑यतिनयति॒कश्श्च॒न ।कश्श्च॒नच॒नक॒ꣳकश्च॒न ।च॒नेति॑च॒न ॥ स॒स॑स्त्यश्श्व॒कोश्श्व॒क॒ꣳस॒स॑स्त्ति॒स॒स॑स्त्यश्श्व॒क॒ꣳसु॒भ॑द्रि का॒ꣳसु॒भ॑द्रिकामश्श्व॒क॒ꣳ स॒स॑स्त्ति॒स॒स॑स्त्यश्श्व॒क॒ꣳ सु॒भ॑द्रिकाम् । अ॒श्श्व॒क॒ꣳसु॒भ॑द्रिका॒ꣳसु॒भ॑द्रिकामश्श्व॒कोश्श्व॒क॒ꣳसु॒भ॑द्रिकाङ्काम्पीलवा॒सिनी॑ ङ्काम्पीलवा॒सिनी॒ꣳ सु॒भ॑द्रिकामश्श्व॒कोश्श्व॒क॒ꣳसु॒भ॑द्रिकाङ्काम्पीलवा॒सिनी॑म्। सु॒भ॑द्रिकाङ्काम्पीलवा॒सिनी॑ङ्काम्पीलवा॒सिनी॒ꣳसु॒भ॑द्रिका॒ꣳसु॒भ॑द्रिकाङ्काम्पीलवा॒सिनी॑म् । सु॒भ॑द्रिका॒मिति॑सु॒ऽभ॑द्रिकाम्। का॒म्पी॒ल॒वा॒सिनी॒॑मिति॑काम्पील॒ऽवा॒सिनी॑म् ॥२॥

व॒ह्वी॒नाम्पि॒तापि॒ताब॑ह्वी॒नाम्ब॑ह्वी॒नाम्पि॒ताब॒हु व्व॒हु॒पि॒ताब॑ह्वी॒नाम्ब॑ह्वी॒नाम्पि॒ताब॒हु॒ꣳ । पि॒ताब॒हुर्व्व॒हु॒ꣳपि॒तापि॒ताब॒हुर॑स्यास्यब॒हु॒ꣳपि॒तापि॒ताब॒हुर॑स्य। ब॒हुर॑स्यास्यब॒हुर्व्व॒हुर॑स्य पु॒त्र॒ꣳपु॒त्रो॑स्यब॒हुर्व्व॒हुर॑स्यपु॒त्र॒ꣳ। अ॒स्यपु॒त्र॒ꣳपु॒त्रो॑स्यास्यपु॒त्रश्चि॒श्चाचि॒श्चापु॒त्रो॑स्यास्यपु॒त्रश्चि॒श्चा । पु॒त्रश्चि॒श्चाचि॒श्चापु॒त्र॒ꣳपु॒त्राश्चि॒श्चाकृ॑ णोतिकृ णोतिचि॒श्चापु॒त्र॒ꣳपु॒त्रश्चि॒श्चाकृ॑ णोति। चि॒श्चाकृ॑णोतिचि॒श्चाचि॒श्चाकृ॑णोति॒सम॑ना॒सम॑नाकृणोतिचि॒श्चा चि॒श्चाकृ॑णोति॒सम॑ना । कृ॒णो॒ति॒सम॑ना॒सम॑नाकृणोतिकृणोति॒सम॑नाव॒गत्त्या॑व॒गत्त्य॒सम॑नाकृणोतिकृणोति॒सम॑नाव॒गत्त्य॑ ।

**समनावगत्त्यांव गत्त्यसमनासमनावगत्त्यं। अवगत्त्येत्त्यंवऽगत्त्यं ॥ इषुधिꣳसङ्काःसङ्काऽइषुधिरंषुधिꣳसङ्काःपृतनाःपृतनाःसङ्काऽइषुधिरंषुधिꣳ सङ्काःपृतनाः ।इषुधिरितींपुऽधिꣳ। सङ्काःपृतनाःपृतनाःसङ्काःसङ्काःपृतनाश्चचपृतनाःसङ्काःसङ्काःपृतनाश्च। पृतनाश्चचपृतनाः पृतनाश्चसर्व्वाःसर्व्वाश्चपृतनाःपृतनाश्चसर्व्वाः। चसर्व्वाःसर्व्वाश्चचसर्व्वासर्व्वाःसर्व्वाश्चः पृष्टेपृष्टेसर्व्वाश्चचसर्व्वाःपृष्टेः। सर्व्वाःपृष्टेपृष्टेसर्व्वाःसर्व्वाःपृष्टेनिनंद्धनिनंद्धःपृष्टेसर्व्वाः सर्व्वाःपृष्टेनिनंद्धः। पृष्टेनिनंद्धोनिनंद्धःपृष्टेपृष्टेनिनंद्धजयति जयतिनिनंद्धोःपृष्टेपृष्टेनिनंद्धजयति। निनंद्धोजयतिजयतिनिनंद्धोनिनंद्धोजयतिप्प्रसूतःप्प्रसूतजयतिनिनंद्धोनिनंद्धोजयतिप्प्रसूतः। निनंद्धऽइतिनीऽनंद्धः। जयतिप्प्रसूतःप्प्रसूतोजयतिजयतिप्प्रसूतः ।प्प्रसूतऽइतिप्प्रऽसूतः ॥३ ॥**

**धानावंन्तङ्करम्भिणंङ्करम्भिणंन्धानावंन्तन्धानावंन्तङ्करम्भिणंमपूपवंन्तमपूपवंन्तङ्करम्भिणंन्धानावंन्त-न्धानावंन्तङ्करम्भिणंमपूपवंन्तमपूपवंन्तम्। धानावंन्तमितिंधानाऽवनन्तम् । करम्भिणंमपूपवंन्तमपूपवंन्तङ्करम्भिणंङ्करम्भिणंमपूपवंन्तमुक्क्थिनंम पूपवंन्तङ्करम्भिणंङ्करम्भिणंम पूपवंन्तमुक्क्थिनंम् ।अपूपवंन्तमुक्क्थिनंमपूपवंन्तमपूपवंन्तमुक्क्थिनंम् ।अपूपवंन्तमित्यंपूपऽवंन्तम् । उक्क्थिनमित्युक्क्थिनंम्॥इन्द्रंप्प्रातꣳप्प्रातरिन्द्रेन्द्रंप्प्रातर्ज्जुंपस्वजुपस्वप्प्रातरिन्द्रेन्द्रंप्प्रातर्ज्जुंपस्व। प्प्रातर्ज्जुंपस्व जुपस्वप्प्रातꣳप्प्रातर्ज्जुंपस्वनोनोजुपस्वप्प्रातꣳप्प्रातर्ज्जुंपस्वनः।जुपस्वनोनोजुपस्वनःनऽइतिंनः ॥४॥इति घनः ॥**

## शब्दार्थाः

**उर्वारुकम्** – कर्कटीम्, **आदित्यः** – सूर्यः, **यज्ञैः** – मखैः, **कामाः** – मनोरथा, **नाकम्** – स्वर्गम्, **अयजन्त** – पूजयन्त, **लोकान्** – चतुर्दशभुवनानि, **दिशः** – आशाः, **नक्षत्राणि** – तारकाणि, **सर्वलोकम्** – सर्वभुवनम्, **धाता** – ब्रह्मा, **द्रविणम्** – धनम्, **रक्षोहा** – राक्षसानाहन्ति वः सः, **अमित्रान्** – शत्रून्, **अपबाधमानः** – तिदस्कुर्वन्, **प्रोर्णुवाथाम्** – परस्पदम् आच्छादिताम्, **प्रसादयावः** – विस्तादणावः, **स्वस्तिनः** – अस्माकं कण्याणम्, **तार्क्ष्यः** – गुरुऽदेवः, **पूषा** – सूर्यः, **अरिष्टनेमिः** – संकटनासमकचक्रम्, ।

## स्वाध्यायः

**१. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा रिक्तस्थानं पूरयत ।**

(१) महाभाष्ये ऋग्वेदस्य ........................ शाखाः प्रदर्शिता । (पंचदश, एकादश, एकविंशतिः)

(२) सुरक्षितऋग्वेदस्य प्राप्तिः ........................ ऋषेः संहितोपलभ्यते । (शाकलऋषेः, गौतमऋषेः, भारद्वाजऋषेः)

(३) ........................ रक्षणार्थम् अष्टविकृतीनां रचना ऋषिभिः कृता । (ब्राह्मणानाम्, वेदमन्त्राणाम्, ऋषीणाम्)

(४) विकृतयः ........................ सन्ति । (एकादशसंख्याः, अष्टसंख्याः, पञ्चसंख्याः)

(५) पंक्तिपावनाः ........................ सन्ति । (जटादिपारायणपरायणाः, पुराणज्ञाः, शास्त्रज्ञाः)

**२. निम्नाङ्कितानां प्रश्नानां एकैकवाक्येनोत्तराणि लिखत ।**

(१) पञ्चसन्धिपूर्वकम् कस्य पाठो भवति?

(२) मालापाठस्य के भेदाः सन्ति?

(३) रथपाठस्य के भेदाः सन्ति?

(४) घनपाठस्य के भेदाः सन्ति?

(५) घनवल्लभे धनस्य कः पाठः प्रदशितः?

**३. (अ) निम्नाङ्कितमन्त्राणां लक्षणं लिखत ।**

(१) जटापाठस्य लक्षणं लिखत ।

(२) मालापाठस्य लक्षणं लिखत ।

(३) शिखापाठस्य लक्षणं लिखत ।

(४) रथपाठस्य लक्षणं लिखत ।

(५) घनपाठस्य लक्षणं लिखत ।

**(ब) मन्त्रपूर्तिः विधेया ।**

(१) त्र्यम्बकंयजामहे .......................... ॥

(२) य॒ज्ञेनय॒ज्ञम् ......................... ॥

(३) श्रीश्चेच॒श्चश्री॒ः श्रीश्चते .................. ॥

(४) ॐ स्व॒स्तिनः .................... ॥

(५) ग॒णानान्त्वा .......................... ॥

**४. टिप्पणी लेख्या ।**

(१) अष्टविकृतीनां पठनप्रयोजनम् ।

(२) मन्त्ररक्षार्थं ऋषिभिः कृतोपायाः ।

**५. शब्दानां विभक्तिपरिचयं लिखत ।**

(१) दिशः

(२) धृतेन

(३) नक्षत्राणि

(४) उभौ

(५) रूपम्

**६. क्रियापदानां परिचयं लिखत ।**

(१) दधातु

(२) यजामहे

(३) सन्तु

(४) संप्रसारयावः

(५) नयति

**७. (अ) सन्धिविच्छेदं कुरुत ।**

(१) भूयादादेः

(२) पुनरपि

(३) श्रीश्चते

(४) पदश्चतुरः

(५) पुनस्त्वा

**७. (ब) सन्धिमेलनं कुरुत ।**

(१) पुनः + ब्रह्माणो

(२) अर्ध + ऋचः

(३) लक्ष्मीः + च

(४) प्रथमानि + आसन्

(५) सह + उक्त्वा

**छात्र-प्रवृत्तिः**

- अष्टविकृतिमन्त्राः कण्ठस्थाः करणीयाः एवं विद्यालयस्य सभायां धार्मिकप्रसङ्गेसम्मुच्चारणीयाः ।

**विशिष्टज्ञानम्**

- भगवान् संहितां प्राह पदपाठं तु रावणः । बाभ्रव्यर्षिः क्रमं प्राह जटां व्याडिरवोचत् ॥ (मधुशिक्षा)
संहितापाठः परब्रह्मपरमात्मना उक्तः, पदपाठ रावणेन प्रोक्तः,
ब्राभव्य ऋषिणा क्रमपाठः एवं च व्याडिमुनिना जटापाठः सम्यक् गदितः

●●●